# संस्कृतव्याकरणम्

कक्षा ६

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

# संस्कृतव्याकरणम्

## कक्षा ६

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

प्रकाशकः
**नेपालसर्वकारः**
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**
**पाठ्यक्रमविकासकेन्द्रम्**
**सानोठिमी-भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

**प्रथमसंस्करणम् - २०७८**

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनो, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य ६ कक्षायाः संस्कृतव्याकरणविषयकपाठ्यक्रमस्याधारेण पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं सहप्रा. डा. गुरुप्रसादः सुवेदी, उपप्रा. उपेन्द्रः दाहालः, निश्चलः अधिकारी, पर्वतराजः घिमिरे, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन लिखितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य लेखने पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने, प्रा.डा. माधवशरणः उपाध्यायः, प्रा.डा. नुरापतिः पोखरेलः, सहप्रा. ध्रुवप्रसादः भट्टराई, उपप्रा. रोहिणीराजः तिमिल्सिना,

शिवप्रसादः लामिछाने, गणेशः तिमिल्सिना, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य चित्राङ्कनं टङ्कणं रूपसज्जा चेत्यादिकं खडोससुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपयोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | शीर्षकम् | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | संज्ञाप्रकरणे वर्णज्ञानं पारिभाषिक्यः संज्ञाश्च | २ |
| द्वितीयः | वर्णोच्चारणस्थान-प्रयत्न-पारिभाषिकसंज्ञाः | ९ |
| तृतीयः | यणादिसन्धिः | १६ |
| चतुर्थः | गुणसन्धिः | २२ |
| पञ्चमः | वृद्धिसन्धिः | २७ |
| षष्ठः | पररूप-दीर्घ-पूर्वरूप-प्रकृतिभाव-अवङ्सन्धिः | ३२ |
| सप्तमः | प्रकृतिभावसन्धिः | ३८ |
| अष्टमः | श्चुत्वष्टुत्वादिसन्धिः | ४५ |
| नवमः | पूर्वसवर्णादिसन्धिः | ५१ |
| दशमः | अनुस्वारपरसवर्णादिसन्धिः | ५५ |
| एकादशः | रुत्वानुनासिकानुस्वारादिसन्धिः | ६२ |
| द्वादशः | सत्व-रुत्वोत्वादिसन्धिः | ६८ |
| त्रयोदशः | रेफलोप-सुलोपादिसन्धिः | ७२ |
| चतुर्दशः | सुबन्तपदपरिचयः | ७६ |
| पञ्चदशः | अकारान्त-शब्दाः- १ | ८१ |
| षोडशः | अकारान्त-शब्दाः- २ | ९१ |
| सप्तदशः | अदन्त-सर्वनामशब्दाः | १०१ |
| अष्टादशः | निर्जर-विश्वपाशब्दौ | ११३ |

| | | |
|---|---|---|
| एकोनविंशः | इकारान्तशब्दाः | १२१ |
| विंशः | ईकारान्तपुँल्लिङ्गशब्दाः | १३८ |
| एकविंशः | उकारान्त-ऋकारान्तादिपुँल्लिङ्गशब्दा | १४८ |
| द्वाविंशः | आबन्तशब्दाः | १५९ |
| त्रयोविंशः | मति-त्रि-गौर्यादिशब्दाः | १६७ |
| चतुर्विंशः | अवर्णान्तनपुंसकलिङ्गशब्दाः | १७६ |
| पञ्चविंशः | इकारान्तादि-नपुंसकलिङ्ग-शब्दाः | १८४ |
| षड्विंशः | हकारान्तेषु लिहादिशब्दाः | १९२ |
| सप्तविंशः | सुदिवादिशब्दाः | १९९ |
| अष्टाविंशः | नकारान्तशब्दाः | २०८ |
| एकोनत्रिंशः | ऋत्विगादिशब्दाः | २१९ |
| त्रिंशः | युष्मदस्मच्छब्दौ | २२६ |
| एकत्रिंशः | सुपादादिशब्दाः | २३७ |
| द्वात्रिंशः | ददादिशब्दाः | २४४ |
| त्रयस्त्रिंशः | विद्वसादिशब्दाः | २५० |
| चतुस्त्रिंशः | हलन्तस्त्रीलिङ्गप्रकरणम् | २५५ |
| पञ्चत्रिंशः | हलन्तनपुंसकलिङ्गप्रकरणम् | २६० |
| षट्त्रिंशः | अव्ययप्रकरणम् | २६४ |

# मङ्गलाचरणम्



**नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।**

**पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥**

**अन्वयः** अहं (वरदराजाचार्यः) शुद्धां गुण्यां सरस्वतीं देवीं नत्वा पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीं करोमि ।

**शब्दार्थः**

| | | |
|---|---|---|
| अहम् | = | वरदराजाचार्यः |
| शुद्धाम् | = | दोषरहिताम् |
| गुण्याम् | = | प्रशस्तगुणयुक्ताम् |
| सरस्वतीं देवीम् | = | सरस्वतीनामिकां वाग्देवीम् |
| नत्वा | = | नमस्कृत्य |
| पाणिनीयप्रवेशाय | = | पाणिनिप्रणीते व्याकरणशास्त्रे प्रवेशाय |
| लघुसिद्धान्तकौमुदीम् | = | लघुसिद्धान्तकौमुदीनामकं ग्रन्थम् |
| करोमि | = | रचयामि |

प्रथमः पाठः

# संज्ञाप्रकरणे वर्णज्ञानं पारिभाषिक्यः संज्ञाश्च

## माहेश्वरसूत्राणि

१. अइउण् । २. ऋऌक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् ।
६. लण् । ७. ञमङणनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् ।
११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् ॥

**इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ॥**

महेश्वरप्रसादात् पाणिनिना लब्धानि इमानि चतुर्दशसूत्राणि व्याकरणशास्त्रस्य मूलभूतानि सन्ति । अत्र लोकप्रसिद्धं क्रमं त्यक्त्वा वर्णानामयं क्रमोः व्याकरणशास्त्रगतानां व्यवहारोपयोगिनाम् अण्, अक्, इक् इत्यादीनां प्रत्याहाराणां निर्माणाय स्वीकृतः अस्ति । 'ह य व र' इत्यादिषु वर्णेषु पठितः अकारः उच्चारणार्थो वर्तते । लण्सूत्रस्थः अकारो र-प्रत्याहाराय इत्-संज्ञकः अस्ति । एतानि सूत्राणि वर्णसमाम्नायः, माहेश्वरसूत्राणि, चतुर्दशसूत्राणि, शिवसूत्रजालम् इत्यादिभिः नामभिः व्यवह्रियन्ते ।

### इत्संज्ञाविधायकं सूत्रम्

**हलन्त्यम् १ ।३ ।३ ॥**

**उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् । सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ॥**

(उपदेशे, अन्त्यम्, हल्, इत्)

सरलार्थः- अत्र उपदेशशब्दस्य आद्योच्चारणमित्यर्थः । तथा च पाणिनिकात्यायनपतञ्जलीनां व्याकरणशास्त्रविषयकं प्रथममुच्चारणमुपदेश इत्यर्थो भवति । प्रथमोच्चारितानां प्रातिपदिक-निपात-प्रत्याहार-सूत्र-प्रत्यय-आदेशानाम् अन्त्यं हल् इत्संज्ञकं भवति ।

यथा- अइउण्, ऋऌक् इत्यादिषु सूत्रेषु णकारादीनाम् अनेन इत्संज्ञा भवति ।

सूत्रेषु अविद्यमानानि पदानि इतरेभ्यः सूत्रेभ्य आनीय सर्वत्र सूत्राणामर्थः कर्तव्यः । यथा- हलन्त्यम् इति सूत्रे 'उपदेशेऽजनुनासिक इत्' इत्यतः 'उपदेशे', 'इत्' इत्यनयोः पदयोः अनुवृत्तिः क्रियते सूत्रस्थपदानां संयोजनेन उपरितनः सूत्रार्थो निष्पद्यते ।

### लोपसंज्ञाविधायकं सूत्रम्

**अदर्शनं लोपः १ ।१ ।६० ॥**

**प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ।**

(अदर्शनम्, लोपः)

सरलार्थः- प्रसक्तस्य = विद्यमानस्य, अदर्शनम् = दर्शनाभावः, प्रक्रियायां जायमानस्य वर्णस्य वर्णसमुदायस्य वा दर्शनस्य अभावो लोप-संज्ञको भवति ।

### लोपादेशविधायकं विधिसूत्रम्

**तस्य लोपः १ ।३ ।९ ॥**

**तस्येतो लोपः स्यात् । णादयोऽणाद्यर्थाः ॥**

(तस्य = इतः, लोपः)

सरलार्थः- तस्य इतः = इत्संज्ञकवर्णस्य, लोपः स्यात् = लोपो भवति । णादयः = अइउण्, ऋलृक् इत्यादीनां सूत्राणाम् अन्ते स्थिताः ण्, क् इत्यादयः अनुबन्धाः, अणाद्यर्थाः = अण्, अक् इत्यादि-प्रत्याहारनिर्माणाय वर्तन्ते ।

### प्रत्याहारसंज्ञाविधायकं सूत्रम्

**आदिरन्त्येन सहेता १ ।१ ।७१ ॥**

**अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । यथाऽणिति अइउवर्णानां संज्ञा । एवमच् हल् अलित्यादयः ॥**

(अन्त्येन, इता, सह, आदिः)

सरलार्थः- अन्ते स्थितेन इत्संज्ञक-वर्णेन सहितः उच्चार्यमाणः आदिवर्णो मध्यवर्तिनां वर्णानाम्, आदिवर्णस्य च बोधको भवति । यथा- अ इ उ ण् इत्यत्र अन्त्येन इत्संज्ञकवर्णेन णकारेण सहितः उच्चार्यमाणः आदिवर्णः 'अण्' इति समुदायः अ, इ, उ इति वर्णानां संज्ञा (बोधकः) भवति । एवंरीत्या अच्, इक् इत्यादयः अन्ये अपि प्रत्याहाराः ज्ञेयाः ।

### ह्रस्व-दीर्घ-प्लुतसंज्ञाविधायकं सूत्रम्

**ऊकालोऽज्झ्रस्वदीर्घप्लुतः १ ।२ ।२७ ॥**

**उश्च ऊश्च ऊ३श्च वः; वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् । स प्रत्येकमुदात्तादिभेदेन त्रिधा ।**

(ऊकालः, अच्, ह्रस्व-दीर्घ-प्लुतः)

सरलार्थः- 'उ' इत्यस्य उच्चारणकालसदृशः (एकमात्रिकः) उच्चारणकालो येषां स्वरवर्णानां भवति, तेषां 'ह्रस्वः' इति संज्ञा भवति । 'ऊ' इत्यस्य उच्चारणकालसदृशः (द्विमात्रिकः) उच्चारणकालो येषां स्वरवर्णानां भवति, तेषां 'दीर्घः' इति संज्ञा भवति । 'उ३' इत्यस्य उच्चारणकालसदृशः (त्रिमात्रिकः) उच्चारणकालो येषां स्वरवर्णानां भवति, तेषां 'प्लुतः' इति संज्ञा भवति ।

| ह्रस्वाः | दीर्घाः | प्लुताः |
|---|---|---|
| अ, इ, उ, ऋ, लृ | आ, ई, ऊ, ॠ, ए, ओ, ऐ, औ | अ३, इ३, उ३, ऋ३, लृ३, ए३, ओ३, ऐ३, औ३ |

स च उदात्तादिसंज्ञाविशिष्टः अच् उदात्तानुदात्तस्वरितस्वराणां भेदेन प्रत्येकं त्रिधा ज्ञेयः ।

### उदात्त-संज्ञाविधायकं सूत्रम्

**उच्चैरुदात्तः १ । २ । २९ ॥**

(उच्चैः, अच्, उदात्तः)

सरलार्थः- कण्ठः, तालु इत्यादिषु उच्चारणस्थानेषु सभागेषु ऊर्ध्वभागे निष्पन्नस्य अच्-वर्णस्य उदात्त-संज्ञा भवति ।

### अनुदात्त-संज्ञाविधायकं सूत्रम्

**नीचैरनुदात्तः १ । २ । ३० ॥**

(नीचैः, अच्, अनुदात्तः)

सरलार्थः- कण्ठः, तालु इत्यादिषु उच्चारणस्थानेषु सभागेषु अधो भागे निष्पन्नस्य अच्-वर्णस्य अनुदात्त-संज्ञा भवति ।

### स्वरितसंज्ञाविधायकं सूत्रम्

**समाहारः स्वरितः १ । २ । ३१ ॥**

(समाहारः, अच्, स्वरितः)

सरलार्थः- उदात्तत्वम्, अनुदात्तत्वं च इत्यनयोः वर्णधर्मयोः यस्मिन् अच्-वर्णे समाहारो भवति, तादृशस्य अच्-वर्णस्य स्वरितसंज्ञा भवति ।

**स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा ।**

तादृशः उदात्तानुदात्तस्वरितस्वरविशिष्टो ह्रस्वदीर्घप्लुतसंज्ञाविशिष्टश्च अच् अनुनासिकत्वाननुनासिकत्वधर्माभ्यां पुनः द्विविधो भवति ।

### अनुनासिकसंज्ञाविधायकं सूत्रम्

**मुखनासिकावचनोऽनुनासिकः १ ।१ ।८ ॥**

**मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ।**

**सरलार्थः**- मुखेन सह नासिकया उच्चार्यमाणो वर्णः अनुनासिकसंज्ञको भवति ।

ङ्, ञ्, ण्, न्, म् एते वर्णाः नित्यम् अनुनासिकाः । यँ, वँ, लँ इति यकार-वकार-लकाराणाम् अनुनासिकभेदाः । अँ, आँ, अँ३, इँ, ईँ, इँ३... इत्यादीनि स्वरवर्णानाम् अनुनासिकस्वरूपाणि ।

**तदित्थम् - अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । लृवर्णस्य द्वादश तस्य दीर्घाभावात् । एचामपि द्वादश तेषां ह्रस्वाभावात् ।**

### लोकप्रसिद्धवर्णानां क्रमदर्शिका सारिणी

| वर्गाः | प्रथमः | द्वितीयः | तृतीयः | चतुर्थः | पञ्चमः |
|---|---|---|---|---|---|
| कवर्गः (कु) | क | ख | ग | घ | ङ |
| चवर्गः (चु) | च | छ | ज | झ | ञ |
| टवर्गः (टु) | ट | ठ | ड | ढ | ण |
| तवर्गः (तु) | त | थ | द | ध | न |
| पवर्गः (पु) | प | फ | ब | भ | म |
| अन्तःस्थाः | य र ल व | | | | |
| ऊष्माणः | श ष स ह | | | | |
| संयुक्तवर्णाः | क्ष त्र ज्ञ | | | | |
| स्वरवर्णाः | अ, आ, इ, ई, उ, ऊ, ऋ, लृ, ए, ऐ, ओ, औ अं = अनुस्वारः अः = विसर्गः | | | | |

## वर्णानाम् अनुनासिकत्वाननुनासिकत्वभेददर्शिका सारिणी

| स्वरवर्णाः | | व्यञ्जनवर्णाः | | | |
|---|---|---|---|---|---|
| अननुनासिकभेदाः (उदात्तानुदात्तस्वरिताः) | अनुनासिकभेदाः (उदात्तानुदात्तस्वरिताः) | नित्यम् अननुनासिकाः | नित्यम् अनुनासिकाः | अननुनासिक -भेदाः | अनुनासिक -भेदाः |
| अ, आ, अ३ | अँ, आँ, अँ३ | क्, ख्, ग्, घ् | ङ् | य् | यँ् |
| इ, ई, इ३ | इँ, ईं, इँ३ | च्, छ्, ज्, झ् | ञ् | व् | वँ् |
| उ, ऊ, उ३ | उँ, ऊँ, उँ३ | ट्, ठ्, ड्, ढ् | ण् | ल् | लँ् |
| ऋ, ॠ, ऋ३ | ऋँ, ॠँ, ऋँ३ | त्, थ्, द्, ध् | न् | | |
| ऌ, ऌ३ | ऌँ, ऌँ३ | प्, फ्, ब्, भ् | म् | | |
| ए, ए३ | एँ, एँ३ | र्, श्, ष्, स्, ह् | | | |
| ओ, ओ३ | ओँ, ओँ३ | | | | |
| ऐ, ऐ३ | ऐँ, ऐँ३ | | | | |
| औ, औ३ | औँ, औँ३ | | | | |

## स्वराणां भेददर्शिका सारिणी

| ह्रस्वः | दीर्घः | प्लुतः | |
|---|---|---|---|
| उ | ऊ | ऊ३ | उदात्तः अननुनासिकः |
| उँ | ऊँ | ऊँ३ | उदात्तः अनुनासिकः |
| उ | ऊ | ऊ३ | अनुदात्तः अननुनासिकः |
| उँ | ऊँ | ऊँ३ | अनुदात्तः अनुनासिकः |
| उ | ऊ | ऊ३ | स्वरितः अननुनासिकः |
| उँ | ऊँ | ऊँ३ | स्वरितः अनुनासिकः |
| अ, इ, उ, ऋ, ऌ | आ, ई, उ, ॠ, ए, ओ, ऐ, औ | अ३, इ३, उ३, ऋ३, ऌ३, ए३, ओ३, ऐ३, औ३ | |

माहेश्वरसूत्रस्थैः हल्भिः इद्भिः कृताः पाणिनीयसूत्रेषु व्यवहृताः द्वाचत्वारिंशत्प्रत्याहाराः

| | | | | | |
|---|---|---|---|---|---|
| १. अक् | ८. अश् | १५. ऐच् | २२. जश् | २९. भष् | ३६. रल् |
| २. अच् | ९. इक् | १६. खय् | २३. झय् | ३०. मय् | ३७. वल् |
| ३. अट् | १०.इच् | १७. खर् | २४. झर् | ३१. यञ् | ३८. वश् |
| ४. अण् | ११. इण् | १८. ङम् | २५. झल् | ३२. यण् | ३९. शर् |
| ५. अण् | १२. उक् | १९. चय् | २६. झश् | ३३. यम् | ४०. शल् |
| ६. अम् | १३. एङ् | २०. चर् | २७. झष् | ३४. यय् | ४१. हल् |
| ७. अल् | १४. एच् | २१. छव् | २८. बश् | ३५. यर् | ४२. हश् |

**प्रत्याहारसिद्धिप्रकारः**

अण्प्रत्यहारसिद्धौ 'अइउण्' इत्यत्र पूर्वं 'हलन्त्यम्' इति सूत्रेण णकारस्य इत्संज्ञायाम्, 'आदिरन्त्येन सहेता' इति सूत्रेण अन्त्येन इत्संज्ञकवर्णेन णकारेण सह उच्चार्यमाणो यः आदिवर्णः अकारः अर्थात् 'अण्' इत्ययं शब्दः मध्यवर्तिनोः इ, उ इत्यनयोः वर्णयोः आदिवर्णस्य अकारस्य च संज्ञा (बोधकः) भवति । अर्थात् 'अण्' इति शब्दः अ, इ, उ इति वर्णान् बोधयति । एवमेव 'अच्' इति इत्संज्ञकेन चकारेण सहितः उच्चार्यमाणः अकारः अकारचकारयोः मध्यवर्तिनाम् इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इति वर्णानाम् आद्यस्य अकारस्य च बोधको भवति । एवंरीत्या अन्ये अपि प्रत्याहारांः बोद्धव्याः ।

## अभ्यासः

**१. कोष्ठस्थम् उपयुक्तं पदं विन्यस्य रिक्तस्थानं पूरयत**

**(अकारः, ऊकालोऽज्झ्रस्वदीर्घप्लुतः, आदिरन्त्येन सहेता, इत्संज्ञा, माहेश्वराणि, इत्संज्ञकः)**

अइउण् इत्यादीनि ........................................ सूत्राणि सन्ति ।
हकारादिषु ........................................... उच्चारणार्थो वर्तते ।
लण्मध्ये तु अकारः ....................................................... ।
'हलन्त्यम्' इति सूत्रेण ..................................... भवति ।
प्रत्याहारसंज्ञा ........................................ इति सूत्रेण विधीयते ।
ह्रस्वदीर्घप्लुतसंज्ञाः ................................. इति सूत्रेण भवन्ति ।

## २. परस्परं मेलयत

| | |
|---|---|
| हलन्त्यम् | लोपादेशः |
| अदर्शनं लोपः | ग ज ड द ब |
| तस्य लोपः | अनुनासिकसंज्ञा |
| उच्चैरुदात्तः | त थ द ध न |
| नीचैरनुदात्तः | ङ ञ ण न म |
| मुखनासिकावचनोऽनुनासिकः | उदात्तसंज्ञा |
| वर्गतृतीयाः | लोपसंज्ञा |
| वर्गपञ्चमाः | इत्संज्ञा |
| तवर्गः | अनुदात्तसंज्ञा |

## ३. अधो लिखितान् प्रश्नान् उत्तरयत

(क) चतुर्दश सूत्राणि कानि ?

(ख) माहेश्वरसूत्रेषु णकारादीनामनुबन्धानां प्रयोजनं किम् ?

(ग) 'आदिरन्त्येन सहेता' इति सूत्रस्य अर्थं लिखत ।

(घ) 'सूत्रेषु अदृष्टं पदं सूत्रान्तराद् अनुवर्तनीयं सर्वत्र' इत्यस्य आशयः कः ?

(ङ) उपदेशपदार्थः कः ?

(च) अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इत्येतेषां वर्णानां प्रत्येकं कति भेदाः सन्ति ?

## ४. द्वाचत्वारिंशत्प्रत्याहारान् तत्र समागतान् वर्णान् च कक्षायां श्रावयत ।

## ५. समीचीनम् असमीचीनं वा सङ्केतयत

(क) अइउण् इत्यादीनि माहेश्वरसूत्राणि सन्ति ।

(ख) हकारादिषु अकारः उच्चारणार्थः ।

(ग) प्रत्याहारेषु अनुबन्धाः अपि समायान्ति ।

(घ) ऋकारस्य दीर्घो न भवति ।

(ङ) प्रत्यहारसंज्ञाविधायकं सूत्रम् 'आदिरन्त्येन सहेता' अस्ति ।

द्वितीयः पाठः

संज्ञाप्रकरणे

# वर्णोच्चारणस्थान-प्रयत्न-पारिभाषिकसंज्ञाः

## सवर्णसंज्ञाविधायकं सूत्रम्

**तुल्यास्यप्रयत्नं सवर्णम् १ ।१ ।९ ॥**

**ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।**

(तुल्य-आस्य-प्रयत्नम्, सवर्णम्)

सरलार्थः- यस्य वर्णस्य येन वर्णेन सह स्थानम् आभ्यन्तरप्रयत्नश्च तुल्यौ स्तः, तयोः वर्णयोः परस्परं सवर्णसंज्ञा भवति ।

## सवर्णसंज्ञाविधायकं वार्तिकम्

**ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् (वा.१)**

सरलार्थः- ऋवर्णस्य लृवर्णस्य च मिथः = परस्परं सवर्णसंज्ञा भवति । अत एव ऋकारस्य अष्टादश भेदाः लृकारस्य द्वादशभेदाश्चेति समाहृत्य ऋकारस्य लृकारस्य च प्रत्येकं त्रिंशत् सवर्णिनो भवन्ति ।

**अथ स्थानानि**

## कस्य वर्णस्य किं स्थानमिति जिज्ञासायामाह

**अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य ।**

सरलार्थः- अ इति अष्टादश अकाराः, कु इति कवर्गः कखगघङवर्णाः, ह इति हकारः, विसर्जनीयो नाम विसर्गः, इत्येतेषां वर्णानां कण्ठ-स्थानं भवति । एवंरीत्या अन्येषामपि बोध्यम् । तथा हि-

**अकुहविसर्जनीयानां कण्ठः** = अष्टादश अकाराः, क्, ख्, ग्, घ्, ङ्, ह्, 'ः' इत्येतेषां वर्णानां कण्ठः स्थानं भवति ।

इचुयशानां तालु = अष्टादश इकाराः, च्, छ्, ज्, झ्, ञ्, य्, श् इत्येतेषां वर्णानां तालु स्थानं भवति ।

ऋटुरषाणां मूर्धा = अष्टादश ऋकाराः, ट्, ठ्, ड्, ढ्, ण्, र्, ष् इत्येतेषां वर्णानां मूर्धा स्थानं भवति ।

लृतुलसानां दन्ताः = द्वादश लृकाराः, त्, थ्, द्, ध्, न्, ल्, स् इत्येतेषां वर्णानां दन्ताः स्थानं भवति ।

उपूपध्मानीयानाम् ओष्ठौ = अष्टादश उकाराः, प्, फ्, ब्, भ्, म्, उपध्मानीयविसर्गः (≍प≍फ) इत्येतेषां वर्णानां ओष्ठौ स्थानं भवति ।

ञमङणनानां नासिका च = ञ्, म्, ङ्, ण्, न् इत्येतेषां वर्णानां नासिका स्थानम् अपि भवति ।

एदैतोः कण्ठतालु = एकारस्य ऐकारस्य च कण्ठतालु स्थानं भवति ।

ओदौतोः कण्ठोष्ठम् = ओकारस्य औकारस्य च कण्ठोष्ठं स्थानं भवति ।

वकारस्य दन्तोष्ठम् = वकारस्य दन्तोष्ठम् स्थानं भवति ।

जिह्वामूलीयस्य जिह्वामूलम् = जिह्वामूलीयस्य विसर्गस्य (≍क≍ख) जिह्वामूलं स्थानं भवति ।

नासिकाऽनुस्वारस्य = अनुस्वारस्य (ं) नासिका स्थानं भवति ।

## अथप्रयत्नाः

वर्णानां स्थानानि निर्दिश्य प्रयत्नान् निर्दिशति

**यत्नो द्विधा- आभ्यन्तरो बाह्यश्च ।**

**आद्यः पञ्चधा- स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयत्नं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव ।**

सरलार्थः- आभ्यन्तरबाह्यप्रयत्नभेदाद् यत्नः द्विविधो भवति । तत्र आभ्यन्तरप्रयत्नः पञ्चविधः । ते च - १. स्पृष्टम् २. ईषत्स्पृष्टम् ३. ईषद्विवृतम् ४. विवृतम् ५. संवृतम् ।

कादिमावसानानां क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म् इति एतेषां स्पर्शवर्णानां स्पृष्टः प्रयत्नो भवति ।

अन्तःस्थानां य्, व्, र्, ल् इति एतेषां वर्णानाम् ईषत्स्पृष्टः प्रयत्नो भवति ।

ऊष्मणां श्, ष्, स्, ह् इति एतेषां वर्णानाम् ईषद्विवृतः प्रयत्नो भवति ।

स्वराणाम् अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इति एतेषां वर्णानां विवृतः प्रयत्नो भवति ।

ह्रस्वस्य अवर्णस्य प्रयोगकाले संवृतः प्रयत्नो भवति, प्रक्रियादशायां तु तस्य विवृत एव प्रयत्नो भवति ।

**बाह्यप्रयत्नस्त्वेकादशधा- विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः ।**

सरलार्थः- विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः स्वरितश्चेति भेदाद् बाह्यप्रयत्नः एकादशधा भवति । तत्र-

खर्प्रत्याहारान्तर्गतानां वर्णानां विवारः, श्वासः, अघोषश्च प्रयत्नाः भवन्ति । हश्-प्रत्याहारान्तर्गतानां वर्णानां संवारः, नादः, घोषश्च प्रयत्नाः भवन्ति । तत्र-

वर्गाणां प्रथम-तृतीय-पञ्चमानाम् अर्थात् क्, च्, ट्, त्, प्, ग्, ज्, ड्, द्, ब्, ङ्, ञ्, ण्, न्, म् इति एतेषां वर्णानाम्, यण् = य्, व्, र्, ल् इति एतेषां वर्णानां च अल्पप्राणः प्रयत्नो भवति । वर्गाणां द्वितीय-चतुर्थयोः अर्थात् ख्, छ्, ठ्, थ्, फ्, घ्, झ्, ढ्, ध्, भ् इति एतेषां वर्णानाम्, शल् = श्, ष्, ह् इति एतेषां वर्णानां च महाप्राणः प्रयत्नो भवति । उदात्तः, अनुदात्तः, स्वरितश्च अच्-वर्णानां प्रयत्नाः सन्ति ।

## वर्णानां पारिभाषिकसंज्ञाः

**कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः । शल ऊष्माणः । अचः स्वराः । ≍क≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः । ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः । अं अः इत्यचः परावनुस्वारविसर्गौ ।**

सरलार्थः- क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म् इति एते स्पर्शसंज्ञकाः वर्णाः सन्ति । य्, व्, र्, ल् इति एते अन्तःस्थसंज्ञकाः वर्णाः वर्तन्ते । श्, ष्, स्, ह् इति एते ऊष्मसंज्ञकाः वर्णाः सन्ति । अ, इ, उ, ऋ, लृ, ए, ओ, ऐ,

औ इति एते स्वरसंज्ञकाः वर्णाः वर्तन्ते । ≍क≍ख इत्युक्तौ कखाभ्यां पूर्वः लेखने उच्चारणे च अर्धविसर्गसदृशो वर्णो वर्तते, सः जिह्वामूलीयः वर्तते । ≍प≍फ इत्युक्तौ पफाभ्यां पूर्वः लेखने उच्चारणे च अर्धविसर्गसदृशो वर्णो वर्तते, सः उपध्मानीयः अस्ति । अं अः इत्यत्र अच्-वर्णात् परे स्थितौ क्रमेण अनुस्वार-विसर्गौ स्तः ।

### सवर्णग्राहकं सूत्रम्

**अणुदित् सवर्णस्य चाप्रत्ययः १ ।१ ।६९ ॥**

**प्रतीयते विधीयत इति प्रत्ययः । अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्रैवाण् परेण णकारेण । कु चु टु तु पु एते उदितः । तदेवम्- अ इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः । एवं लृकारोऽपि । एचो द्वादशानाम् । अनुनासिकाननुनासिकभेदेन यवला द्विधा तेनाननुनासिकास्ते द्वयोर्द्वयोस्संज्ञा ॥**

(अप्रत्ययः, अण्, उदित्, च, सवर्णस्य)

सरलार्थः- अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह्, य्, व्, र्, ल् अर्थात् अणप्रत्यहारान्तर्गताः वर्णाः स्वस्वसवर्णिनां संज्ञाः सन्ति । अविधीयमानाः एते वर्णाः स्वस्वसवर्णिनामपि बोधकाः भवन्तीति सूत्रस्याशयः । अस्मिन् सूत्रे एव 'अण्' प्रत्याहारः 'लण्' सूत्रस्थेन णकारेण गृह्यते। उदित् = कु, चु, टु, तु, पु एते च स्वस्य स्वस्य आद्यवर्णानां सवर्णिनां संज्ञाः सन्ति । अत एव कु इत्ययं शब्दः स्वस्य आद्यवर्णस्य ककारस्य सवर्णिनां क्, ख्, ग्, घ्, ङ् इति एतेषां संज्ञास्ति । एवंरीत्या चु इत्ययं च्, छ्, ज्, झ्, ञ् इत्येतेषाम्, टु इत्ययं ट्, ठ्, ड्, ढ्, ण् इत्येतेषाम्, तु इत्ययं त्, थ्, द्, ध्, न् इत्येतेषाम्, पु इत्ययञ्च प्, फ्, ब्, भ्, म् इत्येतेषां बोधको वर्तते ।

### संहिता-संज्ञाविधायकं सूत्रम्

**परः सन्निकर्षः संहिता १ ।४ ।१०९ ॥**

**वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ॥**

(परः, सन्निकर्षः, संहिता)

सरलार्थः- वर्णानाम् अतिशयितः = अत्यधिकम्, सन्निधिः = सामीप्यम् (अर्धमात्राधिक-कालव्यवधानस्य अभावः) संहिता-संज्ञको भवति । वर्णोच्चारणानन्तरं वर्णान्तरोच्चारणे यावत्कालस्य व्यवधानम् अवश्यम्भावि, तदधिककालव्यवधानशून्यत्वं यत्र तत्र संहितात्वं भवति । तदधिककालव्यवधाने सन्ध्यादिकार्यं न भवतीत्याशयः ।

## संयोग-संज्ञाविधायकं सूत्रम्

**हलोऽनन्तराः संयोगः १ ।१ ।७ ॥**

**अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ॥**

(अनन्तराः, हलः, संयोगः)

सरलार्थः- द्वयोः हल्वर्णयोः बहूनां वा हल्वर्णानां मध्ये यत्र अच् न भवति, ते हलः संयोगसंज्ञकाः भवन्ति । यथा- 'विद्या' इत्यत्र दकार-यकारयोः संयोगः, 'उष्ट्रः' इत्यत्र षकार-टकार-रेफाणां संयोगः ।

## पदसंज्ञाविधायकं सूत्रम्

**सुप्तिङन्तं पदम् १ ।४ ।१४ ॥**

**सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ॥**

(सुप्-तिङ्-अन्तम्, पदम्)

सरलार्थः- सुप्-प्रत्ययान्तम्, तिङ्-प्रत्ययान्तं च शब्दरूपं पद-संज्ञकं भवति ।

**स्थानसारिणी**

| वर्णाः | स्थानानि |
|---|---|
| अ, क्, ख्, ग्, घ्, ङ्, ह् विसर्गः (ः) | कण्ठः |
| इ, च्, छ्, ज्, झ्, ञ्, य्, श् | तालु |
| ऋ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् | मूर्धा |
| लृ, त्, थ्, द्, ध्, न्, ल्, स् | दन्ताः |
| उ, प्, फ्, ब्, भ्, म्, उपध्मानीयविसर्गः (≍प≍फ) | ओष्ठौ |
| ञ्, म्, ङ्, ण्, न्, अनुस्वारः (ं) | नासिका |
| ए, ऐ | कण्ठतालु |
| ओ, औ | कण्ठोष्ठम् |
| व् | दन्तोष्ठम् |
| जिह्वामूलीयविसर्गः (≍क≍ख) | जिह्वामूलम् |

## आभ्यन्तरप्रयत्नसारिणी

| वर्णाः | आभ्यन्तरप्रयत्नाः | संज्ञाः |
|---|---|---|
| क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्<br>ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्<br>प्, फ्, ब्, भ्, म् | स्पृष्टम् | स्पर्शाः |
| य्, व्, र्, ल् | ईषत्स्पृष्टम् | अन्तःस्थाः |
| श्, ष्, स्, ह् | ईषद्विवृतम् | ऊष्माणः |
| अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ | विवृतम् | स्वराः |
| अ (प्रयोगे एव) | संवृतम् | |

## बाह्यप्रयत्नसारिणी

| विवारः, श्वासः, अघोषः | संवारः, नादः, घोषः | अल्पप्राणः | महाप्राणः | उदात्तः, अनुदात्तः, स्वरितः |
|---|---|---|---|---|
| क्, च्, ट्, त्, प्<br>ख्, छ्, ठ्, थ्, फ्<br>श्, ष्, स् | ग्, ज्, ड्, द्, ब्<br>घ्, झ्, ढ्, ध्, भ्<br>ङ्, ञ्, ण्, न्, म्,<br>य्, व्, र्, ल्, ह् | क्, च्, ट्, त्, प्<br>ग्, ज्, ड्, द्, ब्<br>ङ्, ञ्, ण्, न्, म्<br>य्, व्, र्, ल् | ख्, छ्, ठ्, थ्, फ्<br>घ्, झ्, ढ्, ध्, भ्<br>श्, ष्, स्, ह् | अ, इ, उ, ऋ, लृ,<br>ए, ओ, ऐ, औ |

### अभ्यासः

१. रिक्तस्थानं पूरयत

(क) 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रेण ................. भवति । (सवर्णसंज्ञा, पदसंज्ञा)

(ख) ....................-वर्णयोः परस्परं सवर्णसंज्ञा भवति । (क-च, ऋ-लृ)

(ग) लृतुलसानां .................... स्थानं भवति । (ओष्ठौ, दन्ताः)

(घ) कादयो मावसानाः ......................... । (स्वराः, स्पर्शाः)

(ङ) 'सुप्तिङन्तं पदम्' इति सूत्रेण ................. विधीयते । (इत्संज्ञा, पदसंज्ञा)

(च) संयोगसंज्ञाविधायकं सूत्रं .............................. वर्तते । (परः सन्निकर्षः संहिता, हलोऽनन्तराः संयोगः)

(ज) .................. विवाराः श्वासा अघोषाश्च । (खरः, हशः)

**२. अधस्तनवर्णानां स्थानानि लिखत**

क, फ, झ, म, छ, ढ, य, ष, उ

**३. अधस्तनवर्णानामाभ्यन्तरप्रयत्नं लिखत**

ग, प, र, स, उ, ल, ह, ऋ, अ

**४. अधस्तनवर्णानां बाह्यप्रयत्नान् निर्दिशत**

प, उ, ग, भ, ख, स, झ, त, आ, द, ल, ह

**५. समीचीनासमीचीनं समुचितचिह्नाभ्यां निर्दिशत**

(क) गकारस्य कण्ठस्थानं वर्तते ।

(ख) एदैतोः कण्ठोष्ठम् ।

(ग) अनुस्वारस्य नासिकास्थानं भवति ।

(घ) यण्-प्रत्याहारान्तर्गतवर्णानाम् ईषत्स्पृष्ट-प्रयत्नो भवति ।

(ङ) कु, चु, टु, तु, पु एते उदितः सन्ति ।

**६. अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) सवर्णसंज्ञाविधायकस्य सूत्रस्य अर्थं निरूपयत ।

(ख) आभ्यन्तरप्रयत्नाः कति ? के च ते ?

(ग) बाह्यप्रयत्नानां नामानि लिखत ।

(घ) उदितः के ? तैः केषां बोधो भवति ?

(ङ) ऋ-लृवर्णयोः सवर्णिनः कति ?

अच्सन्धिप्रकरणे

# यणादिसन्धिः

### यणादेशविधायकं विधिसूत्रम्

**इको यणचि ६ ।१ ।७७ ॥**

**इकः स्थाने यण् स्यादचि संहितायां विषये । सुधी उपास्यः इति स्थिते ॥**

(इकः, यण्, अचि)

सरलार्थः- इ, उ, ऋ, लृ इति एतेषां वर्णानां स्थाने य्, व्, र्, ल् एते आदेशाः भवन्ति स्वरवर्णेषु परेषु सत्सु । 'सुधी उपास्यः' इति स्थिते धकारोत्तरवर्तिनः ईकारस्य अनेन सूत्रेण यण् भवति । ननु सकारोत्तरवर्तिनः उकारस्य, उपास्य-शब्दावयस्य उकारस्य च कुतो न यण् ? उभयत्रापि व्यवहिताच्परत्वसत्वाद् इति जिज्ञासायाम् आह-

### व्यवहिते अव्यवहिते च प्राप्ते अव्यवहिते एवेति पूर्वस्य परस्य च प्राप्तौ पूर्वस्यैवेति च नियामकं परिभाषासूत्रम्

**तस्मिन्निति निर्दिष्टे पूर्वस्य १ ।१ ।६६ ॥**

**सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् ॥**

(तस्मिन्, इति, निर्दिष्टे, पूर्वस्य)

सरलार्थः- सप्तम्यन्तस्य पदस्य निर्देशेन विधीयमानं कार्यम् अव्यवहितस्य पूर्वस्य स्थाने एव बोद्धव्यम्, न तु वर्णान्तरेण व्यवहितस्य स्थाने अपि । तेन 'सुधी उपास्यः' इत्यत्र धकारोत्तरवर्तिनः ईकारस्य स्थाने एव 'इको यणचि' इत्यनेन यणादेशः ।

### सदृशतमादेशनियामकं परिभाषासूत्रम्

**स्थानेऽन्तरतमः १ ।१ ।५० ॥**

**प्रसङ्गे सति सदृशतम आदेशः स्यात् । सुध्य् उपास्य इति जाते ॥**

(स्थाने, अन्तरतमः)

सरलार्थः- प्रसङ्गे सति = प्राप्ते सति, सदृशतमः अतिशयेन सदृशः आदेशो भवति । सादृश्यञ्च अत्र स्थानार्थगुणप्रमाणैः गृह्यते । तत्र स्थानं कण्ठताल्वादिः, अर्थः इत्यनेन शब्दस्य अर्थो ज्ञेयः, गुणो नाम आभ्यन्तरबाह्यप्रयत्नौ, प्रमाणम् इत्यनेन वर्णानां मात्राः ग्रहणीयाः । **यत्र अनेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं बलीयो** भवति । 'सुधी उपास्यः' इत्यत्र तालुस्थानतः आन्तर्याद् ईकारस्य स्थाने यकारे कृते 'सुध्य् उपास्य' इति जाते-

### द्वित्वविधायकं विधिसूत्रम्

**अनचि च ८ । ४ । ४७ ॥**

**अचः परस्य यरो द्वे वा स्तो न त्वचि । इति धकारस्य द्वित्वेन सुध्ध्य् उपास्य इति जाते ॥**

(अचः, यरः, च, वा, द्वे, संहितायाम्)

सरलार्थः- अच्-वर्णाद् उत्तरस्य यर्-वर्णस्य विभाषया द्वित्वं भवति, अच्-वर्णे परे तु न । अनेन सूत्रेण अवसाने परे अपि द्वित्वं भवति, 'अनचि' इत्यत्र प्रसज्यप्रतिषेधार्थकस्य नञः सत्त्वात् । अनेन सूत्रेण धकारस्य वैकल्पिके द्वित्वे 'सु ध् ध् य् उपास्यः' इति जाते-

### जश्त्वादेशविधायकं विधिसूत्रम्

**झलां जश् झशि ८ । ४ । ५३ ॥**

सरलार्थः- झल्-वर्णस्य स्थाने जश्-वर्णः आदेशो भवति, झश्-वर्णे परे सति । इति पूर्वधकारस्य जश्त्वे, स्थानकृतेन आन्तर्येण दकारे 'सु द् ध् य् उपास्यः' इति जाते-

### संयोगान्तलोपविधायकं विधिसूत्रम्

**संयोगान्तस्य लोपः ८ । २ । २३ ॥**

**संयोगान्तं यत्पदं तस्य लोपः स्यात् ॥**

(संयोगान्तस्य, पदस्य, लोपः)

सरलार्थः- यस्य अन्ते संयोगो भवति, तादृशस्य पदस्य लोपो भवति । 'सु द् ध् य् उपास्यः' इत्यत्र 'द्ध्य्' इति पदान्त-संयोगः, एतेन सहितस्य 'सुद्ध्य्' इत्यस्य लोपे प्राप्ते-

### अन्त्यादेशनियामकं परिभाषासूत्रम्

**अलोऽन्त्यस्य १ । १ । ५२ ॥**

**षष्ठीनिर्दिष्टोऽन्त्यस्याल आदेशः स्यात् । इति यलोपे प्राप्ते-**

(षष्ठी, स्थाने, अन्त्यस्य, अलः)

**सरलार्थः**- स्थानषष्ठयन्तं पदमुच्चार्य विहितः आदेशः अन्त्यस्य वर्णस्य स्थाने भवति ।

'संयोगान्तस्य लोपः' इति सूत्रे स्थानषष्ठयन्तं 'संयोगान्तस्य' इति पदम्, तेन निर्दिष्टः आदेशः संयोगान्तपदस्य लोपादेशः, स च अन्त्यस्य यकारमात्रस्य भवति । अनेन यकारस्य लोपे प्राप्ते-

### यणः लोपनिषेधकं वार्तिकम्

**यणः प्रतिषेधो वाच्यः (वा.२) । सुद्धद्युपास्यः । मद्धवरिः । धात्त्रंशः । लाकृतिः ॥**

**सरलार्थः**- संयोगान्तस्य यण्वर्णस्य लोपो न भवति ।

इति यकारलोपस्य निषेधे 'सुद्ध्य् उपास्यः' इत्यवस्थायां वर्णसम्मेलने सति 'सुद्ध्युपास्यः' इति रूपं सिद्धयति । धकारस्य द्वित्वाभावपक्षे 'सुध्य् उपास्यः' इत्यवस्थायामपि अनेन संयोगान्त-लोपनिषेधे, वर्णयोगे 'सुध्युपास्यः' इति च सिद्धयति । 'मधु+अरिः' इत्यत्र उकारस्य यणादेशे वकारे 'मध्व् अरिः' इति जाते पूर्ववत् 'मद्ध्वरिः/मध्वरिः' इति । 'धातृ अंशः' इत्यत्र यणि ऋकारस्य स्थाने रेफादेशे 'धात्र् अंशः' इति जाते, तकारस्य वैकल्पिके द्वित्वे 'धात्त्रंशः' द्वित्वाभावे च 'धात्रंशः' इति रूपे । 'ऌ आकृतिः' इत्यत्र तु ऌकारस्य यणि लकारे 'ल् आकृतिः' इत्यवस्थायां वर्णयोगे 'लाकृतिः' इत्येव रूपम् ।

### अयाद्यादेशविधायकं विधिसूत्रम्

**एचोऽयवायावः ६ । १ । ७८ ॥**

**एचः स्थाने अय् अव् आय् आव् एते स्युरचि ॥**

(एचः, अय्-अव्-आय्-आवः, अचि)

**सरलार्थः**- ए, ओ, ऐ, औ इत्येतेषां वर्णानां स्थाने क्रमेण अय्, अव्, आय्, आव् एते आदेशाः भवन्ति । तथा हि-

### यथासङ्ख्यनियामकं परिभाषासूत्रम्

**यथासङ्ख्यमनुदेशः समानाम् १ । ३ । १० ॥**

**समसम्बन्धी विधिर्यथासङ्ख्यं स्यात् । हरये । विष्णवे । नायकः । पावकः ॥**

(समानाम्, अनुदेशः, यथासङ्ख्यम्)

सरलार्थः- यत्र स्थानिनः आदेशाः निमित्ताश्च वा समसङ्ख्यकाः भवन्ति, तत्र क्रमेण कर्तव्यम् । 'एचोऽयवायावः' इति सूत्रे स्थानिनः ए, ओ, ऐ, औ, आदेशाः अय्, अव्, आय्, आव् एते च समसङ्ख्यकाः सन्ति, अतः अत्र यथासङ्ख्यमादेशाः स्युः ।

'हरे ए' इति स्थितौ 'एचोऽयवायावः' इति सूत्रेण एकारस्य स्थाने अयादेशे 'हर् अय् ए' इति जाते, वर्णसम्मेलने 'हरये' इति रूपं निष्पन्नम् ।

एवंक्रमेण ओकारस्य स्थाने अवादेशे 'विष्णवे', ऐकारस्य स्थाने आयादेशे 'नायकः', औकारस्य स्थाने आवादेशे च 'पावकः' इति रूपाणि निष्पद्यन्ते । 'विष्णो ए' = विष्णवे = नारायणाय; 'नै अकः' = नायकः = नेता; 'पौ अकः' = पावकः = अग्निः चेत्यर्थः ।

## अव्-आवादेशविधायकं विधिसूत्रम्

**वान्तो यि प्रत्यये ६ ।१ ।७९ ॥**

**यकारादौ प्रत्यये परे ओदौतोः अव् आव् एतौ स्तः । गव्यम् । नाव्यम् ।**

(एचः, यि, प्रत्यये, वान्तः, संहितायाम्)

सरलार्थः- यकारः आदौ यस्य, तादृशे प्रत्यये परे ओकार-औकारयोः स्थाने क्रमेण अव् आव्, एतौ आदेशौ भवतः ।

गोर्विकारः इत्यर्थे यत्-प्रत्यये 'गो य' इति स्थिते अनेन ओकारस्य स्थाने अवादेशः । 'नावा तार्यम्' इति विग्रहे नौशब्दात् यत्-प्रत्यये 'नौ य' इति स्थिते अनेन औकारस्य स्थाने आवादेशः ।

## अवादेशविधायकं वार्तिकम्

**अध्वपरिमाणे च (वा३) गव्यूतिः ॥**

सरलार्थः- मार्गस्य परिमाणे अर्थे द्योत्ये गोशब्दस्य स्थाने अवादेशो भवति, यूति-शब्दे परे । 'गो यूतिः' = गव्यूतिः नाम कोशद्वयपरिमाणयुतो मार्गः ।

### प्रयोगसिद्धिप्रकारः

**सुद्ध्युपास्यः/सुध्युपास्यः**

'सुधी उपास्यः' इति स्थितौ 'परः सन्निकर्षः संहिता' इति सूत्रेण संहितासंज्ञायाम्, 'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'स्थानेऽन्तरतमः' इति सूत्रद्वयसहकारेण 'इको यणचि' इति

सूत्रेण यणि ईकारस्य स्थाने यकारादेशे, **'सुध्य् उपास्यः'** इति जाते, **'अनचि च'** इति सूत्रेण धकारस्य विभाषया द्वित्वे **'सुध्ध्य् उपास्य'** इति जाते, **'झलां जश् झशि'** इति सूत्रेण जश्त्वे पूर्वधकारस्य स्थाने दकारादेशे **'सुद्ध्य् उपास्यः'** इति जाते, **'अलोऽन्त्यस्य'** इति सूत्रसहकारेण **'संयोगान्तस्य लोपः'** इति सूत्रेण संयोगान्तस्य यकारस्य लोपे प्राप्ते, **'यणः प्रतिषेधो वाच्यः'** इति वार्तिकेन तन्निषेधे **'सुद्ध्य् उपास्यः'** इत्यवस्थायां वर्णसम्मेलने **'सुद्ध्युपास्यः'** इति, **'अनचि च'** इति द्वित्वाभावपक्षे एकधकारघटितं **'सुध्युपास्यः'** इति च रूपद्वयं सिद्धम् । सुद्ध्युपास्यः = सुधीभिः उपास्यः, भगवान् विष्णुः इत्यर्थः ।

## वाक्येषु प्रयोगानुशीलनम्

१. भक्ताः सुध्युपास्यं नारायणं प्रार्थयन्ते ।

२. हरये भक्तिः रोचते ।

३. वाल्मीकीयरामायणस्य नायकः रामः अस्ति ।

४. आयुर्वेदे गव्यम् अतीव महत्त्वं बिभर्ति ।

५. राधायाः सीतायाश्च ग्रामयोः मध्ये गव्यूतिः मार्गः वर्तते ।

## अभ्यासः

१. **रिक्तस्थानानि पूरयित्वा सन्धिप्रक्रियां प्रदर्शयत**

**(अ) यण्-सन्धिः**

| | | | | | |
|---|---|---|---|---|---|
| यथा- | 'इति अत्र' | 'इत् य् अत्र' | वर्णसम्मेलने | इत्यत्र | इकारस्य स्थाने यकारः । |
| (क) | ............ | ............. | वर्णसम्मेलने | प्रत्येकम् | ....................... |
| (ख) | ............ | ............. | वर्णसम्मेलने | पठत्वत्र | ....................... |
| (ग) | ............. | ............. | वर्णसम्मेलने | यद्यपि | ....................... |
| (घ) | ............ | ............. | वर्णसम्मेलने | अन्वयः | ....................... |
| (ङ) | 'गुरु आज्ञा' | ............. | वर्णसम्मेलने | ........ | ....................... |

(च) 'इति आह' ............ वर्णसम्मेलने ......... .......................

(छ) 'पितृ आ' ............ वर्णसम्मेलने ......... .......................

**(आ) अयादिसन्धिः**

यथा - 'कवे ए' 'कव् अय् ए' एकारस्य स्थाने अयादेशे वर्णसम्मेलने कवये ।

(क) ........... ............ ............................ वर्णसम्मेलने नयनम् ।

(ख) ........... ............ ............................ वर्णसम्मेलने जयः ।

(ग) ........... ............ ............................ वर्णसम्मेलने पवनः ।

(घ) 'भानो ए' ............ ............................. वर्णसम्मेलने ......... ।

(ङ) 'भो अनम्' ............ ............................. वर्णसम्मेलने .......... ।

(च) 'गै अकः' ............ ............................. वर्णसम्मेलने ........... ।

(छ) 'पौ अकः' ............ ............................... वर्णसम्मेलने ........... ।

**३. युक्तकथनेषु (√) इति चिह्नम्, अयुक्तकथनेषु (×) इति चिह्नं योजयत**

(क) उकारस्य स्थाने यणादेशे सति वकारादेशो भवति ।

(ख) 'संयोगान्तस्य लोपः' इति सूत्रं लोपसंज्ञां करोति ।

(ग) अचि परे एकारस्य आय् आदेशो भवति ।

(घ) 'अनचि च' इति यरः द्वित्वं करोति ।

(ङ) 'गो यम्' इत्यत्र 'एचोऽयवायावः' इति सूत्रेण अवादेशो भवति ।

**४. यण्सन्धियुतानि पञ्च पदानि अन्विष्य पञ्च वाक्यानि रचयत ।**

**५. 'अलोऽन्त्यस्य' इति सूत्रस्य नेपालिभाषायामर्थं लिखत ।**

**६. 'एचोऽयवायावः' इति सूत्रस्य अर्थं प्रकाशयत ।**

**७. अधस्तनप्रयोगाणां ससूत्रं सिद्धिप्रक्रियां दर्शयत**

मध्वरिः, धात्रंशः, लाकृतिः, विष्णवे, नायकः, पावकः, नाव्यम् ।

चतुर्थः पाठः

अच्सन्धिप्रकरणे

# गुणसन्धिः

## गुणसंज्ञाविधायकं सूत्रम्

**अदेङ् गुणः १ ।१ ।२ ॥**

**अत् एङ् च गुणसंज्ञः स्यात् ॥**

(अत्, एङ्, गुणः)

सरलार्थः- अ, ए, ओ एते वर्णाः गुणसंज्ञकाः भवन्ति ।

## नियमसूत्रम्

**तपरस्तत्कालस्य १ ।१ ।७० ॥**

**तः परो यस्मात्स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात् ॥**

(तपरः, तत्कालस्य, सवर्णस्य, स्वम्, रूपम्)

सरलार्थः- तकारपरकाः वर्णाः, तकारात्पराश्च वर्णाः समकालसवर्णानामेव बोधका भवन्ति । अत एव 'अदेङ् गुणः' इति सूत्रे अत् इत्यनेन षण्णाम् ह्रस्वाकाराणामेव बोधो भवति, अकारस्य दीर्घ-प्लुतभेदानां बोधो न भवति । एवमेव तकारात् परेण एङ् इत्यनेन दीर्घयोः एकार-ओकारयोः एव बोधो भवति ।

## गुणादेशविधायकं विधिसूत्रम्

**आद् गुणः ६ ।१ ।८७ ॥**

**अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् । उपेन्द्रः । गङ्गोदकम् ॥**

(आद्, अचि, पूर्वपरयोः, एकः, गुणः)

सरलार्थः- अवर्णाद् अच्-वर्णे परे पूर्वपरयोः स्थाने गुणः एकादेशो भवति ।

'उप इन्द्रः' इति स्थितौ संहितासंज्ञायाम्, 'अदेङ् गुणः', 'स्थानेऽन्तरतमः' इति सूत्रद्वयसहकारेण 'आद् गुणः' इति सूत्रेण गुणे, पूर्वपरयोः स्थाने एकार एकादेशे 'उप् एन्द्रः' इति जाते वर्णसम्मेलने 'उपेन्द्रः' इति रूपं सिद्धम् । उपेन्द्रः = विष्णुः इत्यर्थः । 'गङ्गा उदकम्' इत्यत्र अनेन सूत्रेण आकर-उकारयोः स्थाने ओकाररूपे गुणे 'गङ्गोदकम्' इति ।

## इत्संज्ञाविधायकं संज्ञासूत्रम्

**उपदेशेऽजनुनासिक इत् १ । ३ । २ ॥**

**उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ॥**

(उपदेशे, अनुनासिकः, अच्, इत्)

सरलार्थः- उपदेशे स्थितः अनुनासिकः अच् इत्संज्ञको भवतीति सूत्रार्थः । 'लण्' इति माहेश्वरसूत्रस्थस्य अकारस्य अनेन सूत्रेण इत्संज्ञायाम्, 'आदिरन्त्येन सहेता' इति सूत्रेण अन्त्येन इत्संज्ञकेन लण्सूत्रस्थेन अकारेण सह उच्चार्यमाणः हयवरट्-सूत्रस्थः रेफः अर्थात् 'र' अयं मध्यवर्तिनो लकारस्य आदिवर्णस्य रेफस्य च बोधको भवति । तेन रप्रत्यहारः सिद्धः ।

## रपरविधायकं सूत्रम्

**उरण् रपरः १ । १ । ५१ ॥**

**ऋ इति त्रिंशतः संज्ञेत्युक्तम् । तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते । कृष्णर्द्धिः । तवल्कारः ॥**

(उः, अण्, रपरः)

सरलार्थः- ऋकारस्य ऌकारस्य च स्थाने विधीयमानोऽण् रपरो भूत्वा प्रवर्तते । अत्र 'र' इति प्रत्याहारः, तेन रवर्णेन र्, ल् इत्यनयोः बोधो भवति ।

'कृष्ण ऋद्धिः' इति स्थितौ संहितासंज्ञायाम्, 'आद्गुणः' इति सूत्रेण गुणे, पूर्वपरयोः स्थाने अकारे, 'उरण् रपरः' इति सूत्रेण तस्य अकारस्य रपरत्वे कृते 'कृष्ण् अर् द्धिः' इति जाते वर्णसम्मेलने 'कृष्णर्द्धिः' इति रूपं सिद्धम् । कृष्णर्द्धिः = कृष्णस्य समृद्धिः ।

'तव ऌकारः' इत्यवस्थायां पूर्वपरयोः अकारगुणे, लपरत्वे 'तव् अल् कारः' इति जाते, वर्णयोगे 'तवल्कारः' इति ।

## विभाषया यवयोर्लोपविधायकं विधिसूत्रम्

**लोपः शाकल्यस्य ८ । ३ । १९ ॥**

**अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाऽशि परे ॥**

(अपूर्वस्य, व्योः, पदस्य, शाकल्यस्य, लोपः, अशि)

सरलार्थः- अवर्णात् परयोः पदान्तयोः यकार-वकारयोः विकल्पेन लोपो भवति, अश्- वर्णे परे सति ।

'हरे इह' इति स्थिते 'एचोऽयवायावः' इत्यनेन एकारस्य अयादेशे 'हर् अय् इह' इति जाते, अनेन सूत्रेण विकल्पेन यलोपे, वर्णयोगे, 'हर इह' इत्यवस्थायाम् 'आद् गुणः' इति गुणे प्राप्ते-

## सूत्राणां सिद्धासिद्धत्वव्यवस्थाविधायकम् अधिकारसूत्रम्

**पूर्वत्रासिद्धम् ८ । २ । १ ॥**

**सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् । हर इह, हरयिह । विष्ण इह, विष्णविह ॥**

(पूर्वत्र, असिद्धम्)

सरलार्थः- सपादसप्ताध्यायीस्थानि सूत्राणि प्रति त्रिपादीस्थसूत्राणि असिद्धानि भवन्ति । त्रिपादीस्थसूत्रेषु च पूर्वं प्रति परं सूत्रम् असिद्धं भवति । आदितः अष्टमाध्यायस्य प्रथम-पादपर्यन्तं सङ्गृहीतानि सूत्राणि सपादीसूत्राणि, अन्त्येषु त्रिषु पादेषु (अष्टमाध्यायस्य द्वितीय-तृतीय-चतुर्थपादेषु) स्थितानि च त्रिपादी-सूत्राणि सन्ति ।

**प्रयोगसिद्धिप्रकारः**

**हर इह, हरयिह**

'हरे इह' इति स्थितौ 'एचोऽयवायावः' इति सूत्रेण एकारस्य स्थाने अयादेशे 'हर् अय् इह' इति जाते वर्णसम्मेलने 'हरय् इह' इति जाते 'लोपः शाकल्यस्य' इति सूत्रेण विकल्पेन यकारस्य लोपे 'हर इह' इत्यवस्थायाम् 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते 'पूर्वत्रासिद्धम्' इति सूत्रेण 'लोपः शाकल्यस्य' इति सूत्रेण विहितस्य यकारलोपस्य 'आद् गुणः' इति सूत्रं प्रति असिद्धत्वाद् गुणाऽभावे 'हर इह' इति रूपं सिद्धम् । यकारस्य लोपाऽभावे 'हरय् इह' इति स्थिते वर्णसम्मेलने 'हरयिह' इति च रूपं सिद्धम् । अस्य च 'हे विष्णो ! अत्र' इत्यर्थः ।

**एकादेशगुणसन्धि-प्रक्रिया**

| | | |
|---|---|---|
| अ/आ + इ/ई | = | ए (रमा + ईशः = रमेशः) |
| अ/आ + उ/ऊ | = | ओ (प्रश्न + उत्तरम् = प्रश्नोत्तरम्) |
| अ/आ + ऋ/ॠ | = | अर् (देव + ऋषिः = देवर्षिः) |
| अ/आ + ऌ | = | अल् (तव + ऌकारः = तवल्कारः) |

## अभ्यासः

१. **कोष्ठकात् समुचितानि पदानि आदाय रिक्तस्थानानि पूरयत**

**(उरण् रपरः, अचि, गुणसंज्ञकाः, त्रिपादी, लोपः शाकल्यस्य, रेफः, ओकारः)**

(क) अ ए ओ इति .................... वर्णाः सन्ति ।

(ख) अवर्णाद् ......................... परे पूर्वपरयोः गुण आदेशः स्यात् ।

(ग) रपरविधायकं सूत्रम् .................................... अस्ति ।

(घ) सपादसप्ताध्यायीं प्रति............................... असिद्धा ।

(ङ) लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो ........... रलयोः संज्ञा ।

(च) विभाषया यवयोर्लोपविधायकं सूत्रं............................. अस्ति ।

(छ) अकार-उकारयोः स्थाने गुणे सति ................................ भवति ।

२. **सन्धिं सन्धिविच्छेदं वा कुरुत**

उमा + ईशः = ................ पर + उपकारः = ................

माता + इव = ................ वसन्त + ऋतुः = ................

वर्षर्तुः = ........... + .......... तथोक्तम् = .......... + ..........

सर्वेश्वरः = ........... + .......... तस्योपरि = ........... + ..........

३. **अधो लिखितप्रश्नानाम् उत्तराणि लिखत**

(क) 'आद् गुणः' इति सूत्रं किं करोति ?

(ख) 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' इत्यस्य आशयः कः?

(ग) 'उपदेशेऽ.............' इति सूत्रं पूरयत ।

(घ) 'पूर्वत्रासिद्धम्' इति सूत्रस्य अर्थं लिखत ।

(ङ) 'अत्' इत्यनेन किं ज्ञायते ?

**४. अधो निर्दिष्टशब्दानां सिद्धरूपाणि लिखित्वा वाक्यानि रचयत**

यथा- जन्म + उत्सवः = जन्मोत्सवः    अद्य मम जन्मोत्सवः वर्तते ।

महा + ईशः = ............................    पर + उपकारः = ..............................

महा + ऋषिः = ...........................    हित + उपदेशः = ..............................

उप + इन्द्रः = .............................    ग्रीष्म + ऋतुः = ...............................

**५. ससूत्रं सिद्धिप्रकारं दर्शयत**

गङ्गोदकम्, तवल्कारः, विष्ण इह/विष्णविह

**६. गुणसन्धियुतानि पञ्च पदानि अन्विष्य तद्‌युक्तानि पञ्च वाक्यानि लिखत**

(क) दैत्याः उपेन्द्राद् बिभ्यति ।

(ख) .......................................................

(ग) .......................................................

(घ) .......................................................

(ङ) .......................................................

(च) .......................................................

पञ्चमः पाठः

अच्सन्धिप्रकरणे

# वृद्धिसन्धिः

## वृद्धिसंज्ञाविधायकं सूत्रम्

**वृद्धिरादैच् १ ।१ ।१ ॥**

**आदैच्च वृद्धिसंज्ञः स्यात् ॥**

(वृद्धिः, आत्, ऐच्)

सरलार्थः- आ, ऐ, औ एते वर्णाः वृद्धिसंज्ञकाः भवन्ति ।

## वृद्धिविधायकं विधिसूत्रम्

**वृद्धिरेचि ६ ।१ ।८८ ॥**

**आदेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् । कृष्णौत्कण्ठचम् ॥**

(आद्, एचि, पूर्वपरयोः, एकः, वृद्धिः)

सरलार्थः- अवर्णाद् एच्-वर्णे परे पूर्वपरयोः स्थाने वृद्धिसंज्ञकः एकादेशो भवति । अयं विधिः गुणस्य अपवादो वर्तते । आन्तरतम्याद् एकार-ऐकारयोः ऐकारः, ओकार-औकारयोः औकारः ।

'कृष्ण एकत्वम्' इति स्थिते संहितासंज्ञायाम् 'आद्गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'वृद्धिरादैच्', 'स्थानेऽन्तरतमः' इति सूत्रद्वयसहकारेण 'वृद्धिरेचि' इति सूत्रेण पूर्वपरयोः स्थाने वृद्धिसंज्ञके ऐकारादेशे 'कृष्ण् ऐकत्वम्', वर्णसम्मेलने 'कृष्णैकत्वम्' इति रूपं सिद्धम् । एवमेव- 'देव ऐश्वर्यम्' - देव् ऐ श्वर्यम् - देवैश्वर्यम् । 'गङ्गा ओघः' इत्यत्र आकर-ओकारयोः स्थाने औकारवृद्धिः, तेन 'गङ्गौघः' इति रूपम् । 'कृष्ण औत्कण्ठचम्' - कृष्ण् औ त्कण्ठचम् - कृष्णौत्कण्ठचम् ।

## वृद्धिविधायकं विधिसूत्रम्

**एत्येधत्यूठ्सु ६ ।१ ।८९ ॥**

**अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् । उपैति । उपैधते । प्रष्ठौहः । एजाद्योः**

**किम् ? उपेतः । मा भवान्प्रेदिधत् ।**

(आद्, एचि, एति-एधति-ऊठ्सु, पूर्वपरयोः, एकः, वृद्धिः)

सरलार्थः- अवर्णाद् एच्वर्णः आदौ यस्य तादृशे इण्-धातौ परे, एजादौ एध्-धातौ च परे, ऊठ्-शब्दे च परे सति पूर्वपरयोः स्थाने वृद्धिः एकादेशो भवति ।

'उप एति' इति स्थिते, गुणं बाधित्वा 'वृद्धिरेचि' इति वृद्धौ प्राप्तायाम्, तामपि प्रबाध्य 'एङि पररूपम्' इति सूत्रेण पररूपे प्राप्ते तत् च प्रबाध्य अनेन सूत्रेण पूर्वपरयोः स्थाने वृद्धिसंज्ञके एकादेशे, वर्णयोगे 'उपैति' इति रूपं सिद्धम् ।

एवंरीत्या 'उप एधते' = उपैधते, 'प्रष्ठ ऊहः' = प्रष्ठौहः इत्यादीनि उदाहरणानि साधनीयानि ।

एजाद्योः किम् ? एत्येधत्योः इत्यत्र एजाद्योः इति विशेषणाभावे 'उप इतः', मा भवान् 'प्र इदिधत्' इत्यत्रापि इण्धातोः एध्धातोश्च सत्त्वाद् वृद्धिः स्यात्, तन्माभूद् एतदर्थम् 'एजाद्योः' इति विशेषणमत्र प्रदत्तमस्ति ।

## वृद्धिविधायकं वार्तिकम्

**अक्षादूहिन्यामुपसङ्ख्यानम् (वा४) । अक्षौहिणी सेना ।**

सरलार्थः- अक्ष-शब्दाद् ऊहिनीशब्दे परे पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'अक्ष ऊहिनी' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'अक्षादूहिन्यामुपसङ्ख्यानम्' इति वार्तिकेन पूर्वपरयोः स्थाने वृद्धिसंज्ञके ओकार-एकादेशे, वर्णसम्मेलने 'अक्षौहिनी' इति जाते 'पूर्वपदात् संज्ञायामगः' इति नकारस्य णत्वे 'अक्षौहिणी' इति रूपं सिद्ध्यति ।

## वृद्धिविधायकं वार्तिकम्

**प्रादूहोढोढ्येषैष्येषु (वा५) । प्रौहः । प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः ।**

सरलार्थः- 'प्र' इति उपसर्गाद् ऊह, ऊढ, ऊढि, एष, एष्य एतेषु शब्देषु परेषु पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'प्र ऊहः' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन पूर्वपरयोः स्थाने औकारे वृद्धिसंज्ञके एकादेशे वर्णसम्मेलने 'प्रौहः' इति रूपं सिद्ध्यति । एवंरीत्या 'प्र ऊढः' = प्रौढः, 'प्र ऊढि' = प्रौढिः, 'प्र एषः' = प्रैषः, 'प्र एष्यः' = प्रैष्यः इति च रूपाणि सिद्ध्यन्ति ।

## वृद्धिविधायकं वार्तिकम्

**ऋते च तृतीयासमासे (वा६) सुखेन ऋतः सुखार्तः । तृतीयेति किम् ? परमर्तः ।**

सरलार्थः- अवर्णाद् 'ऋत' इति शब्दे परे पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'सुख ऋतः' इति स्थिते गुणं प्रबाध्य 'ऋते च तृतीयासमासे' इति वार्तिकेन पूर्वपरयोः अकार-ऋकारयोः स्थाने आकार एकादेशे 'उरण् रपरः' इति सूत्रेण रपरत्वे 'आर्' इति कृते वर्णसम्मेलने 'सुखार्तः' इति रूपं सिद्ध्यति ।

## वृद्ध्यादेशविधायकं वार्तिकम्

**प्रवत्सतरकम्बलवसनार्णदशानामृणे (वा७) । प्रार्णम्, वत्सतरार्णम्, इत्यादि ॥**

सरलार्थः- प्र, वत्सतर, कम्बल, वसन, ऋण इति एतेभ्यः शब्देभ्यः ऋणशब्दे परे पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'प्र ऋणम्' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'प्रवत्सतरकम्बल-वसनार्णदशानामृणे' इति वार्तिकेन पूर्वपरयोः अकार-ऋकारयोः स्थाने आकाररूपे वृद्धिसंज्ञके एकादेशे 'उरण् रपरः' इति सूत्रेण रपरत्वे 'आर्' इति च कृते वर्णसम्मेलने 'प्रार्णम्' इति रूपं सिद्ध्यति ॥

## उपसर्गसंज्ञाविधायकं सूत्रम्

**उपसर्गाः क्रियायोगे १ । ४ । ५९ ॥**

**प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप - एते प्रादयः ॥**

(प्रादयः, क्रियायोगे, उपसर्गाः)

सरलार्थः- क्रियायामन्विताः प्रादयः उपसर्गसंज्ञकाः भवन्ति ।

## धातु-संज्ञाविधायकं सूत्रम्

**भूवादयो धातवः १ । ३ । १ ॥**

**क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥**

(भूवादयः, धातवः)

सरलार्थः- क्रियावाचिनो भू, वा, गम् इत्यादयो धातुसंज्ञकाः भवन्ति ।

## वृद्ध्यादेशविधायकं विधिसूत्रम्

**उपसर्गादृति धातौ ६ । १ । ९१ ॥**

**अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । प्रार्च्छति ॥**

(आद्, उपसर्गाद्, ऋति, धातौ, पूर्वपरयोः, एकः, वृद्धिः)

सरलार्थः- अवर्णान्ताद् उपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति ।

'प्र ऋच्छति' - प्र् आर् ऋच्छति - प्रार्च्छति ।

**प्रयोगसिद्धिप्रकारः**

**प्रार्च्छति**

'प्र ऋच्छति' इति स्थिते, 'प्र' इत्यस्य 'उपसर्गाः क्रियायोगे' इति उपसर्गसंज्ञायाम्, 'ऋच्छति' इत्यस्य 'भूवादयो धातवः' इति धातुसंज्ञायाम्, 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'उपसर्गादृति धातौ' इति सूत्रेण वृद्धौ 'उरण् रपरः' इति रपरत्वे, पूर्वपरयोः स्थाने 'आर्' इत्येकादेशे, 'प्र् आर् च्छति' इति जाते, वर्णसम्मेलने 'प्रार्च्छति' इति रूपं सिद्धम् ।

**एकादेश-वृद्धिसन्धि-प्रक्रिया**

प्रायशः -

| | | |
|---|---|---|
| अ/आ + ए/ऐ | = | ऐ (तव + एव = तवैव) |
| अ/आ + ओ/औ | = | औ (मम + औत्सुक्यम् = ममौत्सुक्यम्) |

कदाचित् -

| | | |
|---|---|---|
| अ/आ + इ/ई | = | ऐ (स्व + ईरम् = स्वैरम्) |
| अ/आ + उ/ऊ | = | औ (प्र + ऊढिः = प्रौढिः) |
| अ/आ + ऋ/ॠ | = | आर् (उप + ऋच्छति = उपार्च्छति) |

**वाक्येषु प्रयोगानुशीलनम्**

१. देवैश्वर्यं जगति व्याप्तमस्ति ।

२. हरिद्वारे रमेशः गङ्गौघम् आश्चर्येण पश्यति ।

३. रामः ग्रामम् उपैति ।

४. महाभारतयुद्धे दुर्योधनस्य पार्श्वे अक्षौहिणी सेना आसीत् ।

५. ऋणार्णं धनं स्वस्य पार्श्वे अधिककालं यावद् न स्थापनीयम् ।

## अभ्यासः

१. **कोष्ठकाद् उपयुक्तानि पदानि चित्वा रिक्तस्थानानि पूरयत**

(क) आ, ऐ, औ इति ..... वर्णाः सन्ति । (वृद्धिसंज्ञकाः, गुणसंज्ञकाः)

(ख) ...... इति सूत्रं वृद्धिसंज्ञां करोति । (वृद्धिरादैच्, वृद्धिरेचि)

(ग) ..... उपसर्गसंज्ञाविधायकं सूत्रं वर्तते । (उपसर्गाः क्रियायोगे, उपसर्गादृति धातौ)

(घ) वृद्धिसन्धिः ....... अपवादो वर्तते । (यण्सन्धेः, गुणसन्धेः)

२. **समीचीनम् असमीचीनं वा निर्दिशत**

(क) 'वृद्धिरेचि' इति सूत्रेण वृद्ध्यादेशो भवति ।

(ख) क्रियायोगे सत्येव प्रादयः उपसर्गाः सन्ति ।

(ग) प्रादिगणपठितः 'सु' इति उपसर्गो नास्ति ।

(घ) 'भूवादयो धातवः' इति धातुसंज्ञां करोति ।

(ङ) 'उप एधते' इत्यत्र पररूपं बाधित्वा वृद्धिः भवति ।

४. **अधो निर्दिष्टपदानां सिद्धरूपाणि विलिख्य वाक्यानि रचयत**

तण्डुल + ओदनम् = ..................... सा + एषा =...............................

राष्ट्र + एकता = ...................... देव + ऐश्वर्यम् = .......................

प्र + ऋच्छति = .......................... कृष्णा + औत्कण्ठ्यम् = ................

५. **सन्धिविच्छेदं कुरुत**

तवैव = ........... + .......... तवौदार्यम् = ........... + ..........

वनौषधम् = ........... + .......... जनैकता = ........... + ..........

मतैक्यम् = ........... + .......... मैवम् = ........... + ..........

६. **अधस्तनानां प्रयोगाणां सिद्धिपथं दर्शयत**

गङ्गौघः, देवैश्वर्यम्, उपैधते, प्रष्ठौहः ऋणार्णम्

७. **उपसर्गाः कति ? के च ते ?**

अच्सन्धिप्रकरणे

# परररूप-दीर्घ-पूर्वरूप-प्रकृतिभाव-अवङ्सन्धिः

**एङि पररूपम् ६ । १ । ९४ ॥**

**आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ॥**

(आद्, उपसर्गाद्, एङि, धातौ, पूर्वपरयोः, एकः, पररूपम्)

सरलार्थः- अवर्णान्तादुपसर्गाद् एङादौ धातौ परे पूर्वपरयोः स्थाने पररूपम् एकादेशः भवति । पररूपम् एकादेशो नाम पूर्वपरयोः स्थाने परस्य रूपं भवति इत्यर्थः ।

'प्र एजते' इत्यत्र अवर्णान्तोपसर्गः 'प्र' इति, तस्माद् 'एजते' इति एङादौ धातौ परे गुणवृद्धी बाधित्वा अनेन सूत्रेण पूर्वपरयोः स्थाने पररूपे, एकार-एकादेशे 'प्रेजते' इति रूपं सिद्ध्यति । 'उप ओषति' - उप् ओषति - उपोषति ।

## टि-संज्ञाविधायकं सूत्रम्

**अचोऽन्त्यादि टि १ । १ । ६४ ॥**

**अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् ।**

(अचः, अन्त्यादि, टि)

सरलार्थः- शब्देषु स्थितेषु अच्-वर्णेषु यः अन्त्यः अच्-वर्णः, सः अन्त्यः अच् आदिः यस्य तादृशः यः शब्दसमुदायः, तस्य टि-संज्ञा भवति ।

'मनस्' इति शब्दे अन्त्यः अच् नकारोत्तरवर्ती अकारः, अयं च अकारः सकारस्य आदौ वर्तते, अतः अत्र 'अस्' इति अन्त्यादिसमुदायः 'टि' उच्यते । यदि अन्त्याद् अचः परं किमपि नास्ति चेद् व्यपदेशिवद्भावेन तस्यैव टि-संज्ञा भवति । यथा- 'शक अन्धुः' इत्यत्र 'शक' शब्दस्य अन्त्यः अकारः टि ।

## पररूपविधायकं वार्तिकम्

**शकन्ध्वादिषु पररूपं वाच्यम् (वा.८) । तच्च टेः । शकन्धुः । कर्कन्धुः मनीषा । आकृतिगणोऽयम् । मार्त्तण्डः ॥**

सरलार्थः- शकन्ध्वादि-गणपठितानां शब्दानां सिद्धिविषये पररूपमेकादेशो भवति । तत् च पररूपं टि-भागस्य भवति ।

'शक अन्धुः' इत्यत्र 'शक' शब्दस्य अन्त्यस्य अकारस्य 'अचोऽन्त्यादि टि' इति टिसंज्ञायाम्, अनेन वार्तिकेन तस्यैव पररूपे 'शक् अन्धुः' इत्यत्र वर्णयोगे 'शकन्धुः' इति । एवंरीत्या 'मनस्' इत्यस्य अस्-भागस्य टिसंज्ञायां तस्यैव पररूपे 'मन् ईषा' इति जाते वर्णयोगे 'मनीषा' इति । एवं 'कर्क अन्धुः' = कर्कन्धुः, 'मार्त्त अण्डः' = मार्त्तण्डः इति ।

## पररूपादेशविधायकं विधिसूत्रम्

**ओमाङोश्च ६ । १ । ९५ ॥**

**ओमि आङि चात्परे पररूपमेकादेशः स्यात् । शिवायों नमः । शिव एहि ॥**

(आद्, ओम्-आङोः, च, पूर्वपरयोः, एकः, पररूपम्)

सरलार्थः- आद् = अवर्णाद् ओम्-शब्दे, आङ्-शब्दे च परे पूर्वपरयोः स्थाने पररूपम् एकादेशो भवति ।

'शिवाय ओं नमः' इति स्थिते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ प्राप्तायां तां प्रबाध्य अनेन सूत्रेण पूर्वपरयोः स्थाने पररूपैकादेशे ओकारे जाते, वर्णसम्मेलने 'शिवायों नमः' इति रूपं सिद्ध्यति । आङि परे 'शिव आ इहि' इत्यवस्थायां 'धातूपसर्गयोः कार्यम् अन्तरङ्गम् अन्यत् कार्यं बहिरङ्गम्, असिद्धं बहिरङ्गम् अन्तरङ्गे' इति परिभाषासहकारेण पूर्वम् 'आ इहि' इत्यत्र गुणे कृते 'शिव एहि' इति जाते-

## अतिदेशसूत्रम्

**अन्तादिवच्च ६ । १ । ८५ ॥**

**योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत् । शिवेहि ॥**

(पूर्वपरयोः, एकः, अन्तादिवत्, च)

सरलार्थः- पूर्वपरयोः स्थाने विहितः एकादेशः पूर्वस्थानिघटितसमुदायस्य अन्त्यवत्, परस्थानिघटितसमुदायस्य आदिवच्च भवति ।

'शिव एहि' इत्यत्र पूर्वपरयोः स्थाने विहितः एकादेशः 'ए' इति तस्य पूर्वस्थानी 'आ' इति, तद्घटितः समुदायोऽपि 'आ' एव तद्वत् भवति । तथा च एकारस्य आङ्त्वात् तस्मिन् परे

'ओमाङोश्च' इति सूत्रेण पररूपे वर्णयोगे 'शिवेहि' इति सिद्ध्यति ।

### सवर्णदीर्घविधायकं विधिसूत्रम्

**अकः सवर्णे दीर्घः ६ ।१ ।१०१ ॥**

**अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः । होतॄकारः ॥**

(अकः, सवर्णे, अचि, पूर्वपरयोः, एकः, दीर्घः)

सरलार्थः- अक्-वर्णेभ्यः सवर्णे अच्-वर्णे परे सति पूर्वरयोः स्थाने दीर्घः एकादेशो भवति ।

'दैत्य अरिः' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते, तं बाधित्वा अनेन सूत्रेण पूर्वपरयोः स्थाने दीर्घ-एकादेशे, आन्तरतम्याद् आकारे, वर्णसम्मेलने 'दैत्यारिः' इति रूपं सिद्ध्यति । एवंरीत्या 'श्री ईशः' = श्रीशः, 'विष्णु उदयः' = विष्णूदयः, 'होतृ ऋकारः' = होतॄकारः इति च रूपाणि सिद्ध्यन्ति ।

### पूर्वरूपादेशविधायकं विधिसूत्रम्

**एङः पदान्तादति ६ ।१ ।१०९ ॥**

**पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव ॥**

(पदान्ताद्, एङः, अति, पूर्वपरयोः, पूर्वः, एकः संहितायाम्)

सरलार्थः- पदान्ताद् एङ्वर्णाद् ह्रस्वाकारे परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति ।

'हरे अव' इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारस्य स्थाने अयादेशे प्राप्ते तं प्रबाध्य अनेन सूत्रेण पूर्वपरयोः पूर्वरूपैकादेशे एकारे, वर्णसम्मेलने 'हरेव' इति जाते चम्पकपुष्पकन्यायेन खण्डाकारे 'हरेऽव' इति रूपं सिद्ध्यति । सुगन्धयुतं पुष्पं जले निपात्य पुनः तस्य बहिरानयने यथा जले गन्धः तिष्ठति तथैव अत्रापि अकारस्य पूर्वरूपे कृतेऽपि सः अकारः खण्डाकाररूपेण शब्देषु तिष्ठति इति चम्पकपुष्पकन्यायस्य आशयः । एवंरीत्या 'विष्णो अव' = विष्णोऽव इति च रूपं सिद्ध्यति ।

### विभाषया प्रकृतिभावविधायकं विधिसूत्रम्

**सर्वत्र विभाषा गोः ६ ।१ ।१२२ ॥**

**लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते । गोअग्रम्, गोऽग्रम् । एङन्तस्य किम् ? चित्रग्वग्रम् । पदान्ते किम् ? गोः ॥**

(सर्वत्र, पदान्तात्, एङः, गोः, अति, विभाषा, प्रकृत्या)

सरलार्थः- लौकिके प्रयोगे, वैदिके प्रयोगे च एङन्तस्य गोशब्दस्य विभाषया प्रकृतिभावो भवति, पदान्ते । स्वेन रूपेण अवस्थानं प्रकृतिभावः ।

'गो अग्रम्' अत्र 'एचोऽयवायावः' इति सूत्रेण अवादेशे प्राप्ते तं प्रबाध्य 'एङः पदान्तादति' इति सूत्रेण पूर्वरूपे प्राप्ते, तदपि प्रबाध्य अनेन सूत्रेण प्रकृतिभावे 'गो अग्रम्' इति रूपं सिद्ध्यति । प्रकृतिभावस्य अभावपक्षे पूर्वरूपे कृते- गोऽग्रम् ।

## सर्वादेशनियामकं परिभाषासूत्रम्

**अनेकाल्शित्सर्वस्य १ । १ । ५५ ॥**

**इति प्राप्ते ॥**

(अनेकाल्-शित्, सर्वस्य)

सरलार्थः- अनेकाल्-आदेशः, शिदादेशश्च यस्य स्थाने विहितौ, तस्य सर्वस्य स्थाने भवतः । एकश्चासौ अल् एकाल्, न एकाल् इति अनेकाल् । शकारः इत् यस्य सः शित् इति ।

## अन्त्यादेशनियामकं परिभाषासूत्रम्

**ङिच्च १ । १ । ५३ ॥**

**ङिदनेकालप्यन्त्यस्यैव स्यात् ॥**

(ङित्, च, अन्त्यस्य, अलः)

सरलार्थः- ङिदादेशः (ङकारः इत्संज्ञकः अस्ति यत्र, तादृशः आदेशः) यस्य स्थाने विधीयते, सः अनेकाल् सन्नपि अन्त्यस्य एव स्थाने भवति ।

## विभाषया अवङादेशविधायकं विधिसूत्रम्

**अवङ् स्फोटायनस्य ६ । १ । १२३ ॥**

**पदान्ते एङन्तस्य गोरवङ् वाऽचि । गवाग्रम्, गोऽग्रम् । पदान्ते किम् ? गवि ॥**

(पदान्ताद्, एङः, गोः, अवङ्, अचि, स्फोटायनस्य)

सरलार्थः- एङन्तस्य गोशब्दस्य स्थाने विभाषया 'अवङ्' आदेशो भवति, अचि परे, पदान्ते । अवङादेशस्य ङकारः इत्, तस्य लोपे 'अव' इति अवशिष्यते ।

'अनेकाल्शित्सर्वस्य' इति सूत्रेण अनेकाल्त्वात् सम्पूर्णस्य गोशब्दस्य स्थाने अवङादेशे प्राप्ते

तं प्रबाध्य अनेन सूत्रेण ङित्वाद् अन्त्यस्य ओकारस्य स्थाने अवङादेशः । 'गो अग्रम्' - ग् अव - अग्रम (अवङ् स्फोटायवस्य) - ग् अव् आ ग्रम् (अकः सवर्णे दीर्घः) - गवाग्रम् ।

### अवङादेशविधायकं विधिसूत्रम्

**इन्द्रे च ६ ।१ ।१२४ ॥**

**गोरवङ् स्यादिन्द्रे । गवेन्द्रः ॥**

(गोः, अवङ्, नित्यम्, इन्द्रे, च)

सरलार्थः- गोशब्दस्य स्थाने अवङादेशो भवति, इन्द्र-शब्दे परे ।

'गो इन्द्रः' - ग् अव इन्द्रः - ग् अव् एन्द्रः (आद् गुणः) - गवेन्द्रः ।

**प्रयोगसिद्धिप्रकारः**

**शिवेहि**

'शिव आ इहि' इति स्थिते 'शिव आ' इत्यत्र 'अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घे प्राप्ते 'आ इहि' इत्यत्र 'आद् गुणः' इति सूत्रेण गुणे च प्राप्ते 'धातूपसर्गयोः कार्यमन्तरङ्गम् अन्यत्कार्यं बहिरङ्गम्, असिद्धं बहिरङ्गम् अन्तरङ्गे' इत्यनया परिभाषया 'आ इहि' इत्यत्र गुणे 'शिव एहि' इति जाते 'अन्तादिवच्च' इति सूत्रसहकारेण 'ओमाङोश्च' इति सूत्रेण पररूपे, पूर्वपरयोः स्थाने एकारे, वर्णयोगे 'शिवेहि' इति रूपं सिद्ध्यति ।

**सवर्णदीर्घ-सन्धिप्रक्रिया-**

| | | |
|---|---|---|
| अ/आ + अ/आ | = | आ (विद्या + आलयः = विद्यालयः) |
| इ/ई + इ/ई | = | ई (रवि + इन्द्रः = रवीन्द्रः) |
| उ/ऊ + ऊ/ऊ | = | ऊ (बहु + उपयोगी = बहूपयोगी) |
| ऋ/ॠ/ऌ + ऋ/ॠ/ऌ | = | ॠ (होतृ + ऋकारः = होतॄकारः) |

### वाक्येषु प्रयोगानुशीलनम्

१. प्रद्युम्नः भरतपुरे प्रेजते ।

२. मम मनीषा मां बाधते ।

३. घनश्यामः प्रतिक्षणं 'शिवायों नमः' इति मन्त्रं जपति ।

४. दैत्यारिः विष्णुः प्रह्लादं ररक्ष ।

५. गोशालां गत्वा गवाग्रं पश्य ।

## अभ्यासः

१. **कोष्ठस्थम् उपयुक्तं पदं चित्वा रिक्तं स्थानं पूरयत**

अचोऽन्त्यादि टि, पररूपम्, अवर्णान्तादुपसर्गाद्, अवङादेशम्, अन्त्यस्य

(क) ................ एङादौ धातौ परे पररूपमेकादेशः ।

(ख) शकन्ध्वादिषु .................... वाच्यम् ।

(ग) .................. टिसंज्ञाविधायकं सूत्रं वर्तते ।

(घ) ङिदादेशः ......................... भवति ।

(ङ) 'इन्द्रे च' इति सूत्रम् ............. करोति ।

२. **'प्रकृतिभावः' इत्यस्य कोऽर्थः ?**

३. **दीर्घवर्णाः कति ? के च ते ?**

४. **सन्धिविच्छेदं प्रदर्श्य अधो लिखितैः शब्दैः वाक्यानि रचयत**

हिमालयः = ................. गुरूपदेशः = .........................

इतीदम् = ..................... श्रीशः = ..............................

५. **सन्धिं कुरुत**

प्रधान + अध्यापकः = ................... गुण + आदेशः = .............................

तथा + अपि = ................... क्षुधा + आतुरः = .............................

गिरि + ईशः = ................... सु + उक्तिः = .............................

६. **ससूत्रं सन्धिप्रक्रियां दर्शयत**

उपोषति, शकन्धुः, शिवायों नमः, विष्णूदयः, गवेन्द्रः, हरेऽव ।

७. **अधो निर्दिष्टसूत्राणाम् अर्थं लिखत**

(क) अचोऽन्त्यादि टि (ख) अन्तादिवच्च

(ग) अनेकाल् शित्सर्वस्य (घ) इन्द्रे च

अच्सन्धिप्रकरणे

# प्रकृतिभावसन्धिः

## प्लुतादेशविधायकं विधिसूत्रम्

**दूराद्धूते च ८ । २ । ८४ ॥**

**दूरात्सम्बोधने वाक्यस्य टेः, प्लुतो वा ॥**

(दूराद्, हूते, च वाक्यस्य, टेः, प्लुतो, वा, उदात्तः)

सरलार्थः- दूरात् सम्बोधने अर्थे प्रयुक्तं यद् वाक्यं तस्य टि-भागस्य विभाषया प्लुतः आदेशो भवति ।

## प्रकृतिभावविधायकं विधिसूत्रम्

**प्लुतप्रगृह्या अचि नित्यम् ६ । १ । १२५ ॥**

**एतेऽचि प्रकृत्या स्युः । आगच्छ कृष्ण३ अत्र गौश्चरति ॥**

(प्लुतप्रगृह्याः, अचि, नित्यम्, प्रकृत्या)

सरलार्थः- प्लुतसंज्ञकाः, प्रगृह्यसंज्ञकाश्च ये शब्दाः सन्ति तेषाम् अच्-वर्णे परे नित्यं प्रकृतिभावो भवति ।

'आगच्छ कृष्ण३ अत्र गौश्चरति' इत्यत्र 'अकः सवर्णे दीर्घः' इति सूत्रेण पूर्वपरयोः स्थाने सवर्णे दीर्घे प्राप्ते तं प्रबाध्य कृष्णशब्दस्य अन्त्यस्य अकारस्य टेः स्थाने 'दूराद्धूते च' इति सूत्रेण प्लुतादेशे 'आगच्छ कृष्ण३ अत्र गौश्चरति' इति जाते 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे 'आगच्छ कृष्ण३ अत्र गौश्चरति' इति रूपं सिद्धयम् ।

## प्रगृह्यसंज्ञाविधायकं सूत्रम्

**ईदूदेद्द्विवचनं प्रगृह्यम् १ । १ । ११ ॥**

**ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू ॥**

(ईत्-ऊत्-एत्-द्विवचनं प्रगृह्यम्)

सरलार्थः- ईकारान्तम्, ऊकारान्तम्, एकारान्तं च द्विवचनं प्रगृह्यसंज्ञकं भवति ।

'हरी एतौ' इत्यत्र ईकारान्तं द्विवचनं व्यवदेशिवद्भावेन ईकारः, तस्य च अनेन सूत्रेण प्रगृह्यसंज्ञायां 'इको यणचि' इति यणादेशे प्राप्ते 'प्लुतप्रगृह्या अचि नित्यम्' इत्यनेन प्रकृतिभावे 'हरी एतौ' इत्येव सन्धिरहितं सिद्धम् । एवंरीत्या 'विष्णू इमौ', 'गङ्गे अमू' इत्यत्रापि अनेनैव ऊकार-एकारयोः प्रगृह्यसंज्ञायां सन्धेरभावो बोध्यः ।

## प्रगृह्यसंज्ञाविधायकं सूत्रम्

**अदसो मात् १ ।१ ।१२ ॥**

**अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते । मात्किम् ? अमुकेऽत्र ॥**

(अदसः, मात्, ईदूदेत्, प्रगृह्यम्)

सरलार्थः- अदस्-शब्दस्य मकारात् परौ ईकार-ऊकारौ प्रगृह्यसंज्ञकौ स्तः ।

'अमी ईशाः' इत्यत्र अदस्शब्दस्य मकारात् परः ईकारः 'अमी' इत्यस्य ईकारः, तस्य अनेन प्रागृह्यसंज्ञायां प्रकृतिभावे सति प्राप्तः सवर्णदीर्घादेशो न भवति । एवम् 'रामकृष्णौ अमू आसाते' इत्यत्र 'एचोऽयवायावः' इत्यनेन औकारस्य आवादेशे 'रामकृष्णावमू आसाते' इत्यवस्थायाम् अनेन ऊकारस्य प्रगृह्यसंज्ञायां यणादेशाभावो ज्ञेयः ।

'अदसो मात्' इति सूत्रे 'मात्' इत्यस्य ग्रहणं न कृत्वा 'ईदुदेद्विवचनं प्रगृह्यम्' इति सूत्राद् ईदुदेदित्यस्य अनुवृत्तौ हि 'अमुके अत्र' इत्यत्रापि प्रगृह्यसंज्ञा स्यात् । सा माभूत् एतदर्थं माद्ग्रहणं कृतम् । कृते हि माद्ग्रहणे मकारात्परस्य एकारस्य कुत्रापि असत्वात् न दोषः । ईदूतौ इत्यस्य एव तु नानुवृत्तिः 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति परिभाषया ।

## निपातसंज्ञाविधायकं सूत्रम्

**चादयोऽसत्त्वे १ ।४ ।५७ ॥**

**अद्रव्यार्थाश्चादयो निपाताः स्युः ॥**

(असत्त्वे, चादयः, निपाताः)

सरलार्थः- सत्त्वं द्रव्यम्, न सत्त्वम् इति असत्त्वम्, तस्मिन् असत्त्वे । अद्रव्यवाचिनः चादयो निपातसंज्ञकाः भवन्ति । चादयः = चादिगण-पठिताः शब्दाः ।

## निपातसंज्ञाविधायकं संज्ञासूत्रम्

**प्रादयः १।४।५८॥**

**एतेऽपि तथा ।**

(असत्त्वे, प्रादयः, निपातः)

सरलार्थः- द्रव्यार्थकभिन्नाः प्रादयः अपि निपातसंज्ञकाः भवन्ति ।

## एकाच्निपातानां प्रगृह्यसंज्ञाविधायकं सूत्रम्

**निपात एकाजनाङ् १ ।१ ।१४ ॥**

**एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात् । इ इन्द्रः । उ उमेशः । वाक्यस्मरणयोरङित् (वा.९) । आ एवं नु मन्यसे । आ एवं किल तत् । अन्यत्र ङित्, आ ईषदुष्णम् ओष्णम् ॥**

(एकाच्, अनाङ्, निपातः, प्रगृह्यम्)

सरलार्थः- 'आङ्' इत्यमुं विहाय एकः अच् रूपो यो निपातः, स प्रगृह्यसंज्ञको भवति ।

'इ इन्द्रः' इत्यत्र एकोऽच् निपातः 'इ' इति, तस्य अनेन प्रगृह्यसंज्ञायां प्रकृतिभावे 'इ इन्द्रः' इति रूपं सिद्धम् । अत्र हि प्राप्तः सवर्णदीर्घो न भवति । एवम् 'उ उमेशः' इत्यत्रापि ।

**ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।**
**एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥**

वाक्यस्मरणयोः अर्थयोः प्रयुक्तः आकारः अङिद् ज्ञेयः । ईषदर्थे, क्रियायोगे, मर्यादार्थे, अभिविध्यर्थे च वर्तमानः आकारः ङित् (आङ्) ज्ञेयः । ङितः आकारस्य 'निपात एकाजनाङ्' इत्यनेन प्रगृह्यसंज्ञा न भवति, अङितस्तु भवत्येव इति वार्तिकस्य आशयः ।

## ओकारान्तनिपातानां प्रगृह्यसंज्ञाविधायकं सूत्रम्

**ओत् १ ।१ ।१५ ॥**

**ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ॥**

(ओत्, निपातः, प्रगृह्यम्)

सरलार्थः- ओकारान्तः निपातः प्रगृह्यसंज्ञको भवति ।

'अहो ईशाः' इत्यत्र अनेन 'अहो' इति ओदन्त-निपातस्य प्रगृह्यसंज्ञायाम् अवादेशाभावः ।

### विभाषया प्रगृह्यसंज्ञाविधायकं सूत्रम्

**सम्बुद्धौ शाकल्यस्येतावनार्षे १ ।१ ।१६ ॥**

**सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे । विष्णो इति, विष्ण इति, विष्णविति ॥**

(शाकल्यस्य, सम्बुद्धौ, ओत्, अनार्षे, इतौ, प्रगृह्यम्)

सरलार्थः- सम्बुद्धौ परतः विहितः ओकारः विभाषया प्रगृह्यसंज्ञको भवति, लौकिके इतिशब्दे परे ।

विष्णुशब्दात् सम्बोधनस्य एकवचने सु-प्रत्यये, उकारस्य सम्बुद्धौ परतः 'ह्रस्वस्य गुणः' इति सूत्रेण गुणे, सलोपे 'विष्णो' इति जाते तस्माद् लौकिके इतिशब्दे परे अनेन विभाषया प्रगृह्यसंज्ञायाम्, प्रकृतिभावे च कृते 'विष्णो इति', प्रगृह्यसंज्ञायाः अभावपक्षे ओकारस्य अवादेशे, वकारस्य 'लोपः शाकल्यस्य' इति विकल्पेन लोपे, तस्य असिद्धत्वाद् गुणाभावे 'विष्ण इति', वलोपाभावे च वर्णयोगे 'विष्णविति' इति त्रीणि रूपाणि ज्ञेयानि ।

### उञो वकारादेशविधायकं विधिसूत्रम्

**मय उञो वो वा ८ ।३ ।३३ ॥**

**मयः परस्य उञो वो वाऽचि । किम्वुक्तम्, किमु उक्तम् ॥**

(पदस्य, मयः, उञः, वः, वा, अचि)

सरलार्थः- मयः परस्य 'उञ्' इत्यस्य स्थाने विभाषया वकारः आदेशो भवति, अचि परे । 'उञ्' इति उकाररूपो निपातः ।

'किम् उ उक्तम्' इत्यवस्थायां मकाराद् उत्तरस्य उकारस्य 'मय उञो वो वा' इति सूत्रेण विभाषया वकारादेशे किम्वुक्तम्, वकारादेशाऽभावे उकारस्य निपातसंज्ञायां 'निपात एकाजनाङ्' इत्यनेन प्रगृहसंज्ञायाम्, प्रकृतिभावे 'किमु उक्तम्' इति च रूपे सिद्ध्यतः ।

### विभाषया ह्रस्वादेशविधायकं सूत्रम्

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६ ।१ ।१२७ ॥**

**पदान्ता इको ह्रस्वा वा स्युरसवर्णेऽचि । ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः । चक्रि अत्र, चक्र्यत्र । पदान्ता इति किम् ? गौर्यौ-**

(इकः, पदान्तात्, असवर्णे, अचि, ह्रस्वः, च, शाकल्यस्य)

सरलार्थः- असवर्णे अचि परे पदान्तस्य इक्-वर्णस्य स्थाने विभाषया ह्रस्वादेशो भवति ।

'चक्री अत्र' इति स्थिते 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति सूत्रेण विभाषया ईकारस्य ह्रस्वादेशे 'चक्रि अत्र' इति रूपं सिद्धम् । अत्र ह्रस्वादेशविधानसामर्थ्याद् 'इको यणचि' इति सूत्रेण यण् न, यणि सति ह्रस्वादेशस्य वैयर्थ्यापत्तेः । ह्रस्वाभावपक्षे 'इको यणचि' इति यणि 'चक्र्यत्र' इति रूपं सिद्धम् । पदान्तस्य इको ह्रस्वविधानाद् 'गौरी औ' इत्यत्र ईकारस्य ह्रस्वादेशो न भवति किन्तु 'इको यणचि' इति यणेव, ईकारस्य यकारे 'गौर् य् औ ' इत्यवस्थायाम्-

यरः विभाषया द्वित्वविधायकं विधिसूत्रम्

**अचो रहाभ्यां द्वे ८ । ४ । ४६ ॥**

**अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । गौर्य्यौ ।**

(अचः, रहाभ्याम्, यरः, द्वे, वा)

सरलार्थः- अच्-वर्णाद् उत्तराभ्यां रेफहकाराभ्यां परस्य यर्-वर्णस्य विभाषया द्वित्वं भवति । अनेन सूत्रेण यकारस्य द्वित्वे, वर्णसम्मेलने 'गौर्य्यौ' इति रूपं सिद्ध्यति ।

**न समासे (वा१०) । वाप्यश्वः ॥**

सरलार्थः- - समासे असवर्णे अचि परे पदान्तस्य इकः स्थाने ह्रस्वादेशो न भवति ।

'वाप्याम् अश्वः' इति विग्रहे, समासे विभक्तिलोपे 'वापी अश्वः' इत्यवस्थायाम् 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति ईकारस्य ह्रस्वसमुचितप्रकृतिभावो न, किन्तु 'इको यणचि' इति यणेव- वाप्यश्वः ।

ह्रस्वसमुचितप्रकृतिभावविधायकं सूत्रम्

**ऋत्यकः ६ ।१ ।१२८ ॥**

**ऋति परे पदान्ता अकः प्राग्वद्वा । ब्रह्म ऋषिः, ब्रह्मर्षिः । पदान्ताः किम् ? आर्च्छत् ॥**

(पदस्य, अकः, असवर्णे, ऋति, ह्रस्वः, प्रकृत्या, शाकल्यस्य)

सरलार्थः- - ह्रस्वे ऋकारे परे पदान्तस्य अकः स्थाने विभाषया ह्रस्वसमुचितः प्रकृतिभावो भवति ।

## प्रयोगसिद्धिप्रकारः

### ब्रह्म ऋषिः/ब्रह्मर्षिः

'ब्रह्मा ऋषिः' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'ऋत्यकः' इति सूत्रेण विभाषया ह्रस्वसमुचिते प्रकृतिभावे 'ब्रह्म ऋषिः' इति, ह्रस्वसमुचितप्रकृतिभावाभावपक्षे 'उरण् रपरः' इति सूत्रसहकारेण 'आद् गुणः' इति सूत्रेण पूर्वपरयोः 'अर्'गुणे वर्णसम्मेलने 'ब्रह्मर्षिः' इति च रूपे सिद्ध्यतः ।

## अभ्यासः

१. **कोष्ठकस्थैः पदैः रिक्तस्थानानि पूरयत**

**प्रादयः, दूराद्धूते च, मय उञो वो वा, वाक्यस्मरणयोः, ऋत्यकः**

(क) प्लुतादेशविधायकं सूत्रं ...................... वर्तते ।

(ख) प्रादीनां निपातसंज्ञाविधायकं सूत्रं ..................... इत्यस्ति ।

(ग) ...................... अङित् ।

(घ) ............................ इति सूत्रम् उञः वकारादेशं करोति ।

(ङ) 'ब्रह्म ऋषिः' ........................ इति सूत्रस्य उदाहरणं वर्तते ।

२. **अधो निर्दिष्टप्रश्नानामुत्तराणि लिखत**

(क) 'प्लुतप्रगृह्या अचि नित्यमि'ति सूत्रं किं करोति ?

(ख) 'ईदुदेद्द्विवचनं प्रगृह्यम्' इत्यस्य अर्थं लिखत ।

(ग) 'एकोऽच् निपातः' इत्यस्य कः आशयः ?

(घ) 'अदसो मात्' इति सूत्रे 'मात्' ग्रहणं किमर्थम् ?

(ङ) 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति सूत्रं किं करोति ?

३. **अधो लिखितान् प्रयोगान् ससूत्रं साधयत-**

विष्णू इमौ, रामकृष्णौ अमू आसाते, उ उमेशः, अहो ईशाः, किम्वुक्तम्

४. **रेखाङ्कनेन उपयुक्तं पदं योजयत**

| | |
|---|---|
| दूराद्धूते च | अमुकेऽत्र |
| वाक्यस्मरणयोरङित् | प्रकृतिभावः |
| प्लुतप्रगृह्या अचि नित्यम् | प्लुतादेशः |
| मात् किम् ? | वाप्यश्वः |
| न समासे | आ एवं नु मन्यसे |

## संयुक्ताभ्यासः

५. **प्रमुखसूत्र-सन्धिनाम-निदर्शनपूर्वकं सन्धिं कुरुत**

| | | | | |
|---|---|---|---|---|
| यथा - अनु + अयः | = | अन्वयः | यण्सन्धिः | इको यणचि |
| सवितृ + एव | = | ............ | ............ | ............ |
| भो + अनम् | = | ............ | ............ | ............ |
| उमा + इव | = | ............ | ............ | ............ |
| वने + अपि | = | ............ | ............ | ............ |
| तस्य + एव | = | ............ | ............ | ............ |
| लघु + उपधस्य | = | ............ | ............ | ............ |
| राज + ऋषिः | = | ............ | ............ | ............ |
| लते + अमू | = | ............ | ............ | ............ |
| प्र + एषयति | = | ............ | ............ | ............ |

अष्टमः पाठः

### हल्सन्धिप्रकरणे

# श्चुत्वष्टुत्वादिसन्धिः

## श्चुत्वविधायकं विधिसूत्रम्

**स्तोः श्चुना श्चुः ८ । ४ । ४० ॥**

**सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । रामश्शेते । रामश्चिनोति । सच्चित् । शाङ्गिर्ञ्जयः ॥**

सरलार्थः- योगो नाम अव्यवहितः पूर्वः परो वा । सकारतवर्गयोः स्थाने क्रमेण शकारतवर्गौ भवतः, शकारेण चवर्गेण वा योगे सति ।

'रामस् शेते' इत्यत्र 'रामस्' इत्यस्य दन्त्यसकारस्य स्थाने 'शेते' इति शब्दावयवेन शकारेण योगे शकार आदेशो भवति । एवंरीत्या अन्यान्यपि रूपाणि ज्ञेयानि ।

पदच्छेदोऽर्थश्च- 'रामस् शेते' = रामः स्वपिति । 'रामस् श्चिनोति' = रामः चयनकार्यं करोति । 'सत् चित्' = सत् स्वरूपं चित्स्वरूपञ्च । 'शाङ्गिर्न् जयः' = हे विष्णो ! तव जयः अस्तु ।

## चुत्वनिषेधकं सूत्रम्

**शात् ८ । ४ । ४४ ॥**

**शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ॥**

(शात्, स्तोः, श्चुः, न)

सरलार्थः- शकारादुत्तरस्य तवर्गस्य स्थाने चवर्गादेशो न भवति ।

'विश् नः' इत्यत्र विश्शब्दावयवात् शकाराद् उत्तरस्य 'नः' इत्यस्य नकारस्य स्थाने 'स्तोः श्चुना श्चुः' इत्यनेन प्राप्तस्य चवर्गादेशस्य अनेन निषेधो भवति । 'विश् नः' = प्रवेशनमित्यर्थः । 'प्रश् नः' = पृच्छा इत्यर्थः ।

## ष्टुत्वादेशविधायकं विधिसूत्रम्

**ष्टुना ष्टुः ८ । ४ । ४१ ॥**

**स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ॥**

(स्तोः, ष्टुना, ष्टुः)

सरलार्थः- सकार-तवर्गयोः स्थाने क्रमेण षकार-टवर्गौ भवतः, षकारेण टवर्गेण वा योगे सति ।

'रामस् षष्ठः' इत्यत्र 'रामस्' इत्यस्य दन्त्यसकारस्य 'षष्ठः' इति शब्दावयवेन षकारेण योगे षकारः आदेशो भवति । एवंरीत्या अन्यानि उदाहरणानि ज्ञेयानि ।

'रामस् टीकते' - रामष् टीकते - रामष्टीकते । 'पेष् ता' - पेष् टा - पेष्टा । 'तत् टीका' - तट् टीका - तट्टीका । 'चक्रिन् ढौकसे' - चकिण् ढौकसे - चक्रिण्ढौकसे ।

## ष्टुत्वनिषेधकं सूत्रम्

**न पदान्ताट्टोरनाम् ८ । ४ । ४२ ॥**

**पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते । पदान्तात्किम् ? ईट्टे । टोः किम् ? सर्पिष्टमम् ।**

(पदान्तात्, टोः, अनाम्, स्तोः, ष्टुः, न)

सरलार्थः- पदान्तात् टवर्गात् परयोः नाम्-शब्दभिन्नयोः सकारतवर्गयोः स्थाने षकारटवर्गादेशौ न भवतः ।

'षट् सन्तः' इत्यत्र टकारात् परस्य सकारस्य स्थाने 'ष्टुना ष्टुः' इति सूत्रेण षकारादेशे प्राप्ते अनेन सूत्रेण तस्य निषेधे 'षट् सन्तः' इत्येव रूपम् । एवम् 'षट् ते' इत्यत्रापि ।

पदान्तात् टवर्गादिति कथनेन 'इड् ते' इत्यत्र 'खरि च' इति सूत्रेण चर्त्वे 'इट् ते' इति जाते 'ष्टुना ष्टुः' इति सूत्रेण ष्टुत्वम् (तकारस्य टकारादेशः) भवत्येव, तिङन्तस्यैव पदत्वात् ।

सूत्रेऽस्मिन् 'टोः' ग्रहणाभावे 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इत्यनया परिभाषया 'ष्टुना ष्टुः' सूत्रात् 'ष्टुः' इत्यस्यैव अनुवृत्तिः स्यात्, एवञ्च सति 'सर्पिष् तमम्' इत्यत्र तकारस्यापि ष्टुत्वनिषेधः स्यात्, तन्मा भूत्, ष्टुत्वं स्यादेतदर्थं 'टोः' ग्रहणं कृतम्, सति ग्रहणे अत्र टवर्गात् परत्वाभावात् तमम् इत्यस्य तकारस्य ष्टुत्वं भवत्येव ।

**अनाम्नवतिनगरीणामिति वाच्यम् (वा.११) । षण्णाम् । षण्णवतिः । षण्णगर्य्यः ॥**

सरलार्थः- 'न पदान्ताट्टोरनाम्' इत्यस्य स्थाने 'न पदान्ताट्टोरनामनवतिनगरीणाम्' इति सूत्रं कर्तव्यम् इत्यर्थः । तेन नवतिनगरीशब्दयोरपि अनेन वार्तिकेन ष्टुत्वनिषेधस्य प्रतिषेधः ।

अतः पदान्त-टवर्गात् परयोः नाम्-नवति-नगरीशब्दभिन्नयोः सकार-तवर्गयोरेव ष्टुत्वं न भवति ।

'षड् नाम्' इत्यत्र डकारस्य योगे नकारस्य ष्टुत्वेन णकारे 'षड् णाम्' इति जाते 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन डकारस्य अनुनासिके णकारे 'षण्णाम्' इति । 'षड् नवतिः' इत्यत्र तु नकारस्य 'न पदान्ताट्टोरनाम्' इत्यनेन ष्टुत्वनिषेधे प्राप्ते अनेन तस्य प्रतिषेधे सति 'ष्टुना ष्टुः' इति ष्टुत्वेन णकारे 'षड् णवतिः' इति जाते 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रेण डकारस्य विकल्पेन अनुनासिके 'षण्णवतिः', अनुनासिकाभावे 'षड्णवतिः' इति च सिद्ध्यतः । एवम् 'षड् नगर्य्यः' इत्यस्य 'षण्णगर्य्यः', 'षड्णगर्य्यः' इति ।

### ष्टुत्वनिषेधविधायकं सूत्रम्

**तोः षि ८ । ४ । ४३ ॥**

**न ष्टुत्वम् । सन्षष्ठः ॥**

(तोः, न, ष्टुः, षि)

सरलार्थः- तवर्गस्य स्थाने षकारे परे टुत्वं न भवति ।

'सन् षष्ठः' इति स्थितौ नकारस्य स्थाने 'ष्टुना ष्टुः' इति सूत्रेण प्राप्तस्य ष्टुत्वस्य अनेन सूत्रेण निषेधे 'सन् षष्ठः' इत्येव रूपम् ।

### जश्त्वादेशविधायकं विधिसूत्रम्

**झलां जशोऽन्ते ८ । २ । ३९ ॥**

**पदान्ते झलां जशः स्युः । वागीशः ॥**

(पदस्य, अन्ते, झलाम्, जशः)

सरलार्थः- पदस्य अन्ते स्थितानां झल्-वर्णानां स्थाने 'जश्' इत्यादेशो भवति ।

'वाक् ईशः' इति स्थिते 'झलां जशोऽन्ते' इति सूत्रेण ककारस्य जश्त्वे, आन्तरतम्याद् गकारे, वर्णयोगे 'वागीशः' इति रूपं सिद्ध्यति ।

### अनुनासिकादेशविधायकं विधिसूत्रम्

**यरोऽनुनासिकेऽनुनासिको वा ८ । ४ । ४५ ॥**

**यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः, एतद् मुरारिः ।**

(पदस्य, यरः, अनुनासिके, अनुनासिकः, वा)

सरलार्थः- पदान्तस्य यरः स्थाने अनुनासिके परे विभाषया अनुनासिकः आदेशो भवति ।

'एतद् मुरारिः' इति स्थिते अनेन सूत्रेण पदान्तस्य यरः दकारस्य स्थाने परे विभाषया अनुनासिकादेशे, तत्र स्थानतः आन्तर्याद् नकारादेशे 'एतन्मुरारिः' इति, अनुनासिकाऽभावपक्षे 'एतद् मुरारिः' इति च रूपे सिद्ध्यतः ।

**प्रत्यये भाषायां नित्यम् (वा. १२)**

**तन्मात्रम् । चिन्मयम् ॥**

सरलार्थः- अनुनासिकादौ प्रत्यये परे पदान्तस्य यरः स्थाने नित्यमनुनासिकः आदेशो भवति ।

'तद् मात्रम्' इति स्थिते दकारस्य स्थाने 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रेण प्राप्तं वैकल्पिकम् अनुनासिकं बाधित्वा अनेन वार्तिकेन अनुनासिक-मकारादि-मात्रच्प्रत्यये परे नित्यतया अनुनासिके नकारादेशे 'तन्मात्रम्' इति रूपं सिद्ध्यति ।

'चित् मयम्' = चिद् मयम् (झलां जशोऽन्ते) - चिन् मयम् - चिन्मयम् ।

## परसवर्णादेशविधायकं विधिसूत्रम्

**तोर्लि ८ । ४ । ६० ॥**

**तवर्गस्य लकारे परे परसवर्णः । तल्लयः । विद्वाँल्लिखति । नस्यानुनासिको लः ॥**

(तोः, लि, परसवर्णः)

सरलार्थः- तवर्गस्य स्थाने लकारे परे परसवर्णः (लकारस्य सवर्णिनोः लकारलँकारयोः मध्ये एकः अन्यतरः) आदेशो भवति ।

'तद् लयः' इति स्थिते अनेन सूत्रेण दकारस्य परसवर्णे लकारादेशे 'तल्लयः' इति रूपम् । 'विद्वान् लिखति' इत्यत्र च नकारस्य स्थाने परसवर्णे, स्थानतः आन्तर्याद् अनुनासिके लँकारे 'विद्वालँ् लिखति' इत्यत्र वर्णयोगे 'विद्वाँल्लिखति' इति रूपम् ।

### प्रयोगसिद्धिप्रकारः
### पेष्टा

'पेष् ता' इति स्थिते षकारेण योगे 'ता' इत्यस्य तकारस्य स्थाने 'ष्टुना ष्टुः' इति सूत्रेण ष्टुत्वे यथासङ्ख्य-परिभाषया टकारादेशे 'पेष् टा' इति जाते, वर्णमेलने 'पेष्टा' इति सिद्ध्यति ।

## अभ्यासः

१. **समुचितं पदं चित्वा रिक्तस्थानं पूरयत**

**जशः, शकारचवर्गौ, अनुनासिकः, षकारटवर्गौ, जशः, परसवर्णः**

(क) सकारतवर्गयोः स्थाने श्चुत्वे सति ..................... आदेशौ भवतः ।

(ख) सकारतवर्गयोः स्थाने ष्टुत्वे सति ....................... आदेशौ भवतः ।

(ग) झलां स्थाने .......................... स्युः पदान्ते ।

(घ) तवर्गस्य लकारे परे ........................................... ।

(ङ) पदान्तस्य यरः अनुनासिके परे सति ..................... वा ।

२. **अधो निर्दिष्टशब्दानां सन्धिकार्यं प्रदर्श्य वाक्येषु प्रयोगं कुरुत**

| श्चुत्वसन्धिः | सन्धिगतरूपम् | वाक्यानि |
|---|---|---|
| (क) रामस् + च = | ....................... | ........................................... |
| (ख) सद् + जनः = | ....................... | ........................................... |
| (ग) कस् + चन = | ....................... | ........................................... |
| (घ) सत् + चरित्रम् = | ....................... | ........................................... |
| (ङ) उत् + चारणम् = | ....................... | ........................................... |

| ष्टुत्वसन्धिः | सन्धिगतरूपम् | वाक्यानि |
|---|---|---|
| (क) इष् + तः = | ...................... | ......................................... |
| (ख) विष् + नुः = | ...................... | ......................................... |
| (ग) उद् + डयनम् = | ...................... | ......................................... |
| (घ) कृष् + नः = | ...................... | ......................................... |

| जश्त्वसन्धिः | सन्धिगतरूपम् | वाक्यानि |
|---|---|---|
| (क) अच् + अन्तः = | ...................... | ......................................... |
| (ख) चित्+ आनन्दः = | ...................... | ......................................... |
| (ग) उत् + देश्यम् = | ...................... | ......................................... |
| (घ) दिक् + अम्बरः = | ...................... | ......................................... |
| (ङ) षट् + आनन्दः = | ...................... | ......................................... |

३. **समीचीनासमीचीननिर्देशनं कुरुत**

(क) पदान्तात् टोः परस्य नाम्-नवति-नगरीभिन्नस्य स्तोः ष्टुः भवति ।

(ख) शात्परस्य तवर्गस्य चुत्वं भवति ।

(ग) तवर्गस्य षकारे परे टुत्वं न भवति ।

(घ) लकारे परे तवर्गस्य लकारो भवति ।

(ङ) 'षड्+नवतिः' इति स्थिते 'नवतिः' इत्यस्य नकारस्य णकारो भवति ।

४. **अधो निर्दिष्टशब्दानां सिद्धिप्रक्रियां ससूत्रं लिखत**

सच्चित्, प्रश्नः, तट्टीका, षण्णाम्, चिन्मयम्, विद्वाँल्लिखति

हल्सन्धिप्रकरणे

# पूर्वसवर्णादिसन्धिः

## पूर्वसवर्णादेशविधायकं विधिसूत्रम्

**उदः स्थास्तम्भोः पूर्वस्य ८ । ४ । ६१ ॥**

**उदः परयोः स्थास्तम्भोः पूर्वसवर्णः ॥**

(उदः, स्थास्तम्भोः, पूर्वस्य, सवर्णः)

सरलार्थः- उद्-शब्दात् परयोः स्थाधातोः, स्तम्भधातोश्च स्थाने पूर्वसवर्णः आदेशो भवति ।

## अव्यवहिते एव, परस्य एव च नियामकं परिभाषासूत्रम्

**तस्मादित्युत्तरस्य १ । १ । ६७ ॥**

**पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् ।**

(तस्मात्, इति, निर्दिष्टे, उत्तरस्य)

सरलार्थः- पञ्चम्यन्तं पदमुच्चार्य विधीयमानं कार्यं साक्षाद् उत्तरस्य अनन्तरस्य स्थाने बोध्यम् ।

## आदेशस्थानिनियामकं परिभाषासूत्रम्

**आदेः परस्य १ । १ । ५४ ॥**

**परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । इति सस्य थः ॥**

(परस्य, आदेः, अलः)

सरलार्थः- पञ्चम्यन्तं पदमुच्चार्य परस्य स्थाने विहितं यत् कार्यं तत् तस्य आद्यवर्णस्य स्थाने बोध्यम् ।

सूत्रत्रयस्य उदाहरणानि यथा- 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रे उदः इति पञ्चम्यन्तं पदं वर्तते, तदुच्चार्य स्थास्तम्भोः पूर्वसवर्णो विधीयमानोऽस्ति, अतः अत्र 'तस्मादित्युत्तरस्य', 'आदेः परस्य' इति सूत्रद्वयमेव उपस्थितं भवति । तथा च- उदः अव्यवहितस्य परस्य स्थास्तम्भोः आदेः वर्णस्य स्थाने (सकारस्य स्थाने) पूर्वसवर्णः इति सूत्रार्थः सिद्ध्यति ।

'उद् स्थानम्' इति स्थिते 'तस्मादित्युत्तरस्य', 'आदेः परस्य', 'स्थानेऽन्तरतमः' इति सूत्रत्रयसहकारेण 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण सकारस्य स्थाने पूर्वसवर्णे, दकारस्य सवर्णिषु गुणकृतेन आन्तर्येण विवारस्य, श्वासस्य, अघोषस्य, महाप्राणस्य सकारस्य स्थाने तादृशे एव थकारे कृते 'उद् थ् थानम्' इति जाते-

### झरः लोपादेशविधायकं विधिसूत्रम्

**झरो झरि सवर्णे ८ । ४ । ६५ ॥**

**हलः परस्य झरो वा लोपः सवर्णे झरि ॥**

(हलः, झरः, सवर्णे, झरि, अन्यतरस्याम्, लोपः)

सरलार्थः- हलः उत्तरस्य झर्-वर्णस्य विभाषया लोपो भवति, सवर्णे झरि परे अनेन थकारस्य लोपे 'उद् थानम्' इति जाते-

### चर्त्व-विधायकं विधिसूत्रम्

**खरि च ८ । ४ । ५५ ॥**

**खरि झलां चरः स्युः । इत्युदो दस्य तः । उत्थानम् । उत्तम्भनम् ।**

(झलाम्, चर्, खरि, च)

सरलार्थः- झलां स्थाने चरः आदेशाः भवन्ति खरि परे । अनेन दकारस्य चर्त्वे, आन्तरतम्यात् तकारे 'उत् थानम्' इति जाते, वर्णमेलने 'उत्थानम्' इति, थलोपाभावपक्षे 'उद् थ्थानम्' इत्यवस्थायाम् उभयोः थकारयोः चर्त्वे 'उत्त्थानम्' इति रूपद्वयं सिद्धम् । एवम् 'उद् स्तम्भनम्' इत्यस्यापि पूर्ववद् 'उत्तम्भनम्/उत्त्तम्भनम्' इति ।

### पूर्वसवर्णादेशविधायकं विधिसूत्रम्

**झयो होऽन्यतरस्याम् ८ । ४ । ६२ ॥**

**झयः परस्य हस्य वा पूर्वसवर्णः । नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः । वाग्घरिः, वाग्हरिः ॥**

(झयः, हः, पूर्वस्य, सवर्णः, अन्यतरस्याम्)

सरलार्थः- झयः परस्य हकारस्य स्थाने विभाषया पूर्वस्य सवर्णः आदेशो भवति । संवार-नाद-घोष-महाप्राण-प्रयत्नवतो हकारस्य स्थाने तादृश एव वर्गचतुर्थे घकारे सति 'वाग्घरिः' इति, पूर्वसवर्णाभावे 'वाग्हरिः' इति च रूपे सिद्ध्यतः ।

'वाक् हरिः' - वाग् हरि (झलां जशोऽन्ते) - वाग् घरिः - वाग्घरिः/वाग्हरिः ।

## छत्व-विधायकं विधिसूत्रम्

**शश्छोऽटि ८ । ४ । ६३ ॥**

**झयः परस्य शस्य छो वाऽटि । 'तद् शिव' इत्यत्र दस्य श्चुत्वेन जकारे कृते 'खरि च' इति जकारस्य चकारः । तच्छिवः, तच्शिवः ।**

(झयः, शः, छः, अटि)

सरलार्थः- झयः उत्तरस्य शकारस्य स्थाने विभाषया छकारादेशो भवति, अटि परे ।

'तद् शिवः' - तज् शिवः (स्तोः श्चुना श्चुः) - 'तच् शिवः' (खरि च) - तच् छिवः - तच्छिवः/तच्शिवः ।

**छत्वममीति वाच्यम् (वा.१३) । तच्छ्लोकेन ॥**

सरलार्थः- 'शश्छोऽटि' इत्यस्य स्थाने 'शश्छोऽमि' इति सूत्रं कर्तव्यम्, अर्थात् झय्-वर्णाद् उत्तरस्य शकारस्य स्थाने विभाषया छकारादेशो भवति, अम्-वर्णे परे इत्यर्थः ।

'तद् श्लोकेन' - तज् श्लोकेन - तच् श्लोकेन - तच् छ्लोकेन - तच्छ्लोकेन/तच्श्लोकेन इति ।

### प्रयोगसिद्धिप्रकारः

वाग्घरिः/वाग्हरिः

'वाक् हरिः' इति स्थिते 'स्थानेऽन्तरमः' इति सूत्रसहकारेण 'झलां जशोऽन्ते' इति सूत्रेण ककारस्य जश्त्वेन गकारे 'वाग् हरिः' इति जाते 'झयो होऽन्यतरस्याम्' इति सूत्रेण विकल्पेन पूर्वसवर्णे, गुणकृतेन आन्तरतम्यात् संवारस्य नादस्य घोषस्य महाप्राणस्य हकारस्य स्थाने तादृशे एव वर्गचतुर्थे घकारादेशे 'वाग् घरिः' इति जाते वर्णसंयोगे 'वाग्घरिः' इति रूपं सिद्धम् । पूर्वसवर्णाभावपक्षे 'वाग्हरिः' इत्यपि रूपं सिद्ध्यति ।

## अभ्यासः

१. **रिक्तस्थानं पूरयत**

(क) झर्-प्रत्याहारे ............................ वर्णाः समायान्ति ।

(ख) .................................. इति सवर्णसंज्ञाविधायकं सूत्रं वर्तते ।

(ग) खरि परे झलां .............................. भवन्ति ।

(घ) हकारस्य बाह्यप्रयत्नाः ......................... वर्तन्ते ।

(ङ) अम्-प्रत्याहारे ............................. वर्णाः समागच्छन्ति ।

(च) दकारस्य श्चुत्वे कृते ...................... भवति ।

२. **सन्धिं कुरुत**

अच् + हलौ, स्याट् + ह्रस्वः, विद्युत् + शक्तिः, दूरात् + हूते, तद् + शक्यम्, अप् + हारकः, वणिक् + हसति

३. **उत्तरं लिखत**

(क) 'वाग्घरिः' इत्यत्र केन सूत्रेण पूर्वसवर्णः ?

(ख) 'तस्मादित्युत्तरस्य' इति सूत्रं किं करोति ?

(ग) 'आदेः परस्य' इति सूत्रस्य कोऽर्थः ?

(घ) 'अन्यतरस्याम्' शब्दस्य अर्थः कः ?

(ङ) छत्वविधायकं सूत्रं किम् ?

४. **परस्परं मेलयत**

| | |
|---|---|
| छत्वममीति वाच्यम् | तकारो भवति |
| सकारस्य बाह्यप्रयत्नाः | झयो होऽन्यतरस्याम् |
| हकारस्य बाह्यप्रयत्नाः | वर्गद्वितीयेन तुल्याः |
| दस्य चर्त्वे कृते | तच्छ्लोकेन |
| वाग्घरिः | संवारः, नादः, घोषः, महाप्राणः |

५. **अर्थं विलिख्य प्रतिपदम् एकं वाक्यं रचयत**

उत्थानम्, उत्तम्भनम्, वाग्हरिः, तच्छिवः

६. **अधो निर्दिष्टप्रयोगाणां पदविच्छेदं कुरुत**

तच्छीलः, उत्साहः, दिक्पालः, एतद्धेतोः, तद्धितः

७. **अधो लिखितानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां प्रदर्श्य सिद्धप्रयोगान् वाक्येषु योजयत**

(क) उत्तम्भनम् (ख) वाग्घरिः (ग) तच्छिवः

### हल्सन्धिप्रकरणे

# अनुस्वारपरसवर्णादिसन्धिः

## अनुस्वारादेशविधायकं विधिसूत्रम्

**मोऽनुस्वारः ८ । ३ । २३ ॥**

**मान्तस्य पदस्यानुस्वारो हलि । हरिं वन्दे ॥**

(मः, पदस्य, अनुस्वारः, हलि)

सरलार्थः- व्यञ्जनवर्णे परे पदान्ते स्थितस्य मकारस्य स्थाने अनुस्वारादेशो भवति ।

'हरिम् वन्दे' इति स्थिते वकारे परे पदान्तस्य मकारस्य अनुस्वारे 'हरिं वन्दे' इति रूपं सिद्धम् ।

## अनुस्वारविधायकं विधिसूत्रम्

**नश्चापदान्तस्य झलि ८ । ३ । २४ ॥**

**नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते । झलि किम् ? मन्यते ॥**

(अपदान्तस्य, मः, नः, च, अनुस्वारः, झलि)

सरलार्थः- झलि परे अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारो भवति ।

यशस्शब्दस्य प्रथमायाः बहुवचने 'यशान् सि' इति स्थिते अनेन सूत्रेण नकारस्य अनुस्वारे 'यशांसि' इति रूपं सिद्धम् । एवम् 'आक्रम् स्यते' - आक्रंस्यते ।

## परसवर्णविधायकं विधिसूत्रम्

**अनुस्वारस्य ययि परसवर्णः ८ । ४ । ५८ ॥**

**स्पष्टम् । शान्तः ॥**

सरलार्थः- ययि प्रत्याहारे परे अनुस्वारस्य स्थाने परसवर्णः आदेशो भवति ।

'शाम् तः' इति स्थिते मकारस्य स्थाने 'नश्चापदान्तस्य झलि' इति सूत्रेण अनुस्वारादेशे 'शां तः' इति जाते 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रेण अनुस्वारस्य स्थाने परस्य तकारस्य सवर्णे नकारादेशे 'शान्तः' इति रूपं सिद्धयति । अत्र अनुस्वारस्य स्थाने नासिकास्थानसाम्याद् वर्गपञ्चमो आदिश्यते ।

### परसवर्णविधायकं विधिसूत्रम्

**वा पदान्तस्य ८ । ४ । ५९ ॥**

**त्वङ्करोषि, त्वं करोषि ॥**

(पदान्तस्य, अनुस्वारस्य, ययि, वा, परसवर्णः)

सरलार्थः- पदान्तस्य अनुस्वारस्य स्थाने विभाषया परसवर्णः आदेशो भवति ।

'त्वम् करोषि' इति स्थिते मकारस्य स्थाने 'मोऽनुस्वारः' इति सूत्रेण अनुस्वारादेशे, तस्य अनेन सूत्रेण विभाषया परसवर्णे ङकारादेशे 'त्वङ्करोषि' इति, परसवर्णाभावे 'त्वं करोषि' इति च रूपे सिद्ध्यतः ।

### मकारादेशविधायकं विधिसूत्रम्

**मो राजि समः क्वौ ८ । ३ । २५ ॥**

**क्विबन्ते राजतौ परे समो मस्य म एव स्यात् । सम्राट् ॥**

(क्वौ, राजि, समः, मः, मः)

सरलार्थः- क्विप्प्रत्ययान्ते राज्धातौ परे 'सम्'शब्दस्य मकारस्य स्थाने मकारः एव आदेशो भवति ।

'सम् राट्' इति स्थिते मकारस्य स्थाने 'मोऽनुस्वारः' इति सूत्रेण अनुस्वारे प्राप्ते तं बाधित्वा अनेन सूत्रेण मकारस्य मकारादेशे 'सम्राट्' इति रूपं सिद्ध्यति ।

### मकारादेशविधायकं विधिसूत्रम्

**हे मपरे वा ८ । ३ । २६ ॥**

**मपरे हकारे परे मस्य मो वा । किम् ह्मलयति, किं ह्मलयति ।**

(मपरे, हे, मः, मः, वा)

सरलार्थः- मकारपरके हकारे परे सति मकारस्य स्थाने विभाषया मकारः एव आदेशो भवति, न तु अनुस्वारः ।

'किम् ह्मलयति' इति स्थिते 'मोऽनुस्वारः' इति सूत्रेण मस्य अनुस्वारे प्राप्ते अनेन सूत्रेण विभाषया अनुस्वारस्य निषेधे, मकार एवादेशे 'किम् ह्मलयति' इति, मकारादेशाभावे अनुस्वारे 'किं ह्मलयति' इति च रूपे सिद्ध्यतः ।

**यवलपरे यवला वा (वा.१४) । 'कियँ ह्यः, किं ह्यः' । किवँ ह्वलयति, किं ह्वलयति । किलँ ह्लादयति, किं ह्लादयति ॥**

(यवलपरे, मस्य, वा, यवलाः)

सरलार्थः- यकार-वकार-लकारपरके हकारे परे सति मकारस्य स्थाने विभाषया क्रमेण यकार-वकार-लकारा एव आदेशाः भवन्ति न तु अनुस्वारः ।

'किम् ह्यः' इति स्थिते 'मोऽनुस्वारः' इति सूत्रेण मस्य अनुस्वारे प्राप्ते अनेन वार्तिकेन विभाषया अनुस्वारस्य निषेधे, मकारस्य स्थानतः आन्तर्याद् यँकारादेशे 'कियँ ह्यः' इति, मकारादेशाभावे अनुस्वारे 'किं ह्यः' इति च रूपे सिद्ध्यतः ।

एवंरीत्या - 'किम् ह्वलयति' = किवँ ह्वलयति/किं ह्वलयति । 'किम् ह्लादयति' = किलँ ह्लादयति/किं ह्लादयति ।

### नकारादेशविधायकं विधिसूत्रम्

**नपरे नः ८ ।३ ।२७ ॥**

**नपरे हकारे मस्य नो वा । किन् ह्नुते, किं ह्नुते ॥**

(पदस्य, मः, नपरे, हे, न, वा)

सरलार्थः- नकारपरके हकारे परे सति मकारस्य स्थाने विभाषया नकारः एव भवति न तु अनुस्वारः ।

'किम् ह्नुते' इति स्थिते 'मोऽनुस्वारः' इति सूत्रेण मस्य अनुस्वारे प्राप्ते अनेन सूत्रेण विभाषया अनुस्वारस्य निषेधे, नकारादेशे एव 'किन् ह्नुते' इति, नकारादेशाभावे अनुस्वारे 'किं ह्नुते' इति च रूपे सिद्ध्यतः ।

### आगमनियमविधायकं परिभाषासूत्रम्

**आद्यन्तौ टकितौ १ ।१ ।४६ ॥**

**टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः ॥**

(आद्यन्तौ, क्रमात्, टकितौ)

सरलार्थः- टित् कित् च आगमौ यस्य विधीयेते, तस्य तौ क्रमेण आदेः अन्तस्य च अवयवौ भवतः । अतः टिदागमः आद्यावयवो भवति, किदागमश्च अन्तावयवः ।

### कुक्टुगागमविधायकं विधिसूत्रम्-

**ङ्णोः कुक्टुक् शरि ८ । ३ । २८ ॥**

**वा स्तः ।**

(पदस्य, ङ्णोः, शरि, कुक्टुक्, वा)

सरलार्थः- ङकार-णकारयोः क्रमेण कुक्टुकौ आगमौ विभाषया भवतः, शरि परे । कुक्, टुक् इत्यनयोः अनुबन्धलोपानन्तरं क्रमेण ककार-टकारौ अवशिष्येते ।

**चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा.१५) । प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः । सुगण्ठ् षष्ठः, सुगण्ट् षष्ठः, सुगण् षष्ठः ।**

सरलार्थः- शर्-प्रत्याहारे परे सति वर्गीयप्रथमवर्णानां स्थाने वर्गीयद्वितीयवर्णाः आदेशाः विकल्पेन भवन्ति ।

'प्राङ् षष्ठः' इति स्थिते 'आद्यन्तौ टकितौ' इति सूत्रसहकारेण 'ङ्णोः कुक्टुक् शरि' इति सूत्रेण ङकारस्य कुगागमेऽनुबन्धलोपे, कित्वाद् अन्तावयवत्वे 'प्राङ् क् षष्ठः' इति स्थिते 'चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकेन ककारस्य द्वितीयादेशे 'प्राङ्ख् षष्ठः' इति रूपम्, द्वितीयाभावे 'प्राङ्क् षष्ठः' इत्यवस्थायां कषसंयोगे क्षकारे 'प्राङ्क्षष्ठः' इति, कुगागमाभावपक्षे 'प्राङ्षष्ठः' इति रूपत्रयं सिद्धम् । 'सुगण् षष्ठः' इत्यत्र तु णकारस्य टुगागमेऽनुबन्धलोपे, कित्वादन्तावयवत्वे, टकारस्य द्वितीयादेशे ठकारे 'सुगण्ठ् षष्ठः' इति, पक्षे पूर्ववत् 'सुगण्ट् षष्ठः', 'सुगण् षष्ठः' इति च ।

### धुडागमविधायकं विधिसूत्रम्

**डः सि धुट् ८ । ३ । २९ ॥**

**डात्परस्य सस्य धुड्वा । षट्त्सन्तः, षट् सन्तः ॥**

सरलार्थः- 'उभयनिर्देशे पञ्चमी निर्देशो बलीयान् परत्वात्' इत्यनया परिभाषया 'डकारात् परस्य सकारस्य विभाषया धुट् आगमो भवति' इति सूत्रार्थः । अनुबन्धलोपे 'ध्' इति अवशिष्यते ।

'षड् सन्तः' इति स्थिते अनेन सूत्रेण डकारात्परस्य सकारस्य धुट्-आगमे अनुबन्धलोपे, टित्वाद् आद्यवयवत्वे 'षड् ध् सन्तः' इति जाते धकारस्य 'खरि च' इति सूत्रेण चर्त्वे 'षड् त् सन्तः' इति जाते डकारस्यापि 'खरि च' इति चर्त्वेन टकारे 'षट्त्सन्तः' इति,

धुडागमाभावे 'षड् सन्तः' इत्यवस्थायां डकारस्य चर्त्वेन टकारादेशे 'षट् सन्तः' इति च ।

## धुडागमविधायकं विधिसूत्रम्

**नश्च ८ । ३ । ३० ॥**

**नान्तात्परस्य सस्य धुड्वा । सन्त्सः, सन्सः ॥**

(नश्च, सि, वा, धुट्)

सरलार्थः- नकारान्तात् पदाद् उत्तरस्य सकारस्य विकल्पेन 'धुट्' इति आगमो भवति ।

'सन् सः' इति स्थिते अनेन सूत्रेण नकारान्तात्परस्य सकारस्य विभाषया धुट्-आगमे अनुबन्धलोपे 'सन् ध् सः' इति जाते धकारस्य 'खरि च' इति सूत्रेण चर्त्वे 'सन्त्सः' इति, धुडागमाभावे 'सन्सः' इति च रूपे सिद्ध्यतः ।

## तुगागमविधायकं विधिसूत्रम्

**शि तुक् ८ । ३ । ३१ ॥**

**पदान्तस्य नस्य शे परे तुग्वा । सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः, सञ्शम्भुः ॥**

(पदस्य, नः, शि, वा, तुक्)

सरलार्थः- शकारे परे सति पदान्तस्य नकारस्य विकल्पेन 'तुक्' आगमो भवति ।

'सन् शम्भुः' इति स्थिते अनेन सूत्रेण नकारस्य तुगागमे अनुबन्धलोपे 'सन् त् शम्भुः' इति जाते 'शश्छोऽटि' इति सूत्रेण शकारस्य छकारे 'सन् त् छम्भुः' इति जाते, तकारस्य 'स्तोः श्चुना श्चुः' इति सूत्रेण श्चुत्वेन चकारे, चकारेण योगे नकारस्य पुनः श्चुत्वेन ञकारे कृते 'सञ्च् छम्भुः' इति जाते 'झरो झरि सवर्णे' इति सूत्रेण चकारस्य विभाषया लोपे 'शञ्छम्भुः' इति, 'झरो झरि ...' इति लोपाऽभावे 'सञ्च्छम्भुः' इति, 'शश्छोऽटि' इति छत्वाऽभावे 'सञ्च्शम्भुः' इति, तुगागमाऽभावे च 'सञ्शम्भुः' इति च चत्वारि रूपाणि सिद्ध्यन्ति ।

## ङमुट् (ङुट्-णुट्-नुट्) आगमविधायकं विधिसूत्रम्

**ङमो ह्रस्वादचि ङमुण्नित्यम् ८ । ३ । ३२ ॥**

**ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो ङमुट् । प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ॥**

(ह्रस्वात्, ङमः, पदस्य, अचः, ङमुट्, नित्यम्)

**सरलार्थः**- ह्रस्वात्परो विद्यमानो यो ङम्, तदन्तं यत्पदम्, तस्माद् ङमः परस्य अचो ङमुडागमो भवति । ङम् इति प्रत्याहारः, अत्र कृतं टित्वं प्रत्येकं संज्ञिना सह सम्बद्ध्यते, अतो ङमुट् नाम ङुट्, णुट्, नुट् इत्यर्थः । उक्तञ्च- **संज्ञायाञ्च कृतं टित्त्वं सामर्थ्यात् संज्ञिभिः सह सम्बध्यते** । अतो ङकारस्य ङुट्, णकारस्य णुट्, नकारस्य च नुट् एते आगमाः बोध्याः ।

**'प्रत्यङ् आत्मा'** इति स्थिते अनेन सूत्रेण ङकारात् परस्य आकारस्य ङुडागमेऽनुबन्धलोपे, टित्वाद् आद्यवयवत्वे **'प्रत्यङ् ङात्मा'** इति जाते, वर्णसम्मेलने **'प्रत्यङ्ङात्मा'** इति रूपं सिद्धम् । एवंरीत्या 'सुगण् ईशः' इत्यत्र णकारात् परस्य ईकारस्य अनेन णुडागमे- सुगण्णीशः । 'सन् अच्युतः' इत्यत्र नकारात् परस्य अकारस्य अनेन नुडागमे- सन्नच्युतः ।

## वाक्येषु प्रयोगानुशीलनम्

१. तत्र षट् सन्तः निवसन्ति ।
२. सम्राट् सर्वान् राज्ञः विजयते ।
३. भोजननियमान् लङ्घिष्यसि चेत् रोगाः शरीरम् आक्रंस्यन्ते ।
४. अहं नित्यं हरिं वन्दे ।
५. अद्य पर्यावरणं शान्तं वर्तते ।

## अभ्यासः

**१. अधो निर्दिष्टं कथनं समीचीनं कुरुत**

(क) ङमुडागमे द्वौ आगमौ भवतः ।

(ख) पदान्तस्य नस्य शे परे धुड् भवति ।

(ग) ङ्णोः अचि परे कुक्-टुकौ आगमौ भवतः ।

(घ) कित्-आगमः आद्यावयवः स्यात् ।

(ङ) अचि परे पदान्तस्य मस्य अनुस्वारो भवति ।

**२. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत**

(क) अपदान्तस्य नस्य मस्य च अनुस्वारः ......................... । (हलि, झलि)

(ख) पदान्तस्य अनुस्वारस्य ययि .......................... । (वा परसवर्णः, परसवर्णः)

(ग) यवलपरे मस्य ......................... वा । (अनुस्वारः, यवलाः)

(घ) टिद् आगमः यस्य क्रियते तस्य ......... भूत्वा प्रवर्तते ।(आद्यवयवः, अन्तावयवः)

(ङ) ............... धुड् वा । (सात्परस्य डस्य, डात्परस्य सस्य)

**३. अधो निर्दिष्टप्रश्नानाम् उत्तराणि लिखत**

(क) हलि परे पदान्तस्य मस्य किं भवति ?

(ख) 'झल्-यय्'प्रत्याहारयोः के के वर्णाः समायान्ति ?

(ग) पदान्तस्य अनुस्वारस्य स्थाने ययि परे किं कर्तव्यम् ?

(घ) 'सम् राट्' इत्यत्र मकारस्य अनुस्वारः कथं न भवति ।

(ङ) 'डः सि धुट्' इत्यनेन कस्य धुडागमः ?

(च) 'ङमुट्-आगमः' इत्यनेन के आगमाः गृह्यन्ते ?

**४. सन्धिं विच्छेदयत**

सत्यं वद, कार्यं कुरु, तस्मिन्निति, सन्त्सः

**५. अधो निर्दिष्टप्रयोगान् ससूत्रं संसाध्य वाक्येषु संयोजयत**

आक्रंस्यते, शान्तः, सम्राट्, सुगण्ठ् षष्ठः, सन्नच्युतः

हल्सन्धिप्रकरणे

# रुत्वानुनासिकानुस्वारादिसन्धिः

## रुत्वादेशविधायकं विधिसूत्रम्

**समः सुटि ८ । ३ । ५ ॥**

**समो रुः सुटि ॥**

(समः, रुः, सुटि)

सरलार्थः- सम्शब्दस्य स्थाने 'रु' आदेशो भवति सुटि परे । 'सम् स्कर्ता' इति स्थिते मकारस्य स्थाने अनेन रु-आदेशे अनुबन्धलोपे 'सर् स्कर्ता' इति जाते-

## अनुनासिकादेशविधायकं विधिसूत्रम्

**अत्रानुनासिकः पूर्वस्य तु वा ८ । ३ । २ ॥**

**अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा ॥**

(अत्र, अनुनासिकः, पूर्वस्य, तु, वा)

सरलार्थः- अत्र = 'मतुवसोः रु सम्बुद्धौ छन्दसि' इति सूत्रस्य रुप्रकरणे उकारानुबन्धिनो रेफात् पूर्वस्य वर्णस्य विभाषया अनुनासिकादेशो भवति ।

'सर् स्कर्ता' इत्यवस्थायाम् अनेन रेफात्पूर्वस्य अकारस्य स्थाने अनुनासिके अँकारादेशे कृते 'सँर् स्कर्ता' इति जाते-

## अनुस्वारागमविधायकं विधिसूत्रम्

**अनुनासिकात् परोऽनुस्वारः ८ । ३ ।४ ॥**

**अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः ॥**

(अनुनासिकात्, पूर्वस्य, परः, अनुस्वारः)

सरलार्थः- अनुनासिकपक्षं विहाय = अनुनासिकाभावपक्षे, उकारानुबन्धिनो रेफात्पूर्वो यो वर्णः तस्मात् परः अनुस्वारागमो भवति ।

अनुनासिकाभावपक्षे 'सर् स्कर्ता' इति स्थिते उकारानुबन्धिनो रेफात्पूर्वो वर्णः अकारः, तस्मात् परो अकाररेफयोर्मध्ये अनुस्वारागमे 'संर् स्कर्ता' इति जाते-

### विसर्गादेशविधायकं विधिसूत्रम्

**खरवसानयोर्विसर्जनीयः ८ ।३ ।१५ ॥**

**खरि अवसाने च पदान्तस्य रेफस्य विसर्गः ।**

(खरवसानयोः, पदस्य, रः, विसर्जनीयः)

सरलार्थः- पदान्तेस्थितस्य रेफस्य स्थाने खरि परे अवसाने च विसर्गः आदेशो भवति । अनेन सूत्रेण पक्षद्वयेऽपि रेफस्य स्थाने विसर्गादेशे 'सँः स्कर्ता', 'संः स्कर्ता' इति च जाते-

**संपुंकानां सो वक्तव्यः (वा.१६) । सँस्स्कर्ता, संस्स्कर्ता ॥**

सरलार्थः- सम्-पुम्-कान्शब्दानाम् अवयवस्य विसर्गस्य स्थाने सकारः आदेशो भवति ।

अनेन वार्तिकेन पक्षद्वयेऽपि विसर्गस्य स्थाने सकारादेशे 'सँस्कर्ता', 'संस्स्कर्ता' चेति रूपद्वयं सिद्ध्यति ।

### रुत्वादेशविधायकं विधिसूत्रम्

**पुमः खय्यम्परे ८ ।३ ।६ ॥**

**अम्परे खयि पुमो रुः । पुँस्कोकिलः, पुंस्कोकिलः ॥**

(अम्परे, खयि, पुमः, रुः)

सरलार्थः- अम्परके खयि परे पुम्शब्दस्य स्थाने रु-आदेशो भवति ।

'पुम् कोकिलः' इति स्थिते अनेन सूत्रेण रुत्वे, 'अत्रानुनासिकः पूर्वस्य तु वा', 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रद्वयेन पक्षद्वये क्रमेण अनुनासिकादेशे, अनुस्वारागमे च कृते, 'सम्पुंकानां सो वक्तव्यः' इति वार्तिकेन पक्षद्वयेऽपि सकारादेशे 'पुँस्कोकिलः', 'पुंस्कोकिलः' इति रूपे सिद्ध्यतः ।

### रुत्वादेशविधायकं विधिसूत्रम्

**नश्छव्यप्रशान् ८ ।३ ।७ ॥**

**अम्परे छवि नान्तस्य पदस्य रुः न तु प्रशान्शब्दस्य ॥**

(अम्परे, छवि, नः, पदस्य, रुः, अप्रशान्)

सरलार्थः- प्रशान्शब्दं विहाय अम्परके छव्प्रत्याहारे परे नकारान्तस्य पदस्य 'रु' इत्ययमादेशो भवति ।

'चक्रिन् त्रायस्व' इति स्थिते रेफपरके तकारे परे अनेन सूत्रेण नकारस्य रुत्वेऽनुबन्धलोपे 'चक्रिर् त्रायस्व' इति जाते अनुनासिकादेशे, अनुस्वारागमे च कृते 'चक्रिँर् त्रायस्व', 'चक्रिंर् त्रायस्व' इति चावस्थायां 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गादेशे 'चक्रिँः स्त्रायस्व', 'चक्रिंः त्रायस्व' इति जाते-

## सकारादेशविधायकं विधिसूत्रम्

**विसर्जनीयस्य सः ८ ।३ ।३४ ॥**

**खरि । चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व । अप्रशान् किम् ? प्रशान् तनोति । पदस्येति किम् ? हन्ति ॥**

(विसर्जनीयस्य, सः, खरि)

सरलार्थः- खरि परे विसर्गस्य स्थाने सकारादेशो भवति ।

अनेन पक्षद्वयेऽपि विसर्गस्य स्थाने सकारादेशे चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व चेति रूपद्वयं सिद्ध्यति ।

## रुत्वादेशविधायकं विधिसूत्रम्

**नॄन्पे ८ ।३ ।१० ॥**

**नॄन्नित्यस्य रुर्वा पे ॥**

(नॄन्, वा, रु, पे)

सरलार्थः- नॄन्शब्दस्य स्थाने विभाषया 'रु' इत्ययमादेशो भवति, पकारे परे ।

'नॄन् पाहि' इति स्थिते अनेन सूत्रेण नकारस्य 'रु' इत्ययमादेशेऽनुबन्धलोपे 'नॄर् पाहि' इति जाते अनुनासिकादेशे, अनुस्वारागमे च कृते, रेफस्य 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण विसर्गादेशे 'नॄँः पाहि', 'नॄंः पाहि' इति जाते-

## विभाषया ≍क≍पादेशविधायकं विधिसूत्रम्

**कुप्वोः ≍क≍पौ च ८ । ३ । ३७ ॥**

**कवर्गे पवर्गे च विसर्गस्य ≍क≍पौ स्तः, चाद्विसर्गः । नॄँ≍पाहि, नॄँः पाहि, नॄं≍पाहि, नॄंः पाहि । नॄन्पाहि ॥**

(विसर्जनीयस्य, ≍क≍पौ, च, कुप्वोः)

सरलार्थः- कवर्गे पवर्गे च परे विसर्गस्य स्थाने क्रमेण जिह्वामूलीयः उपध्मानीयश्च विसर्गौ स्तः, चकाराद् एकस्मिन् पक्षे विसर्गश्च भवति ।

'नॄँः पाहि', 'नॄंः पाहि' इत्यवस्थायाम्, विसर्गस्य स्थाने अनेन पक्षद्वयेऽपि उपध्मानीयविसर्गादेशे 'नॄँ≍पाहि', 'नॄं≍पाहि' इति, चकाराद् उपध्मानीयविसर्गाभावे अनेनैव सूत्रेण साधारणे विसर्गे कृते 'नॄँःपाहि', 'नॄंःपाहि' इति, नकारस्य रुत्वाभावे 'नॄन्पाहि' इति च पञ्च रूपाणि सिद्ध्यन्ति ।

## आम्रेडितसंज्ञाविधायकं सूत्रम्

**तस्य परमाम्रेडितम् ८ । १ । २ ॥**

**द्विरुक्तस्य परमाम्रेडितं स्यात् ॥**

(तस्य, परम्, आम्रेडितम्)

सरलार्थः- वारद्वयम् उक्तयोः पदयोः परं पदम् 'आम्रेडितम्' भवति ।

'कान् कान्' इति स्थिते अनेन सूत्रेण परस्य 'कान्'शब्दस्य आम्रेडितसंज्ञायाम्-

## रुत्वविधायकं विधिसूत्रम्

**कानाम्रेडिते ८ । ३ । १२ ॥**

**कान्नकारस्य रुः स्यादाम्रेडिते । काँस्कान्, कांस्कान् ॥**

(कान्, रु, आम्रेडिते)

सरलार्थः- कान् इत्यस्य अन्त्यस्य नकारस्य आम्रेडिते रुत्वादेशो भवति ।

'कान् कान्' इत्यवस्थायाम् अनेन सूत्रेण पूर्वस्य 'कान्'शब्दावयवस्य नकारस्य रुत्वादेशेऽनुबन्धलोपे 'कार् कान्' इति जाते अनुनासिकादेशे, अनुस्वारागमे च कृते, रेफस्य 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण विसर्गादेशे, विसर्गस्य स्थाने 'सम्पुंकानां सो वक्तव्यः'

इति वार्तिकेन सकारादेशे 'काँस्कान्, कांस्कान्' इति च रूपे सिद्धयतः ।

### तुगागमविधायकं विधिसूत्रम्

**छे च ६ । १ । ७३ ॥**

**ह्रस्वस्य छे तुक् । शिवच्छाया ॥**

(ह्रस्वस्य, तुक्, छे, च, संहितायाम्)

सरलार्थः- छकारे परे सति ह्रस्वस्य वर्णस्य 'तुक्' आगमो भवति, संहितायां विषये ।

'शिव छाया' इत्यत्र अनेन सूत्रेण अकारस्य तुगागमेऽनुबन्धलोपे, कित्वाद् अन्तावयवत्वे 'शिवत् छाया' इति जाते, तकारस्य 'स्तोः श्चुना श्चुः' इति सूत्रेण श्चुत्वे 'शिवच्छाया' इति रूपं सिद्धम् ।

### विभाषया तुगागमविधायकं विधिसूत्रम्

**पदान्ताद्वा ६ । १ । ७६ ॥**

**दीर्घात्पदान्ताच्छे तुग् वा । लक्ष्मीच्छाया, लक्ष्मीछाया ॥**

(दीर्घात्, पदान्तात्, छे, वा, तुक्, संहितायाम्)

सरलार्थः- छकारे परे पदान्तस्य दीर्घस्य विभाषया तुगागमो भवति, संहितायां विषये ।

'लक्ष्मी छाया' इति स्थिते 'आद्यन्तौ टकितौ' इति सूत्रसहकारेण अनेन सूत्रेण ईकारस्य तुगागमेऽनुबन्धलोपे 'लक्ष्मीत् छाया' इति जाते 'स्तोः श्चुना श्चुः' इति सूत्रेण श्चुत्वे 'लक्ष्मीच्छाया' इति, तुगागमाभावे 'लक्ष्मीछाया' इति च रूपे सिद्धयतः ।

### वाक्येषु प्रयोगानुशीलनम्

१. पुंस्कोकिलः मधुरं कूजति ।

२. हे ईश ! नॄँःपाहि ।

३. श्वः गुरुः काँस्कान् समूहान् परियोजनाकार्ये योजयति ?

४. मांसस्य क्रेता, विक्रेता, संस्कर्ता, भक्षकश्च प्राणिनः घातंकाः सन्ति ।

५. दैत्येभ्यः भीताः देवाः वदन्ति, "चकिंस्त्रायस्व ।"

## अभ्यासः

१. **अधो लिखितानां प्रश्नानाम् उत्तरं लिखत**

(क) 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रं किं करोति ?

(ख) 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रेण विहितः अनुस्वारः आगमः आदेशो वा ?

(ग) 'तस्य परमाम्रेडितम्' इत्यस्य कोऽर्थः ?

(घ) 'छे च' इति सूत्रं किं करोति ?

(ङ) जिह्वामूलीयोपध्मानीयविसर्गौ कस्मात् पूर्वौ ? तयोः स्वरूपञ्च कीदृशम् ?

२. **परस्परं मेलयत**

| | |
|---|---|
| अनुनासिकः | चक्रिँस्त्रायस्व |
| छे च | समः सुटि |
| नश्छव्यप्रशान् | आगमः |
| संस्कर्ता | शिवच्छाया |
| अनुस्वारः | आदेशः |

४ **कथनं समीचीनं कुरुत**

(क) दीर्घात्पदान्तात् छे नित्यं तुक् भवति ।

(ख) द्विरुक्तस्य पूर्वम् आम्रेडितं भवति ।

(ग) सम्पुम्कानां सस्य विसर्गो भवति ।

(घ) प्रशान्शब्दस्य 'नश्छव्यप्रशान्' इति सूत्रेण रुत्वं भवति ।

(ङ) पुँस्कोकिलः पुमः खय्यम्परे इति सूत्रस्य उदाहरणं नास्ति ।

५. **सिद्धिप्रक्रियां प्रदर्श्य निर्दिष्टपदानि वाक्येषु योजयत**

संस्स्कर्ता, चक्रिँस्त्रायस्व, काँस्कान्, शिवच्छाया ।

विसर्गसन्धिप्रकरणे

# सत्व-रुत्वोत्वादिसन्धिः

## विसर्गस्य सकारादेशविधायकं विधिसूत्रम्

**विसर्जनीयस्य सः ८ । ३ । ३४ ॥**

**खरि । विष्णुस्त्राता ॥**

(विसर्जनीयस्य, सः)

सरलार्थः- खरि परे विसर्गस्य स्थाने सकारादेशो भवति ।

'विष्णुः त्राता' इति स्थिते अनेन सूत्रेण विसर्गस्य स्थाने सकारादेशे 'विष्णुस्त्राता' इति रूपं सिद्धम् ।

## विसर्गस्य विसर्गविधायकं विधिसूत्रम्

**वा शरि ८ । ३ । ३६ ॥**

**शरि विसर्गस्य विसर्गो वा । हरिः शेते, हरिश्शेते ॥**

(विसर्जनीयस्य, शरि, वा, विसर्जनीयः)

सरलार्थः- शर्प्रत्याहारे परे विसर्गस्य स्थाने विभाषया विसर्गः एव आदेशो भवति, न तु सकारः इत्यर्थः ।

'हरिः शेते' इत्यवस्थायाम् 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे प्राप्ते, तत् प्रबाध्य अनेन सूत्रेण विकल्पेन विसर्गस्य विसर्गे एवादेशे 'हरिः शेते' इति, अन्ये पक्षे विसर्गस्य सत्वे, तस्य श्चुत्वेन शकारे 'हरिश्शेते' इति च ।

## रुत्वविधायकं विधिसूत्रम्

**ससजुषो रुः ८ । २ । ६६ ॥**

**पदान्तस्य सस्य सजुषश्च रुः स्यात् ॥**

(पदस्य, ससजुषोः, रुः)

सरलार्थः- पदान्तस्य सकारस्य स्थाने, सजुष्-शब्दस्य षकारस्य स्थाने च 'रु' इत्यादेशो भवति ।

'शिवस् अर्च्यः' इति स्थिते अनेन सूत्रेण सकारस्य स्थाने रुत्वादेशेऽनुबन्धलोपे 'शिवर् अर्च्यः' इति जाते-

### उत्वादेशविधायकं विधिसूत्रम्

**अतो रोरप्लुतादप्लुते ६ । १ । ११३ ॥**

**अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति । शिवोऽर्च्यः ॥**

(अप्लुतात्, अतः, रोः, उत्, अप्लुते, अति)

सरलार्थः- प्लुतभिन्नाद् ह्रस्वाकारात् परस्य उकारानुबन्धिनः रेफस्य स्थाने 'उ' इति आदेशो भवति, प्लुतभिन्ने ह्रस्वाकारे परे ।

'शिवर् अर्च्यः' इत्यवस्थायाम् अनेन सूत्रेण रेफस्य स्थाने उकारादेशे 'शिव उ अर्च्यः' इति जाते 'शिव उ' इत्यत्र 'आद् गुणः' इति सूत्रेण गुणे 'शिवो अर्च्यः' इति जाते, 'एङः पदान्तादति' इति सूत्रेण पूर्वपरयोः स्थाने पूर्वरूपैकादेशे, चम्पकपुष्पकन्यायेन खण्डाकारे च कृते 'शिवोऽर्च्यः' इति रूपं सिद्ध्यति ।

### उत्वादेशविधायकं विधिसूत्रम्

**हशि च ६ । १ । ११४ ॥**

**तथा । शिवो वन्द्यः ॥**

(अप्लुतात्, अतः, रोः, उत्, हशि, च)

सरलार्थः- प्लुतभिन्नाद् ह्रस्वाकारात् परस्य उकारानुबन्धिनः रेफस्य स्थाने 'उ' इति आदेशो भवति, हशि परे च ।

'शिवस् वन्द्यः' इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे 'शिवर् वन्द्यः' इति जाते रेफस्य अनेन सूत्रेण उत्वे, 'आद् गुणः' इति सूत्रेण गुणे च कृते 'शिवो वन्द्यः' इति रूपं सिद्ध्यति ।

### यकारादेशविधायकं विधिसूत्रम्

**भोभगोअघोअपूर्वस्य योऽशि ८ । ३ । १७ ॥**

**एतत्पूर्वस्य रोर्यादेशोऽशि । देवा इह, देवायिह । भोस् भगोस् अघोस् इति सान्ता निपाताः । तेषां रोर्यत्वे कृते ॥**

(भो-भगो-अघो-अपूर्वस्य, रोः, यः, अशि)

सरलार्थः- भो-भगो-अघो-शब्दपूर्वस्य अवर्णपूर्वस्य च उकारानुबन्धिनः रेफस्य स्थाने यकारादेशो भवति, अशि परे । अवर्णपूर्वस्य उदाहरणमाह- देवा इह, देवायिह इति ।

'देवास् इह' - देवार् इह (ससजुषो रुः) - देवाय् इह - देवा इह (लोपः शाकल्यस्य) । अत्र यलोपस्य असिद्धत्वाद् न स्वरसन्धिः । यलोपाभावे- देवायिह ।

### यकारलोपविधायकं विधिसूत्रम्

**हलि सर्वेषाम् ८ । ३ । २२ ॥**

**भोभगोअघोअपूर्वस्य यस्य लोपः स्याद्धलि । भो देवाः । भगो नमस्ते । अघो याहि ॥**

(भो-भगो-अघो-अपूर्वस्य, यस्य, लोपः, हलि, सर्वेषाम्)

सरलार्थः- हलि परे भोभगोअघोपूर्वस्य अवर्णपूर्वस्य च यकारस्य नित्यं लोपः भवति ।

'भोस् देवाः' इति स्थिते 'ससजुषो रुः' इति सकारस्य रुत्वेऽनुबन्धलोपे 'भोर् देवाः', 'भोभगो...' इत्यादिना रेफस्य यत्वे 'भोय् देवा' इत्यत्र अनेन सूत्रेण यकारस्य लोपे 'भो देवाः' इति रूपं सिद्धम् । एवंरीत्या 'भगोस् नमस्ते' - भगोर् नमस्ते - भगोय् नमस्ते - भगो नमस्ते । एवम् अघोस् याहि = अघो याहि ।

### रेफादेशविधायकं विधिसूत्रम्

**रोऽसुपि ८ । २ । ६९ ॥**

**अह्नो रेफादेशो न तु सुपि । अहरहः । अहर्गणः ॥**

(पदस्य, अह्नः, रः, असुपि)

सरलार्थः- अहन्-शब्दस्य स्थाने रेफादेशो भवति, सुप्-भिन्ने परे ।

'अहन् अहः' इति स्थिते अनेन सूत्रेण अहन्शब्दस्य नकारस्य रेफादेशे 'अहरहः' इति रूपं सिद्ध्यति । रेफादेशविधानेन रुत्वस्य अभावाद् अत्र 'अतो रोरप्लुतादप्लुते' इति उत्वं न । 'अहन् गणः' - अहर् गणः - अहर्गणः इत्यत्र च 'हशि च' इति उत्वं न ।

### अभ्यासः

१. **प्रश्नानामुत्तरं लिखत**

(क) 'वा शरि' इति सूत्रं किं करोति ?

(ख) पदान्तस्य सस्य रुः आदेशः केन सूत्रेण क्रियते ?

(ग) अप्लुते अति परे उकारविधायकं सूत्रं किम् ?

(घ) 'हलि सर्वेषाम्' इति सूत्रं किं करोति ?

(ङ) 'अहरहः' इत्यत्र 'अतो रोरप्लुतादप्लुते' इति कथं न प्रवर्तते ?

**२ सिद्धरूपाणि लिखत**

कष्णाः + तत्र = ..........

छात्रः + शेते= ..........

देवः + अयम् = ..........

रामः + अस्ति= ..........

कः + अपि= ..........

रमेशः + गच्छति = ..........

बालः + हसति= ..........

पुत्रः + आगच्छति ..........

देवाः + नम्याः = ..........

**३. सन्धिविच्छेदं कुरुत**

सोऽयम्, वचनोऽनुनासिकः, हरिरवदत्, पितुरिच्छा, बालस्स्वपिति, भूपालोऽवदत्, पुत्रो भाषते, अहरहः

**४. रेखाङ्कनेन सम्बद्धशब्दं योजयत**

| | |
|---|---|
| (क) हृषीकेशो गदति | रोऽसुपि |
| (ख) हरिःशेते | अतो रोरप्लुतादप्लुते |
| (ग) शिवोऽवदत् | रुः |
| (घ) अहर्गणः | हशि च |
| (ङ) ससजुषो रुः | वा शरि |

**५. निर्दिष्टप्रयोगान् संसाध्य वाक्येषु योजयत**

(क) हरिश्शेते (ख) शिवोऽर्च्यः (ग) भो देवाः

(घ) शिवो वन्द्यः (ङ) विष्णुस्त्राता

विसर्गसन्धिप्रकरणे

# रेफलोप-सुलोपादिसन्धिः

## रेफलोपविधायकं विधिसूत्रम्

**रो रि ८ । ३ । १४ ॥**

**रेफस्य रेफे परे लोपः ॥**

(रः, लोपः, रि)

सरलार्थः- रेफे परे रेफस्य लोपो भवति ।

## दीर्घादेशविधायकं विधिसूत्रम्

**ढ्रलोपे पूर्वस्य दीर्घोऽणः ६ । ३ । १११ ॥**

**ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः । पुना रमते । हरी रम्यः । शम्भू राजते । अणः किम् ? तृढः । वृढः ।**

(ढ्रलोपे, पूर्वस्य, अणः, दीर्घः)

सरलार्थः- ढकारस्य रेफस्य च लोपनिमित्तके क्रमेण ढकारे रेफे च परे पूर्वस्य अणः स्थाने दीर्घो भवति ।

'पुनर् रमते' इति स्थिते 'रो रि' इति सूत्रेण रेफे परे रेफस्य लोपे 'पुन रमते' इति जाते, रेफलोपनिमित्तके रमतेशब्दावयवे रेफे परे अनेन सूत्रेण नकाराद् अकारस्य दीर्घादेशे 'पुना रमते' इति रूपं सिद्धम् । एवंरीत्या 'हरिर् रम्यः' - हरि रम्यः - हरी रम्यः । 'शम्भुर् राजते' - शम्भु राजते - शम्भू राजते ।

'तृढ् ढ', 'वृढ् ढ' इति स्थिते पूर्वढकारस्य 'ढो ढे लोपः' इति सूत्रेण लोपे, ढकारलोपनिमित्तके ढकारे परे पूर्वस्य अणः एव दीर्घविधानाद् अत्र ऋकारस्य दीर्घो न ।

'मनस् रथः' इति स्थिते सकारस्य 'ससजुषो रुः' इति सूत्रेण रुत्वेऽनुबन्धलोपे 'मनर् रथः' इत्यवस्थायां 'हशि च' इति सूत्रेण रेफस्य उत्वे प्राप्ते, 'रो रि' इति सूत्रेण रेफस्य लोपे च प्राप्ते बलाबलत्वनियामकं सूत्रम् आह-

## परशास्त्रस्य बलवत्त्वनियामकं नियमसूत्रम्

**विप्रतिषेधे परं कार्यम् १ । ४ । २ ॥**

**तुल्यबलविरोधे परं कार्यं स्यात् । इति लोपे प्राप्ते । पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वा-दुत्वमेव । मनोरथः ॥**

सरलार्थः- तुल्यबलविरोधे सति परकार्यस्य बलवत्त्वं बोध्यम् । तुल्यबलविरोधो नाम अन्यत्रान्यत्रलब्धावकाशयोः उभयोः शास्त्रयोः युगपत्प्राप्तिः । अत्र च 'हशि च' इति शास्त्रं 'शिवो वन्द्यः' इत्यत्र चरितार्थम्, 'रो रि' इति शास्त्रं 'पुना रमते' इत्यत्र चरितार्थम्, उभयोः एकत्र 'मनर् रथः' इत्यत्र प्राप्तिरस्ति, अतः अत्र विप्रतिषेधो वर्तते । विप्रतिषेधे सति परकार्यस्य अनेन सूत्रेण बलवत्वबोधनाद् 'रो रि' इति रेफस्य लोपे प्राप्ते 'पूर्वत्रासिद्धम्' इति 'रो रि' इत्यस्य त्रिपादीत्वेन असिद्धत्वबोधनाद् 'मनर् रथः' इत्यत्र 'हशि च' इत्यनेन उत्वे कृते 'आद् गुणः' इति गुणे, वर्णयोगे 'मनोरथः' इति रूपं सिद्ध्यति ।

## सुलोपविधायकं विधिसूत्रम्

**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६ । १ । १३२ ॥**

**अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे । एष विष्णुः । स शम्भुः । अकोः किम् ? एषको रुद्रः । अनञ्समासे किम् ? असः शिवः । हलि किम् ? एषोऽत्र ॥**

(अकोः, एतत्तदोः, सुलोपः, हलि, अनञ्समासे)

सरलार्थः- अकच्प्रत्ययरहिताद् एतत्शब्दात् तत्शब्दाद् वा विहितः यः सु-प्रत्ययः तस्य लोपो भवति, हलि परे, नञ्समासे तु न ।

'एषस् विष्णुः' इति स्थिते एतद्-शब्दाद् विहितस्य सुप्रत्ययस्य सकारस्य अनेन हलि वकारे परे लोपे 'एष विष्णुः' इति साधु । एवंरीत्या- 'स शम्भुः' ।

अकच्प्रत्ययरहितयोः एतत्तदोः कथनेन यत्र अकच्प्रत्ययविशिष्टः एतत्तत्शब्दसम्बद्धः सुः, तत्र लोपो न, यथा- एषको रुद्रः । अत्र हि एतत्शब्दाद् अकच्प्रत्ययः विहितो वर्तते ।

अनञ्समासे इति कथनेन यत्र नञ्समासो भवति तत्र अस्य सूत्रस्य प्रवृत्तिर्न । यथा- 'असः शिवः' । न सः इति असः ।

हलि परे सत्येव इति कथनेन अचि परे न भवति, अत एव 'एषोऽत्र' इत्यत्र सुलोपो न ।

## सकारलोपविधायकं विधिसूत्रम्

**सोऽचि लोपे चेत्पादपूरणम् ६ ।१ ।१३४ ॥**

**स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत । सैष दाशरथी रामः । सेमामविड्ढि प्रभृतिम् ॥**

(लोपे, पादपूरणम्, चेत्, सः, अचि, लोपः)

सरलार्थः- तद्-शब्दसम्बद्धस्य सु-प्रत्ययस्य लोपो भवति, अचि परे, लोपे सत्येव पादस्य पूर्तिः भवति चेत् ।

'सस् एष दाशरथी रामः' इत्यत्र सुप्रत्ययस्य सकारस्य लोपे सत्येव पादस्य पूर्तिरस्तीत्यतः अनेन सूत्रेण सुसम्बद्धस्य सकारस्य लोपे, 'वृद्धिरेचि' इति सूत्रेण वृद्धौ 'सैष दाशरथी रामः' इति साधु । एवंरीत्या 'सस् इमामविड्ढि प्रभृतिम्' इत्यत्र अनेन सलोपः, ततो गुण इति बोध्यम् ।

## अभ्यासः

१. **अधो लिखितानि सूत्राणि शुद्धतया उच्चारयत**

(क) ढ्रलोपे पूर्वस्य दीर्घोऽणः

(ख) विप्रतिषेधे परं कार्यम्

(ग) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि

(घ) सोऽचि लोपे चेत्पादपूरणम्

२. **निर्दिष्टप्रश्नानाम् उत्तराणि प्रदत्त**

(क) 'रो रि' इति सूत्रं किं करोति ?

(ख) 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रस्य कोऽर्थः ?

(ग) तुल्यबलविरोधो नाम किम् ?

(घ) 'एतत्तदोः सुलोपो......' इति सूत्रं प्रपूर्य तस्य कार्यं लिखत ।

(ङ) 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रे 'अण्' इत्यनेन के वर्णा गृह्यन्ते ?

३. **रिक्तस्थानानि पूरयत**

(क) विष्णुर् + राजते =..................................

(ख) सस् + पठति = .........................................

(ग) एषस् + विष्णुः =.........................................

(घ) पुनर् + रमते =.......................................

(ङ) ऊढ् + ढ = ...............................................

४. **अधो निर्दिष्टशब्दानां ससूत्रं साधुत्वं प्रतिपाद्य वाक्येषु योजयत**

(क) हरी रम्यः (ख) मनोरथः

(ग) स शम्भुः (घ) सैष दाशरथी रामः

५. **तुल्यबलविरोधत्वं प्रतिपाद्य 'विप्रतिषेधे परं कार्यम्' इति सूत्रस्य अर्थं लिखत ।**

चतुर्दशः पाठः

अजन्तपुँल्लिङ्गप्रकरणे

# सुबन्तपदपरिचयः

- पदानि द्विविधानि भवन्ति- १. सुबन्त-पदानि २. तिङन्त-पदानि ।
- सुबन्तपदानां निरूपणं सुबन्तप्रकरणे भवति ।
- प्रातिपदिकानाम् अन्ते सुप्-प्रत्ययानां योजनेन सुबन्त-पदानि निर्मीयन्ते ।
- सुप्-प्रत्ययाः सर्वेभ्यः प्रातिपदिकेभ्य उत्पद्यन्ते ।
- वाक्ये प्रयुक्ताः सर्वे शब्दाः पदसंज्ञका भवन्ति ।
- पदत्वम् अनापन्नाः शब्दा भाषायां प्रयोगाय अयोग्या भवन्ति ।

**पद-परिचयः**

पदानि द्विविधानि भवन्ति- सुबन्तानि, तिङन्तानि च । द्विविधानां पदानां निर्देशनं 'सुप्तिङन्तं पदम्' इति सूत्रेण विहितमस्ति । सर्वाणि प्रातिपदिकानि धातवश्च पदत्वम् आपद्य एव वाक्ये प्रयोगाय योग्या भवन्ति, 'अपदं न प्रयुञ्जीत' इति नियमात् । अत एव भाषायां प्रयुक्तानां सर्वविधानां शब्दानां पदत्वसाधनम् आवश्यकं भवति । पदत्वं च सुप्-प्रत्ययैः, तिङ्-प्रत्ययैश्च साध्यते ।

येषाम् अन्ते सुप्-प्रत्यया भवन्ति, ते सुबन्तपदानि कथ्यन्ते । सुप्-प्रत्ययाश्च प्रातिपदिकाद् विधीयन्ते । सुबन्तपदानि संज्ञा-सर्वनाम-विशेषणादीनां वाचकानि भवन्ति । तिङन्तपदानि तु धातुना सह तिङ्-प्रत्ययानां योजनेन निष्पद्यन्ते, तानि च क्रियावाचीनि भवन्ति । तिङन्तपदानां निरूपणाय तिङन्तप्रकरणं निर्मितं विद्यते, तत्रैव तेषाम् अध्ययनं भविष्यति । अत्र सुबन्तप्रकरणे सुबन्तपदानां निरूपणं विहितमस्ति ।

**प्रातिपदिक-परिचयः**

'प्रातिपदिकम्' इति व्याकरणशास्त्रे पठितासु विविधासु पारिभाषिकीषु संज्ञासु अन्यतमा संज्ञा वर्तते । प्रातिपदिकानाम् अन्ते सु, औ, जस् इत्यादीनाम् एकविंशतेः सुप्-प्रत्ययानां योजनेन सुबन्तपदानि निष्पद्यन्ते । तत्र ते शब्दा एव प्रातिपदिकसंज्ञां लभन्ते ये-

- अर्थवन्तः सन्ति । (अर्थयुक्तानाम् एव शब्दानां प्रातिपदिकसंज्ञा भवति ।)
- धातवो न सन्ति ।

- प्रत्यया न सन्ति ।

- कृत्-प्रत्ययान्ताः, तद्धित-प्रत्ययान्ताः, समासाश्च सन्ति । (प्रत्ययान्त-शब्देषु केवलं कृदन्त-तद्धितान्तशब्दा एव प्रातिपदिकसंज्ञका भवन्ति ।)

## सुप्-प्रत्यय-परिचयः

सुप्-प्रत्यया एकविंशतिसङ्ख्यकाः सन्ति । 'सुप्' इति प्रत्याहारो वर्तते, तेन 'सु' इत्यारभ्य सुप्पर्यन्तानाम् अधो निर्दिष्टानां प्रत्ययानां बोधो भवति । सर्वाणि प्रातिपदिकानि एतैः प्रत्ययैः पदत्वम् आपद्य एव वाक्ये प्रयोगाय योग्या भवन्ति । एते प्रत्ययाः सुप्, स्वादिः, विभक्तिः इत्येतैः शब्दैर्व्यवह्रियन्ते । सुप्-प्रत्ययाः, तेषाम् अनुबन्धविनिर्मुक्तस्वरूपाणि च यथा-

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सु (स्) | औ | जस् (अस्) | - प्रथमा |
| अम् | औट् (औ) | शस् (अस्) | - द्वितीया |
| टा (आ) | भ्याम् | भिस् | - तृतीया |
| ङे (ए) | भ्याम् | भ्यस् | - चतुर्थी |
| ङसि (अस्) | भ्याम् | भ्यस् | - पञ्चमी |
| ङस् (अस्) | ओस् | आम् | - षष्ठी |
| ङि (इ) | ओस् | सुप् (सु) | - सप्तमी |

सुप्-प्रत्ययानां विविधसमूहान् निर्माय प्रयोगसिद्धिप्रक्रियायाम् उपयोगिन्यः काश्चन विशिष्टसंज्ञाः परिकल्पिताः सन्ति । ताश्च यथा-

**सर्वनामस्थानम्** = पुं-स्त्रीलिङ्गे- सु, औ, जस्, अम्, औट् । नपुंसकलिङ्गे- जस्, शस् ।

**औङ्** = औ, औट् । **आङ्** = टा ।

**आप्** = टा (आ), भ्याम्, भिस्, ङे (ए), भ्याम्, भ्यस्, ङसि (अस्), भ्याम्, भ्यस्, ङस् (अस्), ओस्, आम्, ङि (इ), ओस्, सुप् (सु) ।

**ङित्** = ङे (ए), ङसि (अस्), ङस् (अस्), ङि (इ) ।

**अजादिः** = औ, जस् (अस्), अम्, औट् (औ), शस् (अस्), टा (आ), ङे (ए), ङसि (अस्), ङस् (अस्), ओस्, आम्, ङि (इ), ओस् ।

**हलादिः** = सु (स्), भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप् (सु) ।

भादिः = भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस् ।

**शब्दरूप-परिचयः**

राम-प्रातिपदिके उक्तानां सुप्-प्रत्ययानां योजनाद् अधो लिखितानि रूपाणि जायन्ते-

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| रामः (सु) | रामौ (औ) | रामाः (जस्) | - प्रथमा |
| रामम् (अम्) | रामौ (औट्) | रामान् (शस्) | - द्वितीया |
| रामेण (टा) | रामाभ्याम् (भ्याम्) | रामैः (भिस्) | - तृतीया |
| रामाय (ङे) | रामाभ्याम् (भ्याम्) | रामेभ्यः (भ्यस्) | - चतुर्थी |
| रामात्-द् (ङसि) | रामाभ्याम् (भ्याम्) | रामेभ्यः (भ्यस्) | - पञ्चमी |
| रामस्य (ङस्) | रामयोः (ओस्) | रामाणाम् (आम्) | - षष्ठी |
| रामे (ङि) | रामयोः (ओस्) | रामेषु (सुप्) | - सप्तमी |
| हे राम ! (सु) | हे रामौ ! (औ) | हे रामाः ! (जस्) | - सम्बोधनम् |

उक्तानां सर्वेषाम् अपि रूपाणां प्रातिपदिकम् 'राम' इत्यस्ति । राम-शब्दः अकारान्तः, पुँल्लिङ्गश्च वर्तते । बालक-कृष्ण-विद्यालय-इत्यादीनाम् अकारान्त-पुँल्लिङ्गप्रातिपदिकानां रूपाणि अपि राम-शब्दवद् भवन्ति ।

एवमेव सर्वेषां प्रातिपदिकानाम् अन्ते एतेषाम् एव एकविंशतेः सुप्-प्रत्ययानां योजनेन पदानि निर्मीयन्ते । यथा- बालका + जस् = बालकाः । एतादृशानां सुबन्तपदानां ससूत्रं विस्तरेण निरूपणम् अग्रे अस्मिन् एव प्रकरणे विधीयते ।

## वाक्येषु प्रयोगानुशीलनम्

१. रामः पठति । बालकः खादति ।
२. अहं रामं पश्यामि । अहं पाठं पठामि ।
३. केशवः रामेण सह क्रीडति । स हस्तेन लिखति ।
४. शिक्षकः रामाय पुस्तकं ददाति । देवाय नमः ।
५. रामस्य जनकस्य नाम दशरथः अस्ति । कृष्णस्य जननी देवकी वर्तते ।

## अभ्यासः

१. **पाठाधारेण परस्परं मेलयित्वा अभ्यासपुस्तिकायां वाक्यानि लिखत**

| | |
|---|---|
| सुप् | द्विविधानि । |
| सुप्तिङन्तम् | औ, औट् । |
| पदानि | न प्रयुञ्जीत । |
| अपदम् | विभक्तिः, प्रत्ययश्च । |
| औङ् | पदम् । |

२. **पाठं पठित्वा कोष्ठस्थेन समुचितपदेन रिक्तस्थानं पूरयत**

(क) सुबन्तपदानि ..................... निर्मीयन्ते । (सुप्-प्रत्ययैः, तिङ्-प्रत्ययैः)

(ख) 'राम+टा' इत्यस्मात् ..................... इति रूपं भवति । (रामम्, रामेण)

(ग) ..................... आदाय प्रत्ययानाम् अजादित्व-हलादित्वविवेकः कर्तव्यः । (औपदेशिक-स्वरूपम्, अनुबन्धविनिर्मुक्त-स्वरूपम्)

(घ) वचनानि ..................... भवन्ति । (त्रीणि, चत्वारि)

(ङ) सुप्-प्रत्याहारे ..................... स्वादि-प्रत्ययाः समायान्ति । (एकादश, एकविंशतिः)

३. **अधस्तनानां प्रत्ययानाम् अनुबन्धविनिर्मुक्तानि स्वरूपाणि लिखत**

जस् - ...........    औट् - ...........    शस् - ...........    टा - ...........

ङे - .............    ङसि - ...........    ङस् - ...........    सुप् - ...........

४. **प्रदत्तासु अवस्थासु जायमानं रूपं लिखत**

राम+औ = ...............    राम+अम् = ...............    राम+भिस् = ...............

राम+आम् = ..............    राम+भ्याम् = ............    राम+ङसि = ...............

**५. एकवाक्येन उत्तरं लिखत**

(क) पदानि कतिविधानि भवन्ति ?

(ख) सुप्-प्रत्ययाः कस्य अन्ते संयोज्यन्ते ?

(ग) प्रातिपदिकानि केषां योजनेन पदानि भवन्ति ?

(घ) सुप्-प्रत्ययेषु ङित्-प्रत्ययाः के ?

(ङ) 'सर्वनामस्थानम्' इति पदेन केषां बोधो भवति ?

**६. अधस्तनप्रश्नानाम् उत्तरं लिखत**

(क) कीदृशाः शब्दाः प्रातिपदिकसंज्ञां लभन्ते ?

(ख) राम-शब्दस्य सर्वाणि रूपाणि लिखत ।

(ग) सुप्-प्रत्ययाः के सन्ति ? विभक्तिवचनानि निर्दिश्य लिखत ।

(घ) हलादि-सुब्विभक्तयः काः ?

(ङ) बहुवचन-सुप्प्रत्ययेषु अजादि-हलादिप्रत्ययान् पृथक्कुरुत ।

पञ्चदशः पाठः

अजन्त-पुँल्लिङ्गप्रकरणे

# अकारान्त-शब्दाः- १

## प्रातिपदिकसंज्ञाविधायकं सूत्रम्

**अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १ । २ । ४५ ॥**

**धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ॥**

(अर्थवत्, अधातुः, अप्रत्ययः, प्रातिपदिकम्)

सरलार्थः- योऽर्थवान् शब्दो धातुसंज्ञकः, प्रत्ययसंज्ञकः, प्रत्ययान्तश्च नास्ति, तस्य 'प्रातिपदिकम्' इति संज्ञा भवति । यस्मिन् शब्दे अर्थानुरूपं प्रकृतिप्रत्यययोरन्वेषणं न क्रियते, तादृशः शब्दोऽव्युत्पन्नः कथ्यते । यत्र च प्रकृति-प्रत्यययोः, तयोः अर्थस्य च स्पष्टतया प्रतिपत्तिर्भवति, तादृश-शब्दो व्युत्पन्नो भवति । अनेन सूत्रेण अव्युत्पन्नानाम् एव शब्दानां प्रातिपदिकसंज्ञा भवति ।

यदा राम-शब्दः कस्यचिद् व्यक्तेः संज्ञारूपेण प्रयुज्यते तदा तस्य अव्युत्पन्नतया अनेन सूत्रेण प्रातिपदिकसंज्ञा भवति ।

## प्रातिपदिकसंज्ञाविधायकं सूत्रम्

**कृत्तद्धितसमासाश्च १ । २ । ४६ ॥**

**कृत्तद्धितान्तौ समासाश्च तथा स्युः ॥**

(कृत्-तद्धित-समासाः, च)

सरलार्थः- कृत्-प्रत्ययान्तानां शब्दानाम्, तद्धित-प्रत्ययान्तानां शब्दानाम्, समासप्रक्रियया निष्पन्नानां शब्दानां च 'प्रातिपदिकम्' इति संज्ञा भवति ।

पूर्वसूत्रेण अव्युत्पन्नशब्दानाम्, अनेन सूत्रेण च व्युत्पन्नशब्दानां प्रातिपदिकसंज्ञा विधीयते ।

'रमन्ते योगिनः अस्मिन्' इत्यर्थे रम्-धातोः घञ्प्रत्ययेन निष्पन्नस्य राम-शब्दस्य कृदन्ततया (व्युत्पन्नतया) अनेन सूत्रेण प्रातिपदिकसंज्ञायाम्-

## सुप्-प्रत्ययविधायकं विधिसूत्रम्

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ४ ।१ ।२ ।।**

**सु औ जस् इति प्रथमा । अम् औट् शस् इति द्वितीया । टा भ्याम् भिस् इति तृतीया । ङे भ्याम् भ्यस् इति चतुर्थी । ङसि भ्याम् भ्यस् इति पञ्चमी । ङस् ओस् आम् इति षष्ठी । ङि ओस् सुप् इति सप्तमी ॥**

(ङी-आप्-प्रातिपदिकात्, परः, सु-औ-जस्-अम्-औट्-शस्-टा-भ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्-भ्यस्-ङस्-ओस्-आम्-ङि-ओस्-सुप्, प्रत्ययः)

सूत्रेऽस्मिन् एकविंशतेः सुप्-प्रत्ययानां सङ्ग्रहो वर्तते । एते प्रत्ययाः सुबन्तपदसम्पादकाः सन्ति । प्रातिपदिकानाम् अन्ते एतेषां प्रत्ययानां संयोजनेन सुबन्तपदानि निष्पद्यन्ते । सु, औ, जस् इत्यादीन् सुप्प्रत्ययान् यथाक्रमं प्रतिसमूहं त्रीन् त्रीन् कृत्वा सप्तसु समूहेषु विभज्यन्ते । प्रतिसमूहं त्रयाणां प्रत्ययानां सङ्घत्वाद् एते समूहाः त्रिकाः कथ्यन्ते । एतेषां त्रिकाणां नामकरणं पाणिनिपूर्वैः आचार्यैः प्रथमादि सप्तम्यन्तं विहितं वर्तते । तदेव अनुसृत्य पाणिनिना सूत्रेषु प्रथमा-द्वितीयादिशब्दैः एतेषां निर्देशः कृतोऽस्ति ।

## अधिकारसूत्रम्

**ङ्याप्प्रातिपदिकात् ४ ।१ ।१ ॥**

(ङी-आप्-प्रातिपदिकात्)

अस्मात् सूत्रात् (४ ।१ ।१) आरभ्य पञ्चमाध्यायस्य समाप्तिपर्यन्तम् अस्य व्याप्तिर्वर्तते । अत्र 'ङी' इत्यनेन ङीप्, ङीष्, ङीन् इति त्रयाणां ग्रहणम् । 'आप्' इत्यनेन च टाप्, चाप्, डाप् इति त्रयाणां स्त्रीप्रत्ययानां ग्रहणम् । यस्य अन्ते 'ङी' भवति स 'ङ्यन्तः', ङीप्-ङीष्-ङीन्प्रत्ययान्तः इत्यर्थः । एवमेव 'आप् अन्ते येषां ते' इति कृत्वा टाप्-चाप्-डाप्प्रत्ययान्ताः शब्दा आबन्ताः कथ्यन्ते ।

**सरलार्थः**- अस्य सूत्रस्य अधिकारे (चतुर्थ-पञ्चमयोरध्याययोः) ये केऽपि प्रत्यया वक्ष्यन्ते, ते सर्वे ङ्यन्तात्, आबन्तात्, प्रातिपदिकात् च परे भवन्ति ।

## प्रत्ययाधिकारसूत्रम्

**प्रत्ययः ३ ।१ ।१ ॥**

**सरलार्थः**- अस्य अधिकारसूत्रस्य व्याप्तिः तृतीय-चतुर्थ-पञ्चमेषु अध्यायेषु वर्तते । प्रत्ययशब्दश्च अत्र संज्ञारूपेण अधिक्रियते । अतः एतेषु त्रिषु अध्यायेषु विधीयमानाः शब्दाः प्रत्ययसंज्ञका भवन्ति । अस्य अधिकारे विहितत्वात् एव सु, औ, जस् इत्यादयः प्रत्ययाः कथ्यन्ते ।

## अधिकारसूत्रम्

**परश्च ३ । १ । २ ॥**

**इत्यधिकृत्य । ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः ॥**
(प्रत्ययः, परः, च)

**सरलार्थः**- अस्मात् सूत्रात् पञ्चमाध्यायस्य समाप्तिपर्यन्तम् (तृतीय-चतुर्थ-पञ्चमेषु अध्यायेषु) ये प्रत्यया वक्ष्यन्ते, ते प्रकृतेः परे भवन्ति । अनेन सर्वे प्रत्ययाः प्रकृतेः अनन्तरम् आगच्छन्ति इति बोध्यते । प्रकृतिश्च धातुरूपा, प्रातिपदिकरूपा च भवितुम् अर्हति ।

'स्वौजसमौट्....' इत्यादीनि चत्वारि सूत्राणि एकीकृत्य फलितोऽर्थः भवति - ङ्यन्तात्, आबन्तात्, प्रातिपदिकात् च परे सु, औ, जस् इत्यादयः प्रत्ययाः (एकविंशतिः सुप्-प्रत्ययाः) स्युः ।

राम-प्रातिपदिकात् 'ङ्याप्प्रातिपदिकात्' इत्यादीनां त्रयाणाम् अधिकारसूत्राणां सहकारेण 'स्वौजसमौट्....' इत्यादिना सूत्रेण स्वादिषु सर्वेषु प्रत्ययेषु एकत्रैव प्राप्तेषु-

## एक-द्वि-बहुवचनसंज्ञाविधायकं सूत्रम्

**सुपः १ । ४ ।१०३ ॥**

**सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः ॥**
(सुपः, त्रीणि, त्रीणि, एकशः, एकवचन-द्विवचन-बहुवचनानि)

**सरलार्थः**- सुप्-प्रत्ययानां त्रीणि त्रीणि वचनानि क्रमेण एकवचन-द्विवचन-बहुवचनसंज्ञकानि भवन्ति । अनेन सूत्रेण 'सु, औ, जस्' इत्यादीनां पूर्वोक्तानां त्रिकाणां प्रत्येकम् एकवचनादिसंज्ञाः विधीयन्ते । तेन सु, अम्, टा, ङे, ङसि, ङस्, ङि इति सप्तप्रत्यया एकवचनसंज्ञां लभन्ते । तथैव औ, औट्, भ्याम्, भ्याम्, भ्याम्, ओस्, ओस् इत्येते द्विवचनसंज्ञका भवन्ति । एवमेव जस्, शस्, भिस्, भ्यस्, भ्यस्, आम्, सुप् इत्येते बहुवचनसंज्ञकाः प्रत्ययाः भवन्ति ।

अनेन सुप्-प्रत्ययानाम् उक्तरीत्या प्रतिविभक्ति एकवचनादिसंज्ञायाम्, प्रातिपदिकार्थमात्रस्य विवक्षायाम् राम-प्रातिपदिकात् प्रथमायाः त्रिषु एव प्रत्ययेषु प्राप्तेषु सूत्रम् आह-

## एक-द्विवचनविधायकं विधिसूत्रम्

**द्व्येकयोर्द्विवचनैकवचने १ । ४ । २२ ॥**

**द्वित्वैकत्वयोरेते स्तः ॥**
(द्वि-एकयोः, द्विवचन-एकवचने)

सरलार्थः- प्रातिपदिकार्थगतायाः एकत्वसङ्ख्याया विवक्षायाम् एकवचनस्य, द्वित्वसङ्ख्याया विवक्षायां द्विवचनस्य च प्रयोगो भवति । वक्तुम् इच्छा इति विवक्षा । यत्र एकस्य विवक्षा भवति, तत्र एकवचनसंज्ञकः प्रत्ययः विधातव्यः, यत्र च द्वयोर्विवक्षा भवति, तत्र द्विवचनसंज्ञकः प्रत्ययः विधातव्यः । यथा- बालकः पठति । बालकौ पठतः ।

अनेन सूत्रेण एकत्वसङ्ख्याया विवक्षायाम् राम-इत्यस्मात् प्रातिपदिकात् प्रथमाया एकवचने सु-प्रत्यये 'राम सु' इति जाते, 'सु' इत्यस्य उकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञायाम् 'तस्य लोपः' इत्यनेन लोपे 'रामस्' इत्यवस्थायां सुबन्तत्वात् 'सुप्तिङन्तं पदम्' इति सूत्रेण पदसंज्ञायाम् 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सकारस्य स्थाने रुत्वेऽनुबन्धलोपे 'रामर्' इति जाते-

## अवसान-संज्ञाविधायकं सूत्रम्

**विरामोऽवसानम् । १ । ४ । ११० ॥**

**वर्णानामभावोऽवसानसंज्ञः स्यात् । रुत्वविसर्गौ । रामः ॥**

(विरामः, अवसानम्)

सरलार्थः- कस्यचिद् वर्णस्य उच्चारणाद् उत्तरं वर्णान्तरस्य उच्चारणस्य अभावः 'अवसानम्' इति संज्ञया व्यवहर्तव्यः ।

अनेन सूत्रेण 'रामर्' इत्यत्र रेफाद् अनन्तरं वर्णान्तरस्य उच्चारणाभावे तस्य अवसानसंज्ञायाम् 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गादेशे 'रामः' इति रूपं सिद्ध्यति । राम-शब्दस्य पदत्वम् आपन्नम् 'रामः' इति रूपं वाक्ये प्रयोगार्हो भवति, यथा- रामः पठति ।

## एकशेष-विधायकं विधिसूत्रम्

**सरूपाणामेकशेष एकविभक्तौ १ । २ । ६४ ॥**

**एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते ॥**

(एकविभक्तौ, सरूपाणाम्, एव, एकशेषः)

सरलार्थः- समानानि रूपाणि येषां ते 'सरूपाः', सर्वासु विभक्तिषु येषां शब्दानां रूपाणि समानानि सन्ति ते इत्यर्थः । सरूपाणां शब्दानां समानविभक्तौ परत एकशेषो भवति इति सूत्रार्थः । 'एकशेषः' इति पदेन अनेकेषु एक एव अवशिष्यते, अन्ये लुप्यन्ते इति बोध्यते । तत्र यः शिष्यते स लुप्तस्य अपि बोधको भवति ।

द्वयोः रामयोः विषये वक्तव्ये 'द्व्येकयोर्द्विवचनैकवचने' इत्यनेन द्विवचनत्वे, अनेन सूत्रेण एकस्य एव राम-शब्दस्य शेषे प्रथमाया द्विवचने औ-प्रत्यये 'राम औ' इति जाते-

### पूर्वसवर्णदीर्घ-विधायकं विधिसूत्रम्

**प्रथमयोः पूर्वसवर्णः ६ ।१ ।१०२ ॥**

**अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात् । इति प्राप्ते ॥**

(अकः, प्रथमयोः, अचि, पूर्वपरयोः, एकः, पूर्वसवर्णः, दीर्घः)

**सरलार्थः**- अक्-प्रत्याहारस्थवर्णात् प्रथमा-द्वितीया-विभक्तिसम्बन्धिनि अचि परे सति पूर्वपरयोः स्थाने पूर्वस्य सवर्णेषु दीर्घरूप एकादेशो भवति । पूर्वसवर्णदीर्घविधौ पूर्वस्य अन्त्यवर्णम्, परस्य आद्यवर्णं च विस्थाप्य तयोः स्थाने पूर्ववर्णस्य सवर्णेषु दीर्घरूपवर्ण एकादेशरूपेण स्थाप्यते । 'राम औ' इत्यवस्थायाम् एकादेशवृद्धिं बाधित्वा अनेन सूत्रेण पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घे (अकार-औकारयोः स्थाने आकारादेशे) प्राप्ते-

### पूर्वसवर्णदीर्घ-निषेधकं सूत्रम्

**नादिचि ६ ।१ ।१०४ ॥**

**आदिचि न पूर्वसवर्णदीर्घः । वृद्धिरेचि । रामौ ॥**

(आत्, इचि, प्रथमयोः, पूर्वसवर्णः, न)

**सरलार्थः**- अवर्णाद् इच्-प्रत्याहारस्थे वर्णे परे 'प्रथमयोः पूर्वसवर्णः' इत्यनेन प्राप्तः पूर्वसवर्णदीर्घो न भवति ।

अनेन सूत्रेण पूर्वसवर्णदीर्घस्य निषेधे 'राम औ' इत्यवस्थायाम् 'बाधकाभावे पुनरुत्सर्गशास्त्रस्य प्रवृत्तिः' इति परिभाषया पुनः 'वृद्धिरेचि' इति वृद्धौ, पूर्वपरयोः स्थाने औकार एकादेशे, वर्णयोगे 'रामौ' इति रूपम् ।

### बहुवचनविधायकं विधिसूत्रम्

**बहुषु बहुवचनम् १ ।४ ।२१ ॥**

**बहुत्वविवक्षायां बहुवचनं स्यात् ॥**

**सरलार्थः**- द्वाभ्याम् अधिकं बहुत्वम् । बहुत्वसङ्ख्याया विवक्षायां बहुवचनसंज्ञक-प्रत्यया भवन्ति । यत्र त्रयाणां तदधिकानां वा विवक्षा वर्तते, तत्र बहुवचनस्य प्रयोगः कर्तव्यः ।

'रामश्च रामश्च रामश्च' इत्यर्थे एकशेषाद् राम-प्रातिपदिकाद् बहुत्वविवक्षायाम् अनेन सूत्रेण बहुवचनत्वे, प्रथमाया जस्-प्रत्यये 'राम जस्' इति स्थिते-

### इत्-संज्ञाविधायकं सूत्रम्

**चुटू १ ।३ ।७ ॥**

**प्रत्ययाद्यौ चुटू इतौ स्तः ॥**

(प्रत्ययस्य, आदिः, चुटू, इत्)

सरलार्थः- 'चुटू' इत्यनेन 'चवर्ग-टवर्गौ' इत्यर्थः । प्रत्ययस्य आदौ स्थिताः चवर्गीयाः, टवर्गीयाश्च वर्णा इत्-संज्ञका भवन्तीति सूत्रार्थः । अनेन सुप्-प्रत्ययेषु 'जस्' इत्यस्य जकारस्य, 'टा' इत्यस्य टकारस्य च इत्-संज्ञा भवति ।

अनेन सूत्रेण जकारस्य इत्संज्ञायाम् 'तस्य लोपः' इत्यनेन लोपे 'राम अस्' इति जाते, प्रत्ययस्य अन्त्यहल्वर्णत्वात् 'हलन्त्यम्' इत्यनेन सकारस्य इत्संज्ञायां प्राप्तायाम्-

### विभक्तिसंज्ञाविधायकं सूत्रम्

**विभक्तिश्च १ ।४ ।१०४ ॥**

**सुप्तिङौ विभक्तिसंज्ञौ स्तः ॥**

(सुपः, तिङः, विभक्तिः, च)

सरलार्थः- सुप्-प्रत्ययाः, तिङ्-प्रत्ययाश्च विभक्तिसंज्ञका भवन्ति । सुप्-प्रत्ययाः पूर्वमेव उक्ताः । 'तिङ्' इति तिबादीनां महिङन्तानाम् अष्टादश-प्रत्ययानां संज्ञा, एतेषां निरूपणं तिङन्तप्रकरणे विधास्यते ।

अनेन सूत्रेण जस्-प्रत्ययस्य सुप्त्वाद् विभक्तिसंज्ञायाम्-

### इत्संज्ञानिषेधकं सूत्रम्

**न विभक्तौ तुस्माः १ ।३ ।४ ॥**

**विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः । इति सस्य नेत्वम् । रामाः ॥**

(विभक्तौ, तुस्माः, इत्, न)

सरलार्थः- विभक्तौ विद्यमानाः तवर्गीयवर्णाः, सकारः, मकारश्च इत्-संज्ञका न भवन्ति । सुब्विभक्तीनाम्, तिङ्विभक्तीनाम्, तेषां स्थाने आदिश्यमानानां प्रत्ययानां च अन्ते स्थितानां त्, थ्, द्, ध्, न्, स्, म् इत्येतेषां वर्णानाम् 'हलन्त्यम्' इत्यनेन प्राप्ता इत्संज्ञा अनेन सूत्रेण निषिध्यते । तेन सुब्विभक्तिषु जसादिषु सकारस्य, अमादिषु मकारस्य, भिस्, ङसि, ङि इत्यादीनां स्थाने आदिश्यमानेषु ऐस्, आत्, स्मिन् इत्यादिषु सकार-तकार-नकारादीनां च वर्णानाम् इत्संज्ञाया अभावाद् लोपो न भवति ।

अनेन सूत्रेण सकारस्य इत्संज्ञाया निषेधे 'राम अस्' इत्यस्यामवस्थायाम्, सवर्णदीर्घं पररूपं च बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे, पूर्वपरयोः अकारयोः स्थाने आकार एकादेशे 'राम् आ स्' इत्यवस्थायाम् वर्णयोगे, सकारस्य रुत्वे, विसर्गे च 'रामाः' इति रूपं सिद्ध्यति । प्रथमाविभक्तेः रूपाणां निष्पादनानन्तरं सम्बोधनस्य रूपाणां सिद्धिप्रक्रियामाह-

### सम्बुद्धि-संज्ञाविधायकं सूत्रम्

**एकवचनं सम्बुद्धिः २ । ३ । ४९ ॥**

**सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् ॥**

(सम्बोधने, प्रथमा, एकवचनम्, सम्बुद्धिः)

**सरलार्थः**- पराभिमुखस्य स्वाभिमुखीकरणं सम्बोधनम् । सम्बोधनेऽपि प्रथमाविभक्तेरेव प्रयोगो भवतीति कारकप्रकरणस्थेन 'सम्बोधने च' इति सूत्रेण उच्यते । सम्बोधनेऽर्थे विहितस्य प्रथमाया एकवचनस्य 'सु' इति प्रत्ययस्य 'सम्बुद्धिः' इति संज्ञा भवतीति सूत्रार्थः ।

राम-प्रातिपदिकात् सम्बोधनेऽर्थे प्रथमाया एकवचने सु-प्रत्ययेऽनुबन्धलोपे 'रामस्' इत्यवस्थायाम् अनेन सूत्रेण सु-प्रत्ययस्य सम्बुद्धिसंज्ञायाम्-

### अङ्गसंज्ञाविधायकं सूत्रम्

**यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १ । ४ । १३ ॥**

**यः प्रत्ययो यस्मात् क्रियते तदादिशब्दस्वरूपं तस्मिन्नङ्गं स्यात् ॥**

(यस्मात्, प्रत्ययविधिः, तदादि, प्रत्यये, अङ्गम्)

**सरलार्थः**- यस्मात् शब्दस्वरूपात् (प्रातिपदिकाद् धातोर्वा) यः प्रत्ययो विधीयते, तस्मिन् प्रत्यये परे प्रकृतेः, प्रकृतिः आदौ यस्य तादृशस्य शब्दस्वरूपस्य च 'अङ्गम्' इति संज्ञा भवति ।

'राम स्' इत्यत्र अनेन सूत्रेण 'राम' इत्यस्य अङ्गसंज्ञायाम्-

### लोप-विधायकं विधिसूत्रम्

**एङ्ह्रस्वात् सम्बुद्धेः ६ । १ । ६९ ॥**

**एङन्तादध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत् । हे राम ! हे रामौ ! हे रामाः !**

(एङ्-ह्रस्वात्, अङ्गात्, सम्बुद्धेः, हल्, लोपः)

**सरलार्थः**- यस्य अङ्गस्य अन्ते एङ्-प्रत्याहारस्थौ (ए, ओ) वर्णौ, ह्रस्वाः (अ, इ, उ, ऋ, ऌ)

वर्णाश्च भवन्ति, तादृशाद् अङ्गात् परस्य सम्बुद्धेः अवयवस्य हल्-वर्णस्य लोपो भवति ।

'राम स्' इत्यत्र 'राम' इति ह्रस्वान्ताद् अङ्गात् परस्य सम्बुद्धिसंज्ञकस्य सकाररूप-हल्वर्णस्य अनेन सूत्रेण लोपे 'राम' इति जाते सम्बोधनसूचकस्य 'हे' शब्दस्य पूर्वप्रयोगे 'हे राम' इति रूपं साधु । अत्र हे-शब्दस्य स्थाने अन्यान् सम्बोधनसूचकान् शब्दान् प्रयुज्य ए राम, अयि राम, भो राम इत्यादीनि अपि रूपाणि प्रयोक्तुं शक्यन्ते, अथवा 'राम' इत्येव रूपमपि प्रयोक्तुं शक्यते इति स्मर्तव्यम् ।

## प्रयोगसिद्धिप्रकारः

**रामः**

राम-शब्दस्य व्युत्पत्तिपक्षे 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया एकवचने सु-प्रत्ययेऽनुबन्धलोपे 'रामस्' इति जाते, सुबन्तत्वात् 'सुप्तिङन्तं पदम्' इति सूत्रेण पदसंज्ञायाम् 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे 'रामर्' इति जाते 'विरामोऽवसानम्' इति सूत्रेण अवसानसंज्ञायाम् 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे 'रामः' इति रूपं सिद्धम् ।

## वाक्येषु प्रयोगानुशीलनम्

१. रामः लिखति । एकः बालकः लिखति ।

२. रामौ खादतः । द्वौ बालकौ खादतः ।

३. रामाः वदन्ति । त्रयः बालकाः वदन्ति ।

४. छात्राः विद्यालयं गच्छन्ति । चत्वारः बालकाः विद्यालयं गच्छन्ति ।

५. हे राम ! (त्वम्) अत्र आगच्छ । देव ! मां रक्ष ।

## अभ्यासः

**१. सूत्राणि पठित्वा अभ्यासपुस्तिकायाम् अनुलिखत**

(क) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्

(ख) एङ्ह्रस्वात् सम्बुद्धेः

(ग) ङ्याप्प्रातिपदिकात्

(घ) द्वयेकयोर्द्विवचनैकवचने

(ङ) सरूपाणामेकशेष एकविभक्तौ

२. **परस्परं मेलयत**

| | |
|---|---|
| सुपः | प्रातिपदिकसंज्ञा |
| विभक्तिश्च | अङ्गसंज्ञा |
| कृत्तद्धितसमासाश्च | विभक्तिसंज्ञा |
| एकवचनं सम्बुद्धिः | अवसानसंज्ञा |
| यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् | एकद्विबहुवचनसंज्ञाः |
| विरामोऽवसानम् | सम्बुद्धिसंज्ञा |

३. **कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) कस्यचित् पुरुषस्य संज्ञारूपेण प्रयुक्तः शब्दः ..................... भवति । (व्युत्पन्नः, अव्युत्पन्नः)

(ख) व्युत्पन्नानां शब्दानाम् ..................... इति सूत्रेण प्रातिपदिकसंज्ञा भवति । (अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च)

(ग) जस्-प्रत्ययस्य सकारस्य इत्संज्ञा ...................... इति सूत्रेण प्राप्ता । (हलन्त्यम्, चुटू)

(घ) अकः ............ अचि परे पूर्वसवर्णदीर्घः भवति । (प्रथमायाः, प्रथमाद्वितीययोः)

(ङ) सम्बोधनस्य ................ सम्बुद्धिः कथ्यते । (एकवचनम्, बहुवचनम्)

(च) 'परश्च' इति ................ वर्तते । (विधिसूत्रम्, अधिकारसूत्रम्)

४. **अधस्तन-प्रयोगेषु कः प्रत्ययो वर्तते ?**

**यथा- रामः - सु**

| | |
|---|---|
| रामाः - ............ | बालकौ - ............ |
| हे देवाः - ............ | हे बाल ! - ............ |
| कृष्णाः - ............ | विद्यालयाः - ............ |

**५. अधस्तनकार्याणां विधायकानि सूत्राणि लिखत**

(क) पूर्वसवर्णदीर्घः

(ख) अव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञा

(ग) प्रत्यययाद्योः चवर्ग-टवर्गयोः इत्संज्ञा

(घ) एकशेषः

**६. एकवाक्येन उत्तरं लिखत**

(क) सम्बोधने का विभक्तिर्विधीयते ?

(ख) 'चुटू' इत्यनेन केषां वर्णानाम् इत्संज्ञा भवति ?

(ग) 'हे राम' इत्यत्र सकारस्य लोपः केन सूत्रेण भवति ?

(घ) 'रामौ' इत्यत्र कथं पूर्वसवर्णदीर्घो न भवति ?

(ङ) 'न विभक्तौ तुस्माः' इति सूत्रं किं करोति ?

(च) विभक्तिस्थाः के वर्णा इत्संज्ञका न भवन्ति ?

(छ) 'रामौ' इति प्रयोगे प्रातिपदिक-विभक्ती निर्दिशत ।

(ज) राम-शब्दस्य सम्बोधनस्य एकवचने किं रूपम् ?

**७. अधस्तनप्रश्नानाम् उत्तरं लिखत**

(क) कीदृशाः शब्दा व्युत्पन्नाः कथ्यन्ते ?

(ख) 'स्वौजसमौट्....' इति सूत्रं पूरयित्वा सुप्प्रत्ययान् दर्शयत ।

(ग) स्वादयः प्रत्ययाः केभ्यः परे भवन्ति ?

(घ) 'विभक्तिश्च' इति सूत्रस्य अर्थं लिखत ।

(ङ) 'रामाः' इति प्रयोगस्य ससूत्रं सिद्धिप्रक्रियां दर्शयत ।

(च) 'रामौ, हे राम' इत्यनयोः प्रयोगयोः सिद्धिप्रकारं विलिखत ।

अजन्त-पुँल्लिङ्गप्रकरणे

# अकारान्त-शब्दाः- २

## पूर्वरूप-विधायकं विधिसूत्रम्

**अमि पूर्वः ६ ।१ ।१०७ ॥**

**अकोऽम्यचि पूर्वरूपमेकादेशः । रामम् । रामौ ॥**

(अकः, अमि, अचि, पूर्वपरयोः, एकः, पूर्वः, संहितायाम्)

सरलार्थः- अक्-प्रत्याहारस्थाद् वर्णाद् 'अम्' इत्यस्मिन् विद्यमाने अज्वर्णे परे पूर्वपरयोः स्थाने एकं पूर्वरूपं भवति । अनेन सूत्रेण पूर्वसवर्णदीर्घो बाध्यते ।

राम-प्रातिपदिकाद् द्वितीयाया एकवचने अम्-प्रत्यये 'राम अम्' इत्यवस्थायाम्, प्रत्ययान्तस्य मकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञायां प्राप्तायाम्, विभक्तिसंज्ञायाम् 'न विभक्तौ तुस्माः' इत्यनेन तन्निषेधे 'राम अम्' इत्येव स्थिते पूर्वसवर्णदीर्घं बाधित्वा अनेन सूत्रेण पूर्वरूप एकादेशे, वर्णयोगे 'रामम्' इति रूपं निष्पद्यते । औट्-प्रत्यये तु टकारस्य अनुबन्धलोपे 'राम औ' इति स्थिते प्रथमाया द्विवचनवत् 'रामौ' इति रूपं सिद्ध्यति ।

## इत्-संज्ञाविधायकं सूत्रम्

**लशक्वतद्धिते १ ।३ ।८ ॥**

**तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः ॥**

(प्रत्ययस्य, आदिः, ल-श-कु, अतद्धिते, इत्)

सरलार्थः- तद्धितभिन्नानां प्रत्ययानाम् आदौ स्थितानाम् लकार-शकार-कवर्गाणाम् इत्-संज्ञा भवति । तद्धितप्रत्ययं वर्जयित्वा अन्येषां सर्वविधानां प्रत्ययानाम् आदौ स्थितानां ल्, श्, क्, ख्, ग्, घ्, ङ् इति सप्तानां वर्णानाम् अनेन इत्संज्ञायाम् 'तस्य लोपः' इति सूत्रेण लोपो भवति ।

राम-प्रातिपदिकाद् द्वितीयाया बहुवचने शस्-प्रत्यये 'राम शस्' इति जाते, विभक्तिसंज्ञायाम् अनेन सूत्रेण शकारस्य इत्संज्ञायाम्, तस्य लोपे 'राम अस्' इति जाते, सकारस्य प्राप्ताया इत्संज्ञाया निषेधे, सवर्णदीर्घम्, पररूपं च बाधित्वा पूर्वसवर्णदीर्घे 'रामास्' इति जाते-

## नत्वविधायकं विधिसूत्रम्

**तस्माच्छसो नः पुंसि ६ ।१ ।१०३ ॥**

**पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात्पुंसि ॥**

(तस्मात्, शसः, नः, पुंसि) तस्मात् = पूर्वसवर्णदीर्घात् । नः = नकारः । पुंसि = पुँल्लिङ्गे)

सरलार्थः- 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण कृतात् पूर्वसवर्णदीर्घाद् उत्तरस्य शस्-प्रत्ययावयवस्य सकारस्य स्थाने नकार आदेशो भवति, पुँल्लिङ्गे एव । सूत्रे 'पुंसि' इति निर्देशात् स्त्री-नपुंसकलिङ्गयोः अस्य प्रवृत्तिर्न भवति ।

अनेन सूत्रेण पूर्वसवर्णदीर्घात् (आकारात्) परस्य शस्-प्रत्ययस्य सकारस्य स्थाने नकारादेशे 'रामान्' इत्यवस्थायाम्-

## णत्वविधायकं विधिसूत्रम्

**अट्कुप्वाङ्नुम्व्यवायेऽपि ८ ।४ ।२ ॥**

**अट् कवर्गः पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः समानपदे । इति प्राप्ते ॥**

(र-षाभ्याम्, नः, णः, समानपदे, अट्-कु-पु-आङ्-नुम्-व्यवाये, अपि) रषाभ्याम् = रेफ-षकाराभ्याम् । नः = नकारस्य । णः = णकारः । समानपदे = एकस्मिन् पदे । अट् = प्रत्याहारः, कु = कवर्गः, पु = पवर्गः, आङ् = उपसर्गः, नुम् = अनुस्वारः ।

सरलार्थः- यस्मिन् पदे रेफः, षकारो वा वर्तते, तस्मिन् एव पदे रेफ-षकाराभ्यां परे नकारो वर्तते चेत् तयोर्मध्ये अट्, कवर्गः, पवर्गः, आङ्, नुम् इत्येतेषां पृथक् पृथक्, यथासम्भवं मिलितैः वा व्यवधाने सति अपि नकारस्य स्थाने णकारादेशो भवति ।

अनेन सूत्रेण 'रामान्' इत्यत्र रेफात् परस्य आकार-मकार-आकाररूपैः सह्यव्यवधानैर्व्यवहितस्य नकारस्य णत्वे प्राप्ते, सुबन्तत्वात् पदसंज्ञायाम्-

## णत्वनिषेधकं विधिसूत्रम्

**पदान्तस्य ८ ।४ ।३७ ॥**

**नस्य णो न । रामान् ॥**

(र-षाभ्याम्, पदान्तस्य, नः, णः, न)

सरलार्थः- पदस्य अन्ते स्थितस्य नकारस्य स्थाने णकारादेशो न भवति ।

अनेन सूत्रेण 'रामान्' इत्यत्र पदान्ते स्थितस्य नकारस्य णत्वनिषेधे 'रामान्' इत्येव रूपं सिद्ध्यति ।

## इनाद्यादेशविधायकं विधिसूत्रम्

**टाङसिङसामिनात्स्याः ७ ।१ ।१२ ॥**

**अदन्ताट्टादीनामिनादयः स्युः । णत्वम् । रामेण ॥**

(अतः, अङ्गस्य, टा-ङसि-ङसाम्, इन-आत्-स्याः)

**सरलार्थः**- ह्रस्वाकारान्ताद् अङ्गाद् उत्तरेषां टा, ङसि, ङस् इत्येतेषां प्रत्ययानां स्थाने क्रमेण इन, आत्, स्य इत्येते आदेशा भवन्ति । 'टा' इत्यस्य स्थाने 'इन', 'ङसि' इत्यस्य स्थाने 'आत्', 'ङस्' इत्यस्य स्थाने 'स्य' इति आदेशाः भवन्ति । एतेषाञ्च अनेकाल्त्वात्सर्वादेशो भवति । एतेषु आदेशेषु स्थानिवद्भावेन प्रत्ययत्वम्, विभक्तित्वं च आयाति, तेन 'आत्' इत्यस्य तकारस्य प्राप्ता इत्संज्ञा 'न विभक्तौ तुस्माः' इत्यनेन निषिध्यते ।

राम-प्रातिपदिकात् तृतीयाया एकवचने टा-प्रत्यये 'राम टा' इति जाते 'चुटू' इत्यनेन टकारस्य इत्संज्ञायाम्, तस्य लोपे 'राम आ' इत्यवस्थायाम्, अङ्गसंज्ञायाम् अनेन सूत्रेण 'टा' इत्यस्य (आकारस्य) स्थाने 'इन' इत्यादेशे 'राम इन' इति जाते 'आद् गुणः' इत्यनेन गुणे 'रामेन' इत्यत्र 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे 'रामेण' इति ।

## दीर्घविधायकं विधिसूत्रम्

**सुपि च ७ ।३ ।१०२ ॥**

**यञादौ सुपि अतोऽङ्गस्य दीर्घः । रामाभ्याम् ॥**

(अतः, अङ्गस्य, यञि, सुपि, च, दीर्घः)

**सरलार्थः**- सुप्-प्रत्ययेषु (अनुबन्धविनिर्मुक्तस्वरूपेषु) येषाम् आदौ यञ्-प्रत्याहारस्थो वर्णो विद्यते, तस्मिन् परे ह्रस्वाकारान्तस्य अङ्गस्य (अन्त्यस्य अकारस्य) दीर्घो भवति । भ्याम्, भिस्, भ्यस् इत्येते यञादि-सुप्प्रत्ययाः सन्ति । 'ङे' इत्यस्य स्थाने 'ङेर्यः' इत्यनेन विधीयमानो 'य' इत्यपि स्थानिवद्भावेन यञादि-सुप्प्रत्ययोऽस्ति ।

तृतीया-द्विवचने भ्याम्-प्रत्यये 'राम भ्याम्' इत्यवस्थायाम्, अङ्गसंज्ञायाम् 'अलोऽन्त्यस्य' इत्यस्य सहकारेण अनेन सूत्रेण अङ्गस्य अन्ते स्थितस्य अकारस्य स्थाने दीर्घादेशे- रामाभ्याम् ।

### ऐसादेशविधायकं विधिसूत्रम्

**अतो भिस ऐस् ७ ।१ ।९ ॥**

**अनेकाल्शित्सर्वस्य । रामैः ॥**

(अतः, अङ्गात्, भिसः, ऐस्)

**सरलार्थः**- ह्रस्वाकारान्ताद् अङ्गाद् उत्तरस्य भिस्-प्रत्ययस्य स्थाने 'ऐस्' इत्यादेशो भवति । स्थानिवद्भावेन विभक्तित्वाद् अन्त्यसकारस्य इत्संज्ञानिषेधे 'ऐस्' इति अनेकाल् आदेशः, तेन सर्वादेशरूपेण स्थानी (भिस्) विस्थाप्यते ।

तृतीया-बहुवचने भिस्-प्रत्यये 'राम भिस्' इति स्थिते, अङ्गसंज्ञायाम् 'सुपि च' इत्यनेन प्राप्तं दीर्घं बाधित्वा अनेन सूत्रेण अकारान्ताद् अङ्गादुत्तरस्य 'भिस्' इत्यस्य स्थाने 'ऐस्' इत्यादेशे, अनेकाल्त्वात् सर्वादेशे 'राम ऐस्' इति जाते, एकादेशवृद्धौ 'रामैस्' इत्यस्य पदसंज्ञायां सकारस्य रुत्वविसर्गे- रामैः ।

### यादेशविधायकं विधिसूत्रम्

**ङेर्यः ७ ।१ ।१३ ॥**

**अतोऽङ्गात्परस्य ङेर्यादेशः ॥**

(अतः, अङ्गात्, ङेः, यः) 'ङेः' इति ङे-शब्दस्य षष्ठ्येकवचनम्, ङे-प्रत्ययस्य इत्यर्थः ।

**सरलार्थः**- ह्रस्वाकारान्ताद् अङ्गाद् उत्तरस्य 'ङे' इत्यस्य स्थाने 'य' इत्यादेशो भवति ।

राम-प्रातिपदिकात् चतुर्थ्या एकवचने ङे-प्रत्यये, तस्य च 'लशक्वतद्धिते' इत्यनेन ङकारस्य इत्संज्ञायां लोपे 'राम ए' इति स्थिते, अङ्गसंज्ञायाम् अनेन सूत्रेण 'ङे' इत्यस्य यादेशे 'राम य' इति जाते आह-

### स्थानिवद्भावविधायकम् अतिदेशसूत्रम्

**स्थानिवदादेशोऽनल्विधौ १ ।१ ।५६ ॥**

**आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ । इति स्थानिवत्वात् सुपि चेति दीर्घः । रामाय । रामाभ्याम् ॥**

(आदेशः, स्थानिवत्, अनल्विधौ) स्थानिवत् = स्थानम् अस्य अस्ति इति स्थानी, स्थानिना तुल्यं स्थानिवत्, स्थानिधर्मक इत्यर्थः । अनल्विधौ = विधीयते इति विधिः (कार्यम्), अलाश्रयो विधिः अल्विधिः, न अल्विधिः अनल्विधिः तस्मिन् अनल्विधौ, अलाश्रयभिन्ने कार्ये कर्तव्ये इत्यर्थः ।

सरलार्थः- स्थानिना तुल्यमिति स्थानिवत् । अल्-प्रत्याहारे सर्वेषां वर्णानां अन्तर्भूतत्वाद् 'अल्' इति वर्णस्य संज्ञा । ये धर्मा एकं वर्णम् आश्रयन्ति, ते अलाश्रिताः (वर्णाश्रिताः) धर्माः । अलाश्रितेन धर्मेण जायमानो विधिः- अलाश्रयविधिः, तद्भिन्नविधिः- अनलाश्रयविधिः । एकवर्णमाश्रित्य जायमानानि कार्याणि विहाय अन्येषु स्थान्याश्रयेषु कार्येषु आदेशः स्थानिवद् भवतीति सूत्रार्थः । यत्र कस्यचन स्थानिनः स्थाने कश्चन आदेशो विधीयते, तत्र स्थानिनो वर्णाश्रितान् धर्मान् विहाय अन्ये धर्मा आदेशे अपि आगच्छन्ति । सूत्रे 'अनल्विधौ' इति निर्देशाद् अलाश्रितेन धर्मेण यो विधिः भवति, तस्मिन् विधौ कर्तव्ये आदेशस्य स्थानिवद्भावो न भवतीति ज्ञेयम् ।

अनेन सूत्रेण 'ङे' इति सुप्-प्रत्ययस्य स्थाने आदिष्टस्य 'य' इत्यस्य स्थानिवद्भावेन सुप्त्वे सिद्धे, यञादित्वं स्वतः सिद्धम्, एवं च यञादिसुप्त्वेन 'सुपि च' इत्यनेन अदन्तस्य अङ्गस्य दीर्घे 'रामाय' इति साधु । चतुर्थ्याम्, पञ्चम्यामपि द्विवचने भ्याम्-प्रत्यये पूर्ववत् प्रक्रियया- रामाभ्याम् ।

## एत्वविधायकं विधिसूत्रम्

**बहुवचने झल्येत् ७ । ३ । १०३ ॥**

**झलादौ बहुवचने सुप्यतोऽङ्गस्यैकारः । रामेभ्यः । सुपि किम् ? पचध्वम् ॥**

(अतः, अङ्गस्य, बहुवचने, झलि, सुपि, एत्) एत् = एकारः ।

सरलार्थः- बहुवचनसंज्ञकेषु सुप्-प्रत्ययेषु येषाम् आदौ झल्-प्रत्याहारस्थवर्णो विद्यते, तस्मिन् परे अकारान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकारादेशो भवति । सुप्-प्रत्ययेषु झलादि-बहुवचनप्रत्ययाश्चत्वारः सन्ति- भिस्, भ्यस्, भ्यस्, सुप् । एतेषु परेषु अदन्ताङ्गस्य अन्त्यस्य अकारस्य अनेन सूत्रेण एत्वं भवति ।

चतुर्थी-बहुवचने भ्यस्-प्रत्यये 'राम भ्यस्' इत्यवस्थायाम्, अङ्गसंज्ञायां 'सुपि च' इत्यनेन प्राप्तं दीर्घं बाधित्वा 'अलोऽन्त्यस्य' इति सूत्रसहकारेण अनेन सूत्रेण अङ्गान्तस्य अकारस्य एत्वे 'रामेभ्यस्', पदत्वे, सकारस्य रुत्वविसर्गे- रामेभ्यः । एवं पञ्चम्या बहुवचनेऽपि ज्ञेयम् ।

## चर्त्वविधायकं विधिसूत्रम्

**वाऽवसाने ८ । ४ । ५६ ॥**

**अवसाने झलां चरो वा । रामात्, रामाद् । रामाभ्याम् । रामेभ्यः । रामस्य ॥**

(अवसाने, झलाम्, वा, चर्)

**सरलार्थः**- अवसाने परे झल्-प्रत्याहारस्थवर्णानां स्थाने चर्-प्रत्याहारस्थवर्णा विकल्पेन भवन्ति । चर्त्वविधौ स्थानकृतेन आन्तर्येण यस्य वर्गस्य झल्-वर्णः स्थानी भवति, तस्यैव वर्गस्य प्रथमवर्ण आदिश्यते । प्रायेण वर्गतृतीयस्य स्थाने वर्गप्रथमविधायको विधिरयम् ।

राम-प्रातिपदिकात् पञ्चम्येकवचने ङसि-प्रत्यये, इकार-सकारयोरित्संज्ञायां लोपे 'राम अस्' इति स्थिते, अङ्गसंज्ञायां 'टाङसिङसामिनात्स्याः' इत्यनेन 'ङसि' इत्यस्य स्थाने सर्वादेशत्वेन 'आत्' इत्यादेशे, स्थानिवद्भावेन विभक्तित्वात् तकारस्य इत्संज्ञानिषेधे 'राम आत्' इत्यवस्थायाम्, सवर्णदीर्घे 'रामात्' इत्यस्य पदसंज्ञायाम् 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन तकारस्य दकारे 'रामाद्' इत्यवस्थायाम् अवसानसंज्ञायाम् अनेन सूत्रेण वैकल्पिके चर्त्वे, दकारस्य स्थाने तकारादेशे 'रामात्' इति रूपम् । अनेन चर्त्वाभावपक्षे 'रामाद्' इत्यपि रूपं सिद्ध्यति ।

षष्ठ्येकवचने ङस्-प्रत्ययेऽनुबन्धलोपे 'राम अस्' इत्यवस्थायाम् 'टाङसिङसामिनात्स्याः' इति 'ङस्' इत्यस्य स्थाने 'स्य' इत्यादेशे, अनेकाल्त्वात् सर्वादेशे- रामस्य ।

### एत्वविधायकं विधिसूत्रम्

**ओसि च ७ । ३ । १०४ ॥**

**अतोऽङ्गस्यैकारः । रामयोः ॥**

(अतः, अङ्गस्य, एत् ओसि, सुपि, च)

**सरलार्थः**- 'ओस्' इति सुप्-प्रत्यये परे ह्रस्वाकारान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकारादेशो भवति ।

राम-प्रातिपदिकात् षष्ठ्याः, सप्तम्याश्च द्विवचने ओस्-प्रत्यये 'राम ओस्' इत्यवस्थायाम् एकादेशवृद्धिं बाधित्वा अनेन सूत्रेण अलोऽन्त्यपरिभाषया अङ्गस्य अन्त्यवर्णस्य अकारस्य स्थाने एकारादेशे 'रामे ओस्' इति जाते 'एचोऽयवायावः' इत्यनेन अयादेशे, वर्णसम्मेलने, सकारस्य रुत्वे, विसर्गे च 'रामयोः' इति रूपम् ।

### नुडागमविधायकं विधिसूत्रम्

**ह्रस्वनद्यापो नुट् ७ । १ । ५४ ॥**

**ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः ॥**

(ह्रस्व-नदी-आपः, अङ्गात्, आमि, नुट्)

**सरलार्थः**- ह्रस्वान्तात्, नदीसंज्ञकात्, आबन्तात् च अङ्गात् परस्य षष्ठीबहुवचनस्य आम्-प्रत्ययस्य 'नुट् (न्)' इति आगमो भवति । नुट् इत्यस्य टकार इत्संज्ञकः, उकारश्च

उच्चारणार्थः, न् इत्येव अवशिष्यते । टित्वाद् 'आद्यन्तौ टकितौ' इत्यनेन आम्-प्रत्ययस्य आद्यवयवत्वे 'नाम्' इति जायते ।

षष्ठ्या बहुवचने आम्-प्रत्यये 'राम आम्' इति स्थिते, सवर्णदीर्घं प्रबाध्य अनेन सूत्रेण ह्रस्वान्ताद् अङ्गाद् उत्तरस्य 'आम्' इत्यस्य नुडागमेऽनुबन्धलोपे, टित्वाद् आद्यवयवत्वे 'राम नाम्' इत्यवस्थायाम् 'सुपि च' इत्यनेन अङ्गान्त्यस्य दीर्घे प्राप्ते-

## दीर्घविधायकं विधिसूत्रम्

**नामि ६ । ४ । ३ ॥**

**अजन्ताङ्गस्य दीर्घः । रामाणाम् । रामे । रामयोः । सुपि- एत्वे कृते ॥**

(अचः, अङ्गस्य, नामि, दीर्घः) नामि = नुडागमेन सहित आम् नाम्, तस्मिन् ।

'नाम्' इति नुडागमेन सहितः षष्ठी-बहुवचन-प्रत्ययः, तस्मिन् परे अजन्तस्य अङ्गस्य अन्त्यवर्णस्य दीर्घो भवति । अकारान्त-प्रातिपदिकानां विषये 'सुपि च' इत्यनेन प्राप्तं दीर्घं बाधित्वा अनेन दीर्घो विधीयते ।

अनेन सूत्रेण अङ्गान्त्यस्य अकारस्य दीर्घे 'रामानाम्' इत्यवस्थायाम् 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे 'रामाणाम्' इति ।

सप्तम्येकवचने तु ङि-प्रत्ययेऽनुबन्धलोपे 'राम इ' इत्यवस्थायाम् 'आद् गुणः' इत्यनेन पूर्वपरयोः स्थाने एकारगुणे, वर्णयोगे- रामे ।

## षत्वविधायकं विधिसूत्रम्

**आदेशप्रत्यययोः ८ । ३ । ५९ ॥**

**इण्कुभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सस्तस्य मूर्धन्यादेशः । ईषद्विवृतस्य सस्य तादृश एव षः । रामेषु । एवं कृष्णादयोऽप्यदन्ताः ॥**

(आदेश-प्रत्यययोः, इण्-कोः, अपदान्तस्य, सः, मूर्धन्यः)

सरलार्थः- इण्-कवर्गाभ्याम् उत्तरस्य अपदान्तस्य आदेशरूपस्य, प्रत्ययस्य अवयवरूपस्य च सकारस्य स्थाने मूर्धन्यः (षकारः) आदेशो भवति । अनेन सकारस्य स्थाने मूर्धस्थानिषु सर्वेषु (ऋटुरषेषु) वर्णेषु प्राप्तेषु गुणकृतेन आन्तर्येण ईषद्विवृतप्रयत्नकस्य सकारस्य स्थाने समानप्रयत्नवान् षकार आदेशो भवति ।

राम-प्रातिपदिकात् सप्तम्या बहुवचने सुप्-प्रत्ययेऽनुबन्धलोपे 'राम सु' इति स्थिते, अङ्गसंज्ञायाम् 'बहुवचने झल्येत्' इत्यनेन अङ्गान्त्यस्य अकारस्य एत्वे कृते 'रामे सु' इत्यवस्थायाम्, एकाररूपाद् इण्-प्रत्याहाराद् उत्तरस्य प्रत्ययावयवस्य सकारस्य स्थाने अनेन

सूत्रेण षत्वे 'रामेषु' इति रूपं सिद्धम् ।

कृष्ण, बाल, बालक, विद्यालय इत्यादीनामपि सर्वेषाम् अकारान्त-पुँल्लिङ्ग-प्रातिपदिकानां रूपसिद्धिप्रक्रिया राम-शब्दवदेव भवतीति बोध्यम् । टा-आम्-प्रत्यययोः णत्वविषये विशेषतः ध्यानं देयम् ।

### प्रयोगसिद्धिप्रकारः

**रामान्**

प्रातिपदिकसंज्ञकाद् राम-शब्दाद् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण द्वितीयाया बहुवचने शस्-प्रत्यये 'राम शस्' इति जाते, प्रत्ययस्थस्य शकारस्य 'लशक्वतद्धिते' इति सूत्रेण इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे 'राम अस्' इति जाते, पररूपं बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे, द्वयोरकारयोः स्थाने आकार एकादेशे 'रामास्' इति जाते, 'तस्माच्छसो नः पुंसि' इति सूत्रेण सकारस्य नत्वे 'रामान्' इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्य णत्वे प्राप्ते, पदसंज्ञायाम् 'पदान्तस्य' इति सूत्रेण णत्वनिषेधे 'रामान्' इति रूपं सिद्धम् ।

## वाक्येषु प्रयोगानुशीलनम्

१. भक्तः रामं भजति । अहं देवं नमामि ।

२. सः पुत्रौ रक्षति । छात्रः पाठान् पठति ।

३. रामेण रावणः हतः । एषः कर्णाभ्यां शृणोति ।

४. रामाय नमः । सा बालाय दुग्धं यच्छति ।

५. नदी हिमालयात् प्रभवति । वृक्षेभ्यः पत्राणि पतन्ति ।

६. लक्ष्मणः रामस्य अनुजः अस्ति । दर्शकः बालकानां क्रीडां पश्यति ।

७. छात्राः विद्यालये पठन्ति । ते आसन्दे तिष्ठन्ति ।

## अभ्यासः

**१. सूत्राणि पठित्वा अभ्यासपुस्तिकायाम् अनुलिखत**

(क) अट्कुप्वाङ्नुम्व्यवायेऽपि
(ख) अतो भिस ऐस्
(ग) टाङसिङसामिनात्स्याः
(घ) आदेशप्रत्यययोः
(ङ) बहुवचने झल्येत्

२. **परस्परं मेलयत**

| | |
|---|---|
| वाऽवसाने | षत्वम् |
| सुपि च | पूर्वरूपम् |
| ओसि च | स्थानिवद्भावः |
| आदेशप्रत्यययोः | चर्त्वम् |
| स्थानिवदादेशोऽनल्विधौ | एत्वम् |
| अमि पूर्वः | दीर्घः |

३. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) रेफ-षकाराभ्यां परस्य ..................... नकारस्य णत्वं भवति । (पदान्तस्य, अपदान्तस्य)

(ख) ............. अङ्गात् परस्य 'ङे' इत्यस्य यादेशो भवति । (अदन्तात्, अजन्तात्)

(ग) 'तस्माच्छसो नः पुंसि' इति सूत्रम् ..................... प्रवर्तते । (पुँल्लिङ्गे, स्त्रीलिङ्गे)

(घ) 'ह्रस्वनद्यापो नुट्' इत्यनेन ..................... नुड् विधीयते । (अङ्गस्य, प्रत्ययस्य)

(ङ) 'रामाणाम्' इत्यत्र ............... इति सूत्रेण दीर्घो भवति । (नामि, सुपि च)

(च) अकारान्ताद् अङ्गात् परस्य ङसि-प्रत्ययस्य स्थाने .............. आदिश्यते । (आत्, स्य)

(छ) 'लशक्वतद्धिते' इति ..................... वर्तते । (विधिसूत्रम्, संज्ञासूत्रम्)

४. **एकवाक्येन उत्तरं लिखत**

(क) केभ्यः परस्य आम्-प्रत्ययस्य नुडागमो भवति ?

(ख) 'लशक्वतद्धिते' इत्यनेन केषाम् इत्संज्ञा भवति ?

(ग) 'रामान्' इत्यत्र केन सूत्रेण दीर्घो भवति ?

(घ) 'रामम्' इत्यत्र पूर्वरूपविधायकं सूत्रं किम् ?

(ङ) कस्मात् परस्य शस्-प्रत्ययस्य सकारस्य नत्वं भवति ?

(च) 'अतो भिस ऐस्' इति सूत्रं किं करोति ?

(छ) 'रामेण' इत्यत्र केन सूत्रेण इनादेशः क्रियते ।

(ज) राम-शब्दात् सुप्-प्रत्यये किं रूपं जायते ?

**५. अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत**

| प्रयोगः | प्रातिपदिकम् | विभक्तिः | वचनम् | प्रत्ययः |
|---|---|---|---|---|
| रामम् | राम | द्वितीया | एकवचनम् | अम् |
| रामेण | ............ | ............ | ............ | ............ |
| बालकैः | ............ | ............ | ............ | ............ |
| पुत्राणाम् | ............ | ............ | ............ | ............ |
| कृष्णे | ............ | ............ | ............ | ............ |
| विप्राय | ............ | ............ | ............ | ............ |
| व्याघ्रात् | ............ | ............ | ............ | ............ |

**६. प्रश्नानाम् उत्तरं लिखत**

(क) नकारस्य णत्वं कस्याम् अवस्थायां भवति ?

(ख) अकारान्त-पुँल्लिङ्ग-प्रातिपदिकेषु अङ्गसंज्ञाप्रयुक्त-कार्याणि कानि ?

(ग) राम-बालशब्दयोः रूपेषु कुत्र कुत्र का भिन्नता विलोक्यते ? सकारणं लिखत ।

(घ) 'ङेर्यः' इति सूत्रस्य अर्थं लिखत ।

(ङ) अनल्विधौ स्थानिवद्भावविधायकं सूत्रं विलिख्य तस्य अर्थमपि निर्दिशत ।

**७. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिपथं दर्शयत**

(क) रामम् (ख) रामेण (ग) रामैः

(घ) रामात् (ङ) रामाय (च) रामाणाम्

**८. विद्यालय-शब्दस्य सर्वासु विभक्तिषु रूपाणि लिखत ।**

अजन्त-पुँल्लिङ्गप्रकरणे

# अदन्त-सर्वनामशब्दाः

**सर्वनामशब्दाः**

सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु (भवत्), किम् ।

## सर्वनामसंज्ञाविधायकं सूत्रम्

**सर्वादीनि सर्वनामानि १ ।१ ।२७ ॥**

**सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । ग.सू. (पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्) ग.सू. (स्वमज्ञातिधनाख्यायाम्) ग.सू. (अन्तरं बहिर्योगोपसंव्यानयोः) त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥**

(सर्व-आदीनि, सर्वनामानि)

**सरलार्थः**- सर्व-शब्द आदिर्येषां तानि सर्वादीनि, सर्वादिगणे पठिताः शब्दा इत्यर्थः । सर्वादिगणे पठितानां शब्दानाम्, तदन्तशब्दानां च सर्वनामसंज्ञा भवतीति सूत्रार्थः । तत्र सर्वेषां यानि नामानि तानि सर्वनामानि इति अन्वर्थसंज्ञाविज्ञानात् सर्वादीनां सर्वार्थवाचकत्वे एव सर्वनामसंज्ञा भवति ।

सर्वादिगणे आहत्य एकचत्वारिंशत् शब्दा निर्दिष्टाः सन्ति । गणेऽस्मिन् चतुर्विंशतिः शब्दाः, द्वौ प्रत्ययौ, त्रीणि गणसूत्राणि च विद्यन्ते । एतेषु सर्वनामशब्देषु अजन्तानाम् अजन्तप्रकरणे, हलन्तानां च हलन्तप्रकरणे निरूपणं क्रियते ।

सुप्-प्रत्ययैः अदन्त-सर्वनामप्रातिपदिकानां रूपसाधनप्रक्रियायां पुँल्लिङ्गे सर्वनामसंज्ञाप्रयुक्तकार्याणि-

- जस्-प्रत्ययस्य स्थाने 'शी (ई)' आदेशः । (जसः शी)
- ङे-प्रत्ययस्य स्थाने 'स्मै' आदेशः । (सर्वनाम्नः स्मै)
- ङसि-प्रत्ययस्य स्थाने 'स्मात्' आदेशः । (ङसिङ्योः स्मात्स्मिनौ)
- आम्-प्रत्ययस्य 'सुट् (स्)' आगमः । (आमि सर्वनाम्नः सुट्)
- ङि-प्रत्ययस्य स्थाने 'स्मिन्' आदेशः । (ङसिङ्योः स्मात्स्मिनौ)

अदन्तसर्वनामशब्दानां पुँल्लिङ्गे रूपसिद्धिप्रक्रिया जस्, ङे, ङसि, आम्, ङि इत्येतेषु प्रत्ययेषु एव विभिद्यते । शेषविभक्तिषु राम-शब्दवदेव रूपाणि भवन्ति ।

सर्व-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेन प्रातिपदिकसंज्ञा विधीयते । तस्मात् सु-प्रत्यये रामवत् प्रक्रियया 'सर्वः' इति रूपं सिद्ध्यति । औ-प्रत्ययेऽपि रामवत्- सर्वौ । जस्-प्रत्यये तु विशेषो वर्तते-

## शी-विधायकं विधिसूत्रम्

**जसः शी ७ ।१ ।१७ ॥**

**अदन्तात्सर्वनाम्नो जसः शी स्यात् । अनेकाल्त्वात्सर्वादेशः । सर्वे ॥**

(अतः, सर्वनाम्नः, अङ्गात्, जसः, शी) सर्वनाम्नः = सर्वनामन्-शब्दस्य पञ्चम्येकवचनम् ।

सरलार्थः- ह्रस्वाकारान्तात् सर्वनामसंज्ञकाद् अङ्गात् परस्य जस्-प्रत्ययस्य स्थाने 'शी' इत्यादेशो भवति । 'शी' इति आदेशस्य अनेकाल्त्वात् 'जस्' इति सम्पूर्णस्य स्थानिनः स्थाने अयम् आदेशो भवति, न तु शित्वात्, आदेशात्प्राक् 'शी' इत्यस्य प्रत्ययत्वाऽभावात् ।

सर्व-प्रातिपदिकाद् जस्-प्रत्ययेऽनुबन्धलोपे 'सर्व अस्' इत्यवस्थायाम् 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्व-शब्दस्य सर्वनामसंज्ञायाम् अनेन सूत्रेण 'जस्' इत्यस्य सर्वादेशत्वेन 'शी' इत्यादेशे 'सर्व शी' इति जाते, स्थानिवद्भावेन विभक्तित्वात् शकारस्य इत्संज्ञायां लोपे 'सर्व ई', पूर्ववरयोः एकारगुणे 'सर्वे' इति । एवमेव विश्वादिशब्दानामपि जस्-प्रत्यये सर्ववदेव 'विश्वे' इत्यादीनि रूपाणि भवन्ति । अमादिप्रत्ययेषु रामवत् सर्वम् इत्यादीनि रूपाणि ज्ञेयानि ।

## स्मै-विधायकं विधिसूत्रम्

**सर्वनाम्नः स्मै ७ ।१ ।१४ ॥**

**अतः सर्वनाम्नो ङेः स्मै । सर्वस्मै ॥**

(अतः, सर्वनाम्नः, अङ्गात्, ङेः, स्मै)

सरलार्थः- ह्रस्वाकारान्तात् सर्वनामसंज्ञकाद् अङ्गात् परस्य ङे-प्रत्ययस्य स्थाने 'स्मै' इत्यादेशो भवति ।

चतुर्थ्येकवचने ङे-प्रत्ययेऽनुबन्धलोपे 'सर्व ए', सर्वनामसंज्ञायाम् 'ङेर्यः' इत्यनेन प्राप्तं यादेशं बाधित्वा अनेन सूत्रेण 'स्मै' आदेशे 'सर्वस्मै' इति रूपम् । एवं विश्वस्मै, उभयस्मै, कतरस्मै, अन्यस्मै इत्यादि ।

## स्मात्-स्मिन्-विधायकं विधिसूत्रम्

**ङसिङ्योः स्मात्स्मिनौ ७ ।१ ।१५ ॥**

**अतः सर्वनाम्न एतयोरेतौ स्तः । सर्वस्मात् ॥**

(अतः, सर्वनाम्नः, अङ्गात्, ङसि-ङ्योः, स्मात्-स्मिनौ)

**सरलार्थः**- अकारान्तात् सर्वनामसंज्ञकाद् अङ्गात् परस्य ङसि-प्रत्ययस्य स्थाने 'स्मात्' इति, ङि-प्रत्ययस्य स्थाने च 'स्मिन्' इत्येतौ आदेशौ भवतः । 'ङसि' इत्यस्य विषये 'टाङसिङसामिनात्स्याः' इत्यनेन प्राप्तं आदादेशं बाधित्वा अनेन स्मादादेशो विधीयते ।

सर्व ङसि - सर्व अस् इत्यवस्थायां सर्वनामसंज्ञायाम्, आदादेशं बाधित्वा अनेन सूत्रेण 'स्मात्' इत्यादेशे 'सर्वस्मात्' इति जाते, पदान्तस्य तकारस्य जश्त्वेन दकारे, अवसानसंज्ञायाम् 'वाऽवसाने' इत्यनेन दकारस्य वैकल्पिके चर्त्वे 'सर्वस्मात्' इति । चर्त्वाभावे 'सर्वस्माद्' इत्यपि सिद्ध्यति । एवं विश्वस्मात्, इतरस्मात्, त्वस्मात् इत्यादि ।

## सुडागमविधायकं विधिसूत्रम्

**आमि सर्वनाम्नः सुट् ७ ।१ ।५२ ॥**

**अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः । एत्वषत्वे । सर्वेषाम् । सर्वस्मिन् । शेषं रामवत् । एवं विश्वादयोऽप्यदन्ताः ॥ उभशब्दो नित्यं द्विवचनान्तः । उभौ २ । उभाभ्याम् ३ । उभयोः २ । तस्येह पाठोऽकजर्थः । उभयशब्दस्य द्विवचनं नास्ति । उभयः । उभये । उभयम् । उभयान् । उभयेन । उभयैः । उभयस्मै । उभयेभ्यः । उभयस्मात् । उभयेभ्यः । उभयस्य । उभयेषाम् । उभयस्मिन् । उभयेषु । डतरडतमौ प्रत्ययौ, प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः ॥ नेम इत्यर्धे । समः सर्वपर्यायस्तुल्यपर्यायस्तु न, यथासंख्यमनुदेशः समानामिति ज्ञापकात् ॥**

(आत्, सर्वनाम्नः, अङ्गस्य, आमि, सुट्) आत् = 'अ' इत्यस्य पञ्चम्येकवचनम्, अवर्णाद् इत्यर्थः ।

**सरलार्थः**- अवर्णान्ताद् अङ्गात् परस्य सर्वनामसंज्ञकात् शब्दाद् विहितस्य षष्ठी-बहुवचनस्य आम्-प्रत्ययस्य 'सुट्' इति आगमो भवति । विधिरयं नुडागमस्य अपवादो वर्तते । सुट् इत्यस्य टकार इत्संज्ञकः, उकारश्च उच्चारणार्थः, स् इत्येव अवशिष्यते । टित्वात् स्थानिनः आद्यवयवत्वे आम्-प्रत्ययः 'साम्' इति भवति, तस्मिन् च झलादि-बहुवचनवद् व्यवहारो भवति, अर्थात् कृते सुडागमे यदि अङ्गम् अकारान्तम् अस्ति चेत् तस्य अन्त्यवर्णस्य

‘बहुवचने झल्येत्’ इत्यनेन एत्वं भवति । एत्वे कृते च तस्य इण्-प्रत्याहारस्थत्वात् तस्मादव्यवहितोत्तरस्य प्रत्ययावयवभूतस्य सकारस्य ‘आदेशप्रत्यययोः’ इत्यनेन षत्वं भवति ।

षष्ठीबहुवचने ‘सर्व आम्’ इत्यत्र नुडागमं बाधित्वा अनेन सूत्रेण आम्-प्रत्ययस्य सुडागमेऽनुबन्धलोपे, टित्वाद् आद्यवयवत्वे ‘सर्व साम्’ इति जाते, ‘बहुवचने झल्येत्’ इत्यनेन अङ्गान्त्यस्य ह्रस्वाकारस्य एत्वे ‘सर्वे साम्’ इति जाते, ‘आदेशप्रत्यययोः’ इत्यनेन सकारस्य षत्वे ‘सर्वेषाम्’ इति सिद्ध्यति । एवं विश्वेषाम्, अन्येषाम्, समेषाम् इत्यादि ।

सप्तम्येकवचने ङि-प्रत्ययेऽनुबन्धलोपे ‘सर्व इ’, सर्वनामसंज्ञायाम् ‘ङसिङ्योः स्मात्स्मिनौ’ इत्यनेन ‘स्मिन्’ इत्यादेशे ‘सर्वस्मिन्’ इति रूपं निष्पद्यते । एवं विश्वेस्मिन्, कतमस्मिन्, अन्यतरस्मिन् इत्यादि ।

उभ-शब्दो नित्यं द्विवचनान्तः, द्विवचनप्रत्ययेषु च सर्वनामसंज्ञाप्रयुक्तकार्यस्य अभावात् तस्य अत्र पाठः किमर्थ इति जिज्ञासायाम् आह- तस्य इह पाठोऽकजर्थः । तस्य = उभ-शब्दस्य, इह = सर्वादिगणे, पाठः = प्रविष्टिः, अकजर्थः = अकच्-प्रत्ययविधानाय । ‘अव्ययसर्वनाम्नामकच् प्राक्टेः’ इति सूत्रेण अकच्-प्रत्ययं विधाय ‘उभक’ शब्दनिर्माणाय उभ-शब्दस्य सर्वादिगणे पाठ आवश्यक इत्यर्थः ।

उभ-शब्दात् तयप्-प्रत्यये तस्य च अयजादेशे निष्पन्नः, उभय-शब्दो द्विवचने न प्रयुज्यते, एक-बहुवचने एव तस्य रूपाणि जायन्ते । ‘उभयः’ इत्यस्य ‘द्वौ अवयवौ यस्य’ इत्यर्थः ।

सर्वादिगणे पठितौ डतर, डतम इत्येतौ प्रत्ययौ वर्तेते, एतयोश्च ‘प्रत्ययग्रहणे तदन्तग्रहणम्’ इति परिभाषया डतरच्-डतमच्प्रत्ययान्ताः कतरादिशब्दा गृह्यन्ते । अत्र पठितो नेम-शब्दः अर्धेऽर्थे वर्तते ।

सम-शब्दः ‘सर्वम्’ इत्यर्थे, ‘तुल्यम्’ इत्यर्थे च प्रयुज्यते । सर्वादिगणे पठितः सम-शब्दः सर्वार्थको वर्तते, न तु तुल्यार्थक इति स्मर्तव्यम् । यदि तुल्यार्थकोऽपि सम-शब्दस्य सर्वनामसंज्ञा स्यात् तर्हि ‘यथासङ्ख्यमनुदेशः समानाम्’ इति सूत्रे ‘समानाम्’ इति निर्देशः असङ्गतः स्यात् । अत अत्र पठितः समशब्दः सर्वार्थको ज्ञेयः । उक्तानां शब्दानां रूपसिद्धिप्रक्रिया सर्वशब्दवदेव ज्ञातव्या ।

## सर्वनामसंज्ञाविधायकं सूत्रम्

**पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् १ । १ । ३४ ॥**

**एतेषां व्यवस्थायामसंज्ञायां च सर्वनामसंज्ञा गणसूत्रात्सर्वत्र या प्राप्ता सा जसि वा स्यात् । पूर्वे, पूर्वाः । असंज्ञायां किम् ? उत्तराः कुरवः । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । व्यवस्थायां**

**किम् ? दक्षिणा गाथकाः, कुशला इत्यर्थः ॥**

(पूर्व-अपर-अवर-दक्षिण-उत्तर-अपर-अधराणि, जसि, विभाषा, सर्वनामानि, व्यवस्थायाम्, असंज्ञायाम्)

सरलार्थः- पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर इत्येतेषां सप्तानां शब्दानां सर्वादिगणे पाठात् सर्वत्र नित्यं सर्वनामसंज्ञा प्राप्ता वर्तते, सा संज्ञा जस्-प्रत्यये परे विकल्पेन भवति, संज्ञाभिन्ने व्यवस्थायाम् अर्थे द्योत्ये च । व्यवस्था = मर्यादा । पूर्वादयः शब्दा यदा स्थलमर्यादाम्, (उपरि, अधः, वामतः, दक्षिणतः इत्यादि), कालमर्यादाम् (प्राक्तनः, पश्चात् इत्यादि), दिङ्मर्यादाम् (पूर्वः, पश्चिमः, उत्तरः, दक्षिणः इत्यादि) च दर्शयन्ति, तदा एव सर्वनामसंज्ञका भवन्ति । यदि एते शब्दा मर्यादाभिन्नेषु अर्थेषु प्रयुज्यन्ते, तदा सर्वनामसंज्ञां न लभन्ते । 'दक्षिणा गाथकाः' इत्यत्र प्रयुक्तः 'दक्षिणाः' इति पदस्य 'कुशलाः' इत्यर्थः । कुशल-पर्यायस्य दक्षिण-शब्दस्य व्यवस्थाभिन्नेऽर्थे प्रयुक्तत्वात् अत्र तस्य सर्वनामसंज्ञा न भवति । अतः रामशब्दवत् तस्य 'दक्षिणाः' इति रूपं भवति । पूर्वादिशब्दा यदि कस्यचित् संज्ञारूपेण प्रयुज्यन्ते, तदा अपि तेषां सर्वनामसंज्ञा न भवतीति ज्ञेयम् । 'उत्तराः कुरवः' इत्यत्र उत्तर-शब्दः सुमेरुपर्वतस्य उत्तरदिशि विद्यमानानां कुरूणां कश्चन प्रदेशस्य संज्ञारूपेण प्रयुक्तोऽस्ति । संज्ञारूपेण प्रयुक्तत्वात् सर्वनामसंज्ञाया अभावे 'उत्तराः' इति रूपम्, न तु 'उत्तरे' इति ।

उत्तर जस् - उत्तर अस्, अनेन सर्वनामसंज्ञापक्षे- उत्तर ई (जसः शी) - उत्तरे । सर्वनामसंज्ञाभावे- उत्तर अस् - उत्तरास् - उत्तरार् - उत्तराः ।

### सर्वनामसंज्ञाविधायकं सूत्रम्

**स्वमज्ञातिधनाख्यायाम् १ । १ । ३५ ॥**

**ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा । स्वे, स्वाः, आत्मीयाः, आत्मान इति वा । ज्ञातिधनवाचिनस्तु स्वाः, ज्ञातयोऽर्था वा ॥**

(स्वम्, अज्ञाति-धन-आख्यायाम्, जसि, विभाषा, सर्वनाम)

सरलार्थः- ज्ञातिभिन्ने, धनभिन्ने च अर्थे वर्तमानस्य स्व-शब्दस्य सर्वादिगणे पाठात् सर्वत्र नित्यं सर्वनामसंज्ञा प्राप्ता वर्तते, सा संज्ञा जस्-प्रत्यये परे विकल्पेन भवति । स्व-शब्दः आत्मा, आत्मीयः, ज्ञातिः (बान्धवः), धनम् इत्यादिषु अर्थेषु प्रयुज्यते । 'ज्ञातिः', 'धनम्' इत्येतौ द्वौ अर्थौ विहाय अन्येषु अर्थेषु स्व-शब्दस्य जस्-विभक्तौ विकल्पेन, अन्यासु विभक्तिषु च

नित्यं सर्वनामसंज्ञा भवति ।

स्व जस् - स्व अस् - स्व शी - स्व ई - स्वे । सर्वनामसंज्ञाभावे- स्व जस् - स्व - अस् - स्वास् - स्वार् - स्वाः । 'ज्ञातयः' इत्यर्थे 'अर्थाः' इत्यर्थे च प्रयुक्तस्य स्व-शब्दस्य सर्वनामसंज्ञाभावेन प्रथमाबहुवचने 'स्वाः' इत्येव रूपं भवति ।

## सर्वनामसंज्ञाविधायकं सूत्रम्

**अन्तरं बहिर्योगोपसंव्यानयोः १ ।१ ।३६ ॥**

**बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा । अन्तरे, अन्तरा वा गृहाः, बाह्या इत्यर्थः । अन्तरे, अन्तरा वा शाटकाः, परिधानीया इत्यर्थः ॥**

(अन्तरम्, बहिर्योग-उपसंव्यानयोः, जसि, विभाषा, सर्वनाम)

सरलार्थः- अन्तर-शब्दोऽनेकार्थको वर्तते । बाह्यः (बहिः स्थितः), अन्तर्वस्त्रम् (परिधानीयम्), मध्यः इत्यादिषु अर्थेषु अन्तर-शब्दः प्रयुज्यते । एतेषु बाह्ये, परिधानीये च अर्थे प्रयुक्तस्य अन्तर-शब्दस्य गणसूत्रे पाठात् सर्वनामसंज्ञा भवति । सा च संज्ञा जस्-प्रत्यये परे विकल्पेन भवतीति सूत्रार्थः ।

अन्तर जस् - अन्तर अस् - अन्तर शी - अन्तर ई - अन्तरे । पक्षान्तरे- अन्तर जस् - अन्तर - अस् - अन्तरास् - अन्तरार् - अन्तराः । अन्येषु अर्थेषु वर्तमानस्य अन्तर-शब्दस्य तु सर्वनामसंज्ञा न भवति ।

## स्मात्स्मिन्-विधायकं विधिसूत्रम्

**पूर्वादिभ्यो नवभ्यो वा ७ ।१ ।१६ ॥**

**एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । एवं परादीनाम् । शेषं सर्ववत् ॥**

(पूर्वादिभ्यः, नवभ्यः, सर्वनाम्नः, उत्तरस्य, ङसि-ङ्योः, वा, स्मात्-स्मिनौ)

सरलार्थः- पूर्वादिभ्यो नवभ्यः (अन्तरान्तेभ्यः) सर्वनामशब्देभ्य उत्तरयोः 'ङसि', 'ङि' इत्येतयोः प्रत्यययोः स्थाने क्रमेण 'स्मात्', 'स्मिन्' इत्येतौ आदेशौ विकल्पेन भवतः । लब्धसर्वनामसंज्ञकेषु पूर्वादिशब्देषु एव अस्य सूत्रस्य प्रवृत्तिर्भवति । 'ङसिङ्योः स्मात्स्मिनौ' इत्यनेन नित्यं प्राप्ते अनेन सूत्रेण विकल्प्यते ।

पूर्व ङसि - पूर्व अस् - पूर्व स्मात् - पूर्वस्मात् - पूर्वस्माद् - पूर्वस्मात्/पूर्वस्माद् । अन्ये

पक्षे- पूर्व ङसि - पूर्व अस् - पूर्व आत् (टाङसिङसामिनात्स्याः) - पूर्वात्/पूर्वाद् ।

पूर्व ङि - पूर्व इ - पूर्व स्मिन् - पूर्वस्मिन् । अन्ये पक्षे- पूर्व ङि - पूर्व इ - पूर्वे । एवमेव प्रक्रियया अपरादीनां शब्दानाम् अपि रूपाणि सिद्ध्यन्ति ।

**पूर्वादि-नवशब्दानां ङसि-प्रत्यये, ङि-प्रत्यये च रूपाणि**

| प्रातिपदिकम् | ङसि-प्रत्यये | ङि-प्रत्यये |
|---|---|---|
| पूर्व | पूर्वस्मात्-द्/पूर्वात्-द् | पूर्वस्मिन्/पूर्वे |
| पर | परस्मात्-द्/परात्-द् | परस्मिन्/परे |
| अवर | अवरस्मात्-द्/अवरात्-द् | अवरस्मिन्/अवरे |
| दक्षिण | दक्षिणस्मात्-द्/दक्षिणात्-द् | दक्षिणस्मिन्/दक्षिणे |
| उत्तर | उत्तरस्मात्-द्/उत्तरात्-द् | उत्तरस्मिन्/उत्तरे |
| अपर | अपरस्मात्-द्/अपरात्-द् | अपरस्मिन्/अपरे |
| अधर | अधरस्मात्-द्/अधरात्-द् | अधरस्मिन्/अधरे |
| स्व | स्वस्मात्-द्/स्वात्-द् | स्वस्मिन्/स्वे |
| अन्तर | अन्तरस्मात्-द्/अन्तरात्-द् | अन्तरस्मिन्/अन्तरे |

## सर्वनाम-संज्ञाविधायकं सूत्रम्

**प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च ।१ ।१ ।३३ ।**

**एते जसि उक्तसंज्ञा वा स्युः । प्रथमे, प्रथमाः ॥ तयः प्रत्ययः । द्वितये, द्वितयाः । शेषं रामवत् ॥ नेमे, नेमाः । शेषं सर्ववत् ॥ तीयस्य ङित्सु वा (वा.१७) । द्वितीयस्मै, द्वितीयायेत्यादि । एवं तृतीयः ॥ निर्जरः ॥**

(प्रथम-चरम-तय-अल्प-अर्ध-कतिपय-नेमाः, च, जसि, विभाषा, सर्वनामानि । तय = तयप्-प्रत्ययान्तः)

**सरलार्थः**- प्रथम, चरम, अल्प, अर्ध, कतिपय, नेम इत्येते शब्दाः, तयप्-प्रत्ययान्तशब्दाश्च जस्-प्रत्यये परे विकल्पेन सर्वनामसंज्ञका भवन्ति । 'अर्धम्' इत्यर्थको नेम-शब्दः सर्वादिगणे पठितोऽस्ति, अतः तस्य सर्वत्र नित्यं सर्वनामसंज्ञायां सिद्धायां जस्विभक्तौ अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा विधीयते । तदन्ये प्रथम, चरम, अल्प, अर्ध, कतिपय इत्येते शब्दाः, तयप्-प्रत्ययान्तशब्दाश्च सर्वादिगणे न विद्यन्ते, अतः जस्-विभक्तौ परतः एव एते शब्दा

अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञां लभन्ते । जस्विभक्तौ सर्वनामसंज्ञापक्षे सर्वशब्दवत्, पक्षान्तरे, अन्यासु विभक्तिषु च रामशब्दवद् एतेषां शब्दानां रूपाणि जायन्ते । प्रथमः = आदिमः, चरमः = अन्तिमः, अल्पः = किञ्चित्, अर्धः = अंशसामान्यः (अर्धम् = समांशः) । 'तयप्' इति तद्धितप्रत्ययः 'सङ्ख्याया अवयवे तयप्' इति सूत्रेण सङ्ख्यावाचकेभ्यः शब्देभ्यः 'अवयवाः अस्य' इत्यर्थे विधीयते । द्वितयः/द्वय, तृतय/त्रय, पञ्चतय इत्यादयः शब्दाः तयप्-प्रत्ययान्ताः सन्ति । एतेषामपि अनेन सूत्रेण जस्-विभक्तौ विकल्पेन सर्वनामसंज्ञा भवति ।

अनेन सर्वनामसंज्ञापक्षे- प्रथम जस् - प्रथम अस् - प्रथम शी - प्रथम ई - प्रथमे ।

पक्षान्तरे- प्रथम जस् - प्रथम अस् - प्रथमास् - प्रथमार् - प्रथमाः ।

एवं चरमादि-शब्दानामपि जस्-प्रत्यये प्रथम-शब्दवद् रूपाणि भवन्ति । यथा-

चरम- चरमे/चरमाः । अल्प- अल्पे/अल्पाः । अर्ध- अर्धे/अर्धाः । कतिपय- कतिपये/कतिपयाः । नेम- नेमे/नेमाः । द्वितय- द्वितये/द्वितयाः । तृतय- तृतये/तृतयाः ।

शेषविभक्तिषु नेम-शब्दस्य सर्ववत् रूपाणि भवन्ति ।

तीय-प्रत्ययान्तानां शब्दानां ङित्-विभक्तीनां विषये विकल्पेन सर्वनामसंज्ञा भवतीति वार्तिकार्थः । 'तीय' इति तद्धितप्रत्ययो द्वि-शब्दात्, त्रि-शब्दात् च पूरणार्थे विधीयते, तेन 'द्वितीय', 'तृतीय' इत्येतौ शब्दौ निष्पद्येते । एतौ शब्दौ ङे-ङसि-ङि-विभक्तिषु परेषु विकल्पेन सर्वनामसंज्ञकौ भवतः ।

द्वितीय ङे - द्वितीय ए - द्वितीय स्मै - द्वितीयस्मै । सर्वनामसंज्ञाभावे- द्वितीयाय । द्वितीय ङसि - द्वितीय अस् - द्वितीय स्मात् - द्वितीयस्मात्-द् । सर्वनामसंज्ञाभावे- द्वितीयात्-द् । द्वितीय ङि - द्वितीय इ - द्वितीय स्मिन् - द्वितीयस्मिन् । सर्वनामसंज्ञाभावे- द्वितीये ।

एवं तृतीय-शब्दस्यापि उक्तासु विभक्तिषु क्रमेण तृतीयस्मै/तृतीयाय, तृतीयस्मात्-द्/तृतीयात्-द्, तृतीयस्मिन्/तृतीये इति रूपाणि जायन्ते । शेषविभक्तिषु रामशब्दवद् अनयो रूपाणि निष्पद्यन्ते ।

**प्रयोगसिद्धिप्रकारः**

**सर्वे**

सर्व-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया

बहुवचने जस्-प्रत्ययेऽनुबन्धलोपे 'सर्व अस्' इति जाते 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वशब्दस्य सर्वनामसंज्ञायाम् 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण प्राप्तं पूर्वसवर्णदीर्घं बाधित्वा 'जसः शी' इत्यनेन 'जस्' इत्यस्य स्थाने 'शी' इत्यादेशेऽनुबन्धलोपे 'सर्व ई' इति जाते 'आद् गुणः' इत्यनेन गुणे, वर्णयोगे 'सर्वे' इति रूपं सिद्धम् ।

## शब्द-रूपावलिः

| सर्व-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| सर्वः | सर्वौ | सर्वे |
| सर्वम् | सर्वौ | सर्वान् |
| सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्मात्-द् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्य | सर्वयोः | सर्वेषाम् |
| सर्वस्मिन् | सर्वयोः | सर्वेषु |
| हे सर्व ! | हे सर्वौ ! | हे सर्वे ! |

| पूर्व-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| पूर्वः | पूर्वौ | पूर्वे/पूर्वाः |
| पूर्वम् | पूर्वौ | पूर्वान् |
| पूर्वेण | पूर्वाभ्याम् | पूर्वैः |
| पूर्वस्मै | पूर्वाभ्याम् | पूर्वेभ्यः |
| पूर्वस्मात्-द्/पूर्वात्-द् | पूर्वाभ्याम् | पूर्वेभ्यः |
| पूर्वस्य | पूर्वयोः | पूर्वेषाम् |
| पूर्वस्मिन्/पूर्वे | पूर्वयोः | पूर्वेषु |
| हे पूर्व ! | हे पूर्वौ ! | हे पूर्वे/पूर्वाः ! |

**उभ-शब्दस्य पुँल्लिङ्गे रूपाणि**

उभौ

उभौ

उभाभ्याम्

उभाभ्याम्

उभाभ्याम्

उभयोः

उभयोः

हे उभौ !

**कतिपय-शब्दस्य रूपाणि**

कतिपयः कतिपयौ कतिपये/कतिपयाः

शेषं रामवत् ।

## उभय-शब्दस्य पुँल्लिङ्गे रूपाणि

| | |
|---|---|
| उभयः | उभये |
| उभयम् | उभयान् |
| उभयेन | उभयैः |
| उभयस्मै | उभयेभ्यः |
| उभयस्मात्-द् | उभयेभ्यः |
| उभयस्य | उभयेषाम् |
| उभयस्मिन् | उभयेषु |
| हे उभय ! | हे उभये ! |

### वाक्येषु प्रयोगानुशीलनम्

१. सर्वे छात्राः अत्र आगच्छन्तु ।

२. अद्य मासस्य कतमः दिवसः वर्तते ?

३. परेषाम् उपकारः अस्माकं संस्कारः विद्यते ।

४. विश्वस्मिन् विश्वे ईश्वरस्य व्याप्तिः वर्तते ।

५. अद्य कतिपये छात्राः कक्षायाम् अनुपस्थिताः सन्ति ।

### अभ्यासः

**१. सूत्राणि पठित्वा तेषां कार्यं लिखत**

(क) सर्वादीनि सर्वनामानि

(ख) ङसिङ्योः स्मात्स्मिनौ

(ग) स्वमज्ञातिधनाख्यानम्

(घ) आमि सर्वनाम्नः सुट्

**२. कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) त्यदादिगणे ..................... शब्दाः सङ्गृहीताः सन्ति । (दश, द्वादश)

(ख) त्यदादिगणः ................. अन्तर्गणो विद्यते । (सर्वादिगणस्य, शकन्ध्वादिगणस्य)

(ग) अन्तर-शब्दस्य ..................... अर्थे सर्वनामसंज्ञा भवति । (मध्ये, परिधानीये)

(घ) नेम-शब्दस्य जस्-विभक्तौ ............... सर्वनामसंज्ञा भवति । (नित्यम्, विकल्पेन)

(ङ) चरम-शब्दस्य ..................... सर्वनामसंज्ञा भवति। (जस्-विभक्तौ, ङे-विभक्तौ)

(च) द्वितय-शब्दः ..................... वर्तते। (तीय-प्रत्ययान्तः, तयप्-प्रत्ययान्तः)

**३. समानार्थकौ सर्वनामशब्दौ परस्परं मेलयत**

| | |
|---|---|
| सर्व | इतर |
| सम | तद् |
| अन्य | विश्व |
| त्वत् | अदस् |
| त्यद् | सिम |
| इदम् | त्व |

**४. अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचनानि निर्दिशत**

| प्रयोगः | प्रातिपदिकम् | विभक्तिः | वचनम् |
|---|---|---|---|
| सर्वेषाम् | सर्व | षष्ठी | बहुवचनम् |
| तृतीयस्मात् | ............ | ............ | ............ |
| पूर्वे | ............ | ............ | ............ |
| अन्तरस्मिन् | ............ | ............ | ............ |
| उभयोः | ............ | ............ | ............ |
| उभयेषाम् | ............ | ............ | ............ |

**५. एकवाक्येन उत्तरं लिखत**

(क) केषां शब्दानां सर्वनामसंज्ञा भवति ?

(ख) 'सर्वस्मिन्' इत्यत्र स्मिन्विधायकं सूत्रं किम् ?

(ग) धनवाचकस्य स्व-शब्दस्य प्रथमाबहुवचने किं रूपम् ?

(घ) उभय-शब्दः कस्मिन् वचने न प्रयुज्यते ?

(ङ) 'नेम' इति सर्वनामशब्दस्य कोऽर्थः ?

(च) सिम-शब्दाद् आम्-प्रत्यये किं रूपं भवति ?

**६. प्रश्नानाम् उत्तरं लिखत**

(क) 'सर्वादीनि सर्वनामानि' इति सूत्रस्य अर्थं लिखत ।

(ख) सर्वनाम-शब्दान् सूचीकृत्य सारिण्यां दर्शयत ।

(ग) राम-सर्वशब्दयोः रूपसिद्धिप्रक्रिया कासु विभक्तिषु विभिद्यते ?

(घ) पूर्वादि-नवशब्दाः के ?

(ङ) त्यदादयः शब्दाः के ? गणपाठक्रमेण लिखत ।

**७. विश्व-इतर-अपर-स्व-यतमशब्दानां प्रथमाबहुवचने रूपाणि विलिख्य प्रतिपदं वाक्येषु प्रयोगं दर्शयत ।**

**८. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिप्रकारं प्रदर्शयत**

(क) सर्वस्मै (ख) समेषाम् (ग) परस्मिन्

(घ) दक्षिणात् (ङ) अल्पाः (ङ) स्वे

**९. अन्य-शब्दस्य पुँल्लिङ्गे सर्वासु विभक्तिषु रूपाणि लिखत ।**

अष्टादशः पाठः

अजन्तपुँल्लिङ्गप्रकरणे

# निर्जर-विश्वपाशब्दौ

## जरसादेशविधायकं विधिसूत्रम्

**जराया जरसन्यतरस्याम् ७ । २ । १०१ ॥**

**अजादौ विभक्तौ । (प.) पदाङ्गाधिकारे तस्य च तदन्तस्य च । (प.) निर्दिश्यमानस्यादेशा भवन्ति । (प.) एकदेशविकृतमनन्यवत्, इति जरशब्दस्य जरस् । निर्जरसौ । निर्जरस इत्यादि । पक्षे हलादौ च रामवत् ॥ विश्वपाः ॥**

(जरायाः, अङ्गस्य, अचि, विभक्तौ, जरस्, अन्यतरस्याम्)

सरलार्थः- अजादिषु विभक्तिषु परतः जरा-शब्दस्य स्थाने विकल्पेन 'जरस्' इत्यादेशो भवति ।

वार्द्धक्यवाचको जरा-शब्दः स्त्रीलिङ्गे वर्तते । 'निर्गता जरा यस्मात्' इति विग्रहे समासेन निष्पन्नो निर्जर-शब्दस्तु पुँल्लिङ्गे प्रयुज्यते ।

### 'पदाङ्गाधिकारे तस्य च तदन्तस्य च'

सरलार्थः- 'पदस्य' 'अङ्गस्य' इत्यनयोः सूत्रयोः अधिकारे यत् कार्यं विधीयते तत् कार्यं निर्दिष्टस्य स्थाने, निर्दिष्टः शब्दः यस्य अन्ते भवति तस्य स्थानेऽपि भवतीति परिभाषार्थः ।

जरायाः जरसन्यतरायाम् इति सूत्रम् 'अङ्गस्य' इति सूत्रस्य अधिकारे अस्ति । अतः जरा-शब्दस्य कृते निर्दिष्ट जरस्-आदेशः जरा-शब्दान्तस्य निर्जरा-शब्दस्य स्थानेऽपि भवतीति अनया परिभाषया सिद्ध्यति ।

### 'निर्दिश्यमानस्य आदेशा भवन्ति'

सरलार्थः- सूत्रेण साक्षाद् निर्दिश्यमानस्य स्थानिनः स्थाने एव आदेशो भवतीति परिभाषार्थः ।

प्रकृते च 'जरा'शब्दस्य स्थाने निर्दिष्ट आदेशः तदन्तपरिभाषया 'निर्जरा' शब्दस्य स्थाने प्राप्तः अनया परिभाषया 'जरा' इति भागस्य एव जरसादेशो विधीयते, न तु 'निर्जरा'शब्दस्य स्थाने । अनेन सूत्रेण जरा-शब्दस्य निर्देशः कृतो वर्तते, परन्तु अत्र 'निर्जर' इति ह्रस्वान्तः शब्दो विद्यते । अत आह-

'एकदेशविकृतमनन्यवत्'

**सरलार्थः**- 'कश्चन शब्द एकस्मिन् भागे नियमपूर्वको विकृतः (परिवर्तितः) अस्ति, स अन्यवद् न भवति, अपि तु मूलशब्दवदेव भवति । 'निर्गता जरा यस्मात्' इति विग्रहे 'निर्' इति उपसर्गेण सह जरा-शब्दस्य समासे, उपसर्जनस्य ह्रस्वादेशप्रक्रियया निर्मिते निर्जर-शब्दे यो जर-शब्दो विद्यते, तत्र जरा-शब्दस्य आकारस्य नियमपूर्वकं परिवर्तनं विधाय अत्र 'जर' सम्भूतोऽस्ति । अतः एकदेशविकृतस्य अनन्यवत्वात् सूत्रेण जरा-शब्दस्य विहितो जरसादेशः उक्तस्य जर-शब्दस्य स्थाने अपि भवतीति ज्ञातव्यः ।

निर्जर-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञा भवति । जरस्-आदेशाऽभावपक्षे हलादौ च निर्जरशब्दस्य रूपाणि रामवत् भवन्ति । निर्जरः । औ-विभक्तौ, अन्यासु च अजादिविभक्तिषु तु उक्तस्य परिभाषात्रयस्य सहकारेण अनेन सूत्रेण 'जर' इत्यस्य वैकल्पिको जरसादेशो विधीयते । यथा-

निर्जर औ - निर्जरस् औ - निर्जरसौ । पक्षान्तरे रामवत्- निर्जरौ । निर्जर जस् - निर्जर अस् - निर्जरस् अस् - निर्जरसस् - निर्जरसर् - निर्जरसः । पक्षान्तरे- निर्जराः ।

एवं प्रकारेण अमादिषु अपि अजादिषु विभक्तिषु जरसादेशानन्तरं वर्णसम्मेलनम् एव कार्यम्, जरसादेशाभावे, हलादिविभक्तौ च रामवत्प्रक्रिया अवलम्बनीया ।

'विश्वं पाति' इति विग्रहे विच्-प्रत्यये, सर्वापहारिलोपे निष्पन्नस्य विश्वपा-शब्दस्य कृदन्ततया प्रातिपदिकसंज्ञायां सु-प्रत्ययेऽनुबन्धलोपे, सकारस्य रुत्वे विसर्गे च 'विश्वपाः' इति रूपं भवति । औ-प्रत्यये पूर्वसवर्णदीर्घे प्राप्ते-

### पूर्वसवर्णदीर्घनिषेधकं सूत्रम्

**दीर्घाज्जसि च ६ ।१ ।१०५ ॥**

**दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो न स्यात् । विश्वपौ । विश्वपाः । हे विश्वपाः । विश्वपाम् । विश्वपौ ॥**

(दीर्घात्, जसि, इचि, च, प्रथमयोः, पूर्वसवर्णदीर्घः, न)

**सरलार्थः**- दीर्घवर्णात् प्रथमा-द्वितीयाविभक्त्योः इच्-प्रत्याहारस्थे वर्णे परे, जस्-प्रत्यये परे च पूर्वसवर्णदीर्घो न भवति ।

'विश्वपा औ' इत्यवस्थायाम् प्रकृतसूत्रेण पूर्वसवर्णदीर्घस्य निषेधे पूर्वपरयोः स्थाने वृद्धौ आकार-औकारयोः स्थाने औकारे 'विश्वपौ' इति सिद्ध्यति । जस्-प्रत्यये च अनेन पूर्वसवर्णदीर्घ-निषेधे

सवर्णदीर्घो भवति । सम्बोधनेऽपि प्रथमावत् प्रक्रिया ज्ञेया । अम्-प्रत्यये 'अमि पूर्वः' इति पूर्वरूपे- विश्वपाम् ।

### सर्वनामस्थानसंज्ञाविधायकं सूत्रम्

**सुडनपुंसकस्य १ ।१ ।४३ ॥**
**स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ॥**
(सुट्, अनपुंसकस्य, सर्वनामस्थानम्)

**सरलार्थः**- नपुंसकलिङ्गभिन्नात् प्रातिपदिकाद् विहितानाम् सु, औ, जस्, अम्, औट् इत्येतेषां प्रत्ययानां 'सर्वनामस्थानम्' इति संज्ञा भवति । 'अनपुंसकस्य' इति निर्देशाद् नपुंसकलिङ्गे सूत्रमिदं न प्रवर्तते ।

### पदसंज्ञाविधायकं सूत्रम्

**स्वादिष्वसर्वनामस्थाने १ ।४ ।१७ ॥**
**कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यात् ॥**
(सु-आदिषु, असर्वनामस्थाने, पदम्)

**सरलार्थः**- सुप्-प्रत्ययानां सङ्ग्रहकात् 'स्वौजसमौट्... ४ ।१ ।२ ॥' इति सूत्राद् आरभ्य 'शेषाद्विभाषा ५ ।४ ।१५४ ॥' इति कप्-प्रत्ययविधायक-सूत्रपर्यन्तं ये केऽपि प्रत्यया विधीयन्ते, तेषां सर्वेषां ग्रहणम् अस्मिन् सूत्रे 'स्वादि' इति शब्देन क्रियते । एतेषु स्वादि-प्रत्ययेषु सर्वनामस्थानसंज्ञकान् प्रत्ययान् विहाय अन्येषु प्रत्ययेषु परेषु प्रकृतेः पद-संज्ञा भवति इति सूत्रार्थः ।

### भ-संज्ञाविधायकं सूत्रम्

**यचि भम् १ ।४ ।१८ ॥**
**यादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् ॥**
(सु-आदिषु, असर्वनामस्थानेषु, यचि, भम् ।)

**सरलार्थः**- पूर्वसूत्रवत् कप्-प्रत्ययावधिभूतेषु स्वादि-प्रत्ययेषु सर्वनामस्थानसंज्ञकान् प्रत्ययान् विहाय अन्येषु यकारादिषु, अजादिषु च प्रत्ययेषु परेषु प्रकृतेः भ-संज्ञा भवति । पूर्वसूत्रेण प्रकृतेः पदसंज्ञायां प्राप्तायाम् अनेन सूत्रेण यकारादिप्रत्ययानाम्, अजादिप्रत्ययानां च विषये पदसंज्ञां निषिध्य भसंज्ञा विधीयते । पदसंज्ञानिमित्तप्रत्ययेषु यस्य आदौ यकारः, अच्-वर्णो वा

विद्यते, तादृशेषु प्रत्ययेषु परेषु पदसंज्ञां बाधित्वा अनेन भ-संज्ञा भवति ।

विश्वपा-प्रातिपदिकाद् द्वितीयाबहुवचने शस्-प्रत्ययेऽनुबन्धलोपे 'विश्वपा अस्' इत्यवस्थायां प्रकृतेरङ्गसंज्ञायाम्, पूर्वसूत्रेण पदसंज्ञायाम् अनेन सूत्रेण भसंज्ञायां च प्राप्तायां का संज्ञा विधातव्या इति निर्णयार्थं सूत्रम् आह-

### एकस्या एव संज्ञाया नियामकम् अधिकारसूत्रम्

**आ कडारादेका संज्ञा १ । ४ । १ ॥**

**इत ऊर्ध्वं 'कडाराः कर्मधारये' इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया । या पराऽनवकाशा च ॥**

(आ, कडारात्, एका, संज्ञा)

सरलार्थः- सूत्रमिदं प्रथमाध्यायस्य चतुर्थपादस्य प्रथमं सूत्रं वर्तते । अस्मात् परं 'कडाराः कर्मधारये २ । २ । ३८ ॥' इति सूत्रात् पूर्वम् (त्रिषु पादेषु) उक्तासु संज्ञासु एकस्य शब्दस्य यदि अनेकाः संज्ञाः प्राप्ताश्चेत् तासु एका एव संज्ञा विधातव्या इति सूत्रार्थः ।

अधिकारेऽस्मिन् यदि द्वाभ्यां सूत्राभ्याम् एकस्य एव शब्दस्य द्वे संज्ञे उच्येते, तदा या संज्ञा सूत्रसङ्ख्यया परा भवति, या च अवकाशरहिता भवति, सा एव संज्ञा विधातव्या इत्यर्थः । यथा- भ-पदयोः संज्ञयोः एकत्र प्रप्तौ भ-संज्ञा एव विधेया, यतः पदसंज्ञां प्रति भसंज्ञा अनवकाशा वर्तते । अनवकाशो नाम प्रवृत्तिस्थलाभावः एतद्विपरीतावस्था सावकाश-पदेन व्यवह्रियते । कप्-प्रत्ययावधिषु सर्वनामस्थानभिन्नेषु सर्वेषु अपि स्वादिप्रत्ययेषु परेषु 'स्वादिष्वसर्वनामस्थाने' इत्यनेन प्रकृतेः पदसंज्ञां प्राप्नोति । तत्रैव यकारादिषु, अजादिषु च प्रत्ययेषु परेषु 'यचि भम्' इत्यनेन भ-संज्ञां प्राप्नोति । यदि यकारादिषु, अजादिषु च प्रत्ययेषु परेषु अपि पदसंज्ञा विधीयते तदा भ-संज्ञायाः प्राप्तिस्थलम् (अवकाशः) कुत्रापि न भवति । अनेन ज्ञायते यत्- भ-पदयोः भ-संज्ञा अनवकाशा वर्तते । अतः अनयोरेकत्र प्राप्तौ अनवकाशत्वात्, एकसंज्ञाधिकारात् च भ-संज्ञा एव विधेया । कृतायां भ-संज्ञायामपि असर्वनामस्थानेषु यकारभिन्नेषु हलादिषु स्वादिप्रत्ययेषु परेषु पद-संज्ञाया अवकाशो विद्यते एव, अतः अत्र पद-संज्ञा सावकाश वर्तते । यत्र च द्वयोः सावकाशयोः संज्ञयोर्मध्ये विरोधो भवति, तत्र सूत्रसङ्ख्यया परा संज्ञा वलबती भवतीति ज्ञातव्यम् ।

'विश्वपा अस्' इत्यत्र परत्वात्, अनवकाशाच्च पदसंज्ञां बाधित्वा भ-संज्ञायां कृतायाम्-

### आलोपविधायकं विधिसूत्रम्

**आतो धातोः ६ । ४ । १४० ॥**

**आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः । 'अलोऽन्त्यस्य' । विश्वपः । विश्वपा । एवं**

**शङ्खध्मादयः । धातोः किम् ? हाहान् ॥**

(आतः, धातोः, भस्य, लोपः)

**सरलार्थः**- यत् प्रातिपदिकम् आकारान्तधातुनिर्मितं भवति, आकारान्तं च भवति, भसंज्ञकं च भवति, अङ्गसंज्ञकं च भवति, तस्य अन्तिमवर्णस्य (आकारस्य) लोपो भवति ।

अनेन सूत्रेण अलोऽन्त्यपरिभाषया भ-संज्ञकस्य अङ्गस्य 'विश्वपा' इत्यस्य अन्त्यस्य आकारस्य लोपे 'विश्वप् अस्' इति जाते, वर्णयोगे, सकारस्य रुत्वे विसर्गे च 'विश्वपः' इति सिद्ध्यति । एवमेव टादिषु अपि अजादिविभक्तिषु भत्वेन आकारलोप एव विशेषं कार्यम्, तेन सिद्धस्य 'विश्वप्' इति स्वरूपस्य प्रत्ययेन सह मेलनम्, सान्तप्रत्ययेषु रुत्वविसर्गौ च इत्येव सिद्धिप्रक्रिया ज्ञेया । हलादिविभक्तिषु विभक्तियोजनेनैव रूपाणि सिद्ध्यन्ति । यथा- विश्वपा भ्याम् - विश्वपाभ्याम् । विश्वपा भिस् - विश्वपाभिः । विश्वपा भ्यस् - विश्वपाभ्यः । विश्वपा सुप् - विश्वपासु ।

### प्रयोगसिद्धिप्रकारः

**निर्जरसौ**

निर्जर-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया द्विवचने औ-प्रत्यये 'निर्जर औ' इति जाते 'जराया जरसन्यतरस्याम्' इति सूत्रेण निर्जर-शब्दस्य 'जर'भागस्य स्थाने विकल्पेन जरसादेशे 'निर्जरस् औ' इति जाते, वर्णसम्मेलने 'निर्जरसौ' इति रूपं सिद्धम् । जरसादेशाभावपक्षे, 'निर्जर औ' इत्यवस्थायां वृद्धिं बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते, तस्य च 'नादिचि' इत्यनेन निषेधे, बाधकाभावे पुनः वृद्धौ, वर्णयोगे 'निर्जरौ' इत्यपि सिद्ध्यति ।

### शब्द-रूपावलिः

**निर्जर-शब्दस्य रूपाणि**

| | | |
|---|---|---|
| निर्जरः | निर्जरसौ/निर्जरौ | निर्जरसः/निर्जराः |
| निर्जरसम्/निर्जरम् | निर्जरसौ/निर्जरौ | निर्जरसः/निर्जरान् |
| निर्जरसा/निर्जरेण | निर्जराभ्याम् | निर्जरैः |
| निर्जरसे/निर्जराय | निर्जराभ्याम् | निर्जरेभ्यः |
| निर्जरसः/निर्जरात्-द् | निर्जराभ्याम् | निर्जरेभ्यः |

| | | |
|---|---|---|
| निर्जरसः/निर्जरस्य | निर्जरसोः/निर्जरयोः | निर्जरसाम्/निर्जराणाम् |
| निर्जरसि/निर्जरे | निर्जरसोः/निर्जरयोः | निर्जरेषु |
| हे निर्जर ! | निर्जरसौ/निर्जरौ ! | निर्जरसः/निर्जराः ! |

**विश्वपा-शब्दस्य रूपाणि**

| | | |
|---|---|---|
| विश्वपाः | विश्वपौ | विश्वपाः |
| विश्वपाम् | विश्वपौ | विश्वपः |
| विश्वपा | विश्वपाभ्याम् | विश्वपाभिः |
| विश्वपे | विश्वपाभ्याम् | विश्वपाभ्यः |
| विश्वपः | विश्वपाभ्याम् | विश्वपाभ्यः |
| विश्वपः | विश्वपोः | विश्वपाम् |
| विश्वपि | विश्वपोः | विश्वपासु |
| हे विश्वपाः ! | हे विश्वपौ ! | हे विश्वपाः ! |

### वाक्येषु प्रयोगानुशीलनम्

१. विश्वपा जगत् रक्षति ।

२. निर्जरसः स्वर्गे निवसन्ति ।

३. देवताः निर्जराः भवन्ति ।

४. पूजकः निर्जरसः पश्यति ।

५. विश्वपि मम महान् विश्वासो विद्यते ।

६. बृहस्पतिः निर्जरसां गुरुः अस्ति ।

### अभ्यासः

**१. सूत्राणि पठित्वा तेषां अर्थं लिखत**

(क) जराया जरसन्यतरस्याम्

(ख) आतो धातोः

(ग) स्वादिष्वसर्वनामस्थाने

(घ) यचि भम्

(ङ) आ कडारादेशका संज्ञा

२. **कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) 'सुट्' इत्यस्मिन् ..................... प्रत्ययाः समायान्ति । (त्रयः, पञ्च)

(ख) भ-पदसंज्ञयोरेकत्रप्राप्तौ ..................... विधीयते । (भसंज्ञा, पदसंज्ञा)

(ग) नपुंसकलिङ्गे स्वादि-पञ्च प्रत्ययाः सर्वनामस्थानसंज्ञकाः ..................... । (भवन्ति, न भवन्ति)

(घ) एकसंज्ञाधिकारे ....................., अनवकाशा च संज्ञा विधीयते । (पूर्वा, परा)

(ङ) जरा-शब्दस्य जरसादेशो ..................... विभक्तौ भवति । (अजादौ, हलादौ)

३. **परस्परं मेलयत**

| | |
|---|---|
| सुडनपुंसकस्य | आलोपः |
| स्वादिष्वसर्वनामस्थाने | भसंज्ञा |
| यचि भम् | पदसंज्ञा |
| जराया जरसन्यतरस्याम् | सर्वनामस्थानसंज्ञा |
| आतो धातोः | जरसादेशः |

४. **अर्थं लिखत**

(क) पदाङ्गाधिकारे तस्य च तदन्तस्य च ।

(ख) निर्दिश्यमानस्यादेशा भवन्ति ।

(ग) एकदेशविकृतमनन्यवत् ।

(घ) या पराऽनवकाशा च ।

**४. एकवाक्येन उत्तरं लिखत**

(क) भ-संज्ञा केन सूत्रेण विधीयते ?

(ख) विश्वपा-शब्दस्य चतुर्थ्येकवचने किं रूपम् ?

(ग) 'विश्वपाम्' इत्यत्र आलोपविधायकं सूत्रं किम् ?

(घ) 'आ कडारादेका संज्ञा' इति सूत्रं किं करोति ?

(ङ) 'निर्जरसि' इत्यत्र का विभक्तिरस्ति ?

**६. प्रश्नानाम् उत्तरं लिखत**

(क) 'सर्वनामस्थानम्' इति पदेन कुत्र कुत्र केषां बोधो भवति ?

(ख) स्वादिविभक्तिषु पुँल्लिङ्गे भसंज्ञायाः निमित्तविभक्तयः काः ?

(ग) कासु विभक्तिषु परतः प्रकृतेः पदसंज्ञा भवति ?

(घ) भ-पदयोः संज्ञयोरेकत्र प्राप्तौ का संज्ञा विधीयते ?

(ङ) निर्जर-शब्दस्य कासु विभक्तिषु वैकल्पिकरूपाणि जायन्ते ?

(च) 'स्वादिष्वसर्वनामस्थाने' इति सूत्रस्य अर्थं लिखत ।

**७. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिं कुरुत**

(क) निर्जरसः (ख) विश्वपः

(ग) विश्वपे (घ) हे विश्वपाः

अजन्तपुँल्लिङ्गप्रकरणे

# इकारान्तशब्दाः

**हरिः । हरी ॥**

इकारान्त-पुँल्लिङ्गस्य हरि-शब्दस्य 'हरति इति हरिः' इत्यर्थे स्वीकरणे व्युत्पत्तिपक्षे, कस्यचित् पुरुषस्य संज्ञारूपेण प्रयुक्ते च अव्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति । हरि-प्रातिपदिकात् सु-प्रत्ययेऽनुबन्धलोपे, सकारस्य रुत्वविसर्गे 'हरिः' इति रूपं जायते । औ-प्रत्यये 'हरि औ' इत्यवस्थायां यणं बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे, इकार-औकारयोः स्थाने ईकार एकादेशे 'हर् ई' इति जाते, वर्णयोगे 'हरी' इति रूपं सिद्ध्यति । विष्णु, भानु इत्यादिभ्य उकारान्त-प्रातिपदिकेभ्य औ-प्रत्यये पूर्वसवर्णदीर्घेन पूर्वपरयोः स्थाने एक ऊकारो आदिश्यते, तेन विष्णू, भानू इत्यादीनि च रूपाणि जायन्ते । जस्-प्रत्यये-

## गुणविधायकं विधिसूत्रम्

**जसि च ७ । ३ । १०९ ॥**

**ह्रस्वान्तस्याङ्गस्य गुणः । हरयः ॥**

(ह्रस्वस्य, अङ्गस्य, गुणः, जसि, च)

**सरलार्थः**- जस्-प्रत्यये परे सति ह्रस्व-वर्णान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने गुणसंज्ञको वर्ण आदेशो भवति । पूर्वसवर्णदीर्घं बाधित्वा अनेन सूत्रेण गुणादेशो विधीयते । 'आद् गुणः' इत्यनेन विहितो गुणः पूर्वपरयोः स्थाने एकादेशगुणः, परन्तु अनेन सूत्रेण विहितः केवलं गुणादेशः, अतः अस्य एक एव स्थानी भवतीति ज्ञेयम् । गुणादेशे स्थानत आन्तरतम्याद् इकारस्य एकारः, उकारस्य च ओकारः आदेशो भवति ।

हरि जस् - हरि अस्, इत्यवस्थायां पूर्वसवर्णदीर्घं बाधित्वा अनेन सूत्रेण अङ्गान्त्यस्य इकारस्य गुणे, आन्तरतम्याद् एकारे 'हरे अस्' इति जाते, एकारस्य अयादेशे 'हर् अय् अस्' इति जाते, वर्णयोगे, सकारस्य रुत्वे विसर्गे- हरयः । उकारान्तशब्देषु अनेन ओकारगुणः तस्य अवादेशश्च विधीयेते । यथा-

विष्णु जस् - विष्णु अस् - विष्णो अस् (जसि च) - विष्ण् अव् अस् - विष्णवस् - विष्णवर् - विष्णवः ।

## गुणविधायकं विधिसूत्रम्

**ह्रस्वस्य गुणः ७ । ३ । १०८ ॥**
**सम्बुद्धौ । हे हरे । हरिम् । हरी । हरीन् ॥**
(ह्रस्वस्य, अङ्गस्य, सम्बुद्धौ, गुणः)

सरलार्थः- सम्बुद्धिसंज्ञके प्रत्यये परे सति ह्रस्ववर्णान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने गुणादेशो भवति । सम्बोधनस्य एकवचने अनेन गुणे कृते इकारान्ता अङ्गा एकारान्तत्वं प्राप्नुवन्ति, उकारान्ताश्च ओकारान्तत्वम् । ततः 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यनेन सम्बुद्धिसंज्ञकस्य सकारस्य लुक् भवति ।

सम्बोधनस्य एकवचने सु-प्रत्यये, प्रत्ययस्य सम्बुद्धिसंज्ञायाम्, प्रकृतेश्च अङ्गसंज्ञायाम्-

हरि सु - हरि स् - हरे स् (ह्रस्वस्य गुणः) - हरे (एङ्ह्रस्वात् सम्बुद्धेः) - हे हरे ।
विष्णु सु - विष्णु स् - विष्णो स् (ह्रस्वस्य गुणः) - विष्णो (एङ्ह्रस्वात् सम्बुद्धेः) - हे विष्णो ।

हरि शस् - हरि अस् - हरीस् (पूर्वसवर्णदीर्घः) - हरीन् (तस्माच्छसो नः पुंसि) ।
विष्णु शस् - विष्णु अस् - विष्णूस् - विष्णून् ।

## घि-संज्ञाविधायकं सूत्रम्

**शेषो घ्यसखि १ । ४ । ७ ॥**
**शेष इति स्पष्टार्थम् । अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञम् ॥**

(शेषः, ह्रस्वः, यू, घि, असखि) शेषः = उक्ताद् अन्यः, नदीसंज्ञा पूर्वमेव उक्ता, अतः शेषपदेन अत्र नदीसंज्ञकाद् अन्य इति बोध्यते । यू = इश्च उश्च = इवर्ण-उवर्णौ । असखि = सखि-शब्दभिन्नः)

सरलार्थः- सखि-शब्दं विहाय नदीसंज्ञकभिन्नानाम् इकारान्तानाम्, उकारान्तानां च शब्दानां 'घि' इति संज्ञा भवति । तत्र केवलं 'सखि'शब्दस्य एव घिसंज्ञायाः निषेधः, सुसखि, राजसखि, प्रियसखि इत्यादीनां सखि-शब्दान्तशब्दानां तु अनेन सूत्रेण घिसंज्ञा भवत्येव इति ज्ञेयम् ।

**घिसंज्ञाप्रयुक्त-कार्याणि-**

- ‘टा’ इत्यस्य स्थाने ‘ना’ आदेशः । स्त्रीलिङ्गे अयं न भवति । (आङो नाऽस्त्रियाम्)
- ङे-ङसि-ङस्-विभक्तिषु अङ्गस्य अन्त्यवर्णस्य गुणः । (घेर्ङिति)
- ङि-प्रत्यये अङ्गस्य अकारान्तादेशः, प्रत्ययस्य च औकारादेशः । (अच्च घेः)

तृतीयैकवचने टा-प्रत्यये अनेन सूत्रेण अङ्गस्य घिसंज्ञायाम्-

### नादेशविधायकं विधिसूत्रम्

**आङो नाऽस्त्रियाम् ७ । ३ । १२० ॥**

**घेः परस्याङो ना स्यादस्त्रियाम् । आङिति टासंज्ञा प्राचाम् । हरिणा । हरिभ्याम् । हरिभिः ॥**

(घेः, अङ्गात्, आङः, ना, अस्त्रियाम्) घेः = घिसंज्ञकस्य । आङः = ‘टा’ इत्यस्य । अस्त्रियाम् = स्त्रीलिङ्गभिन्ने ।

**सरलार्थः**- स्त्रीलिङ्गभिन्नाद् घिसंज्ञकाद् अङ्गात् परस्य टा-प्रत्ययस्य स्थाने ‘ना’ इति आदेशो भवति । सूत्रेऽस्मिन् आगतः ‘आङ्’ इति शब्दः तृतीयैकवचनस्य ‘टा’ इत्यस्य एव अपरं नाम वर्तते । ‘अस्त्रियाम्’ इति निर्देशात् स्त्री-लिङ्गे अस्य विधेः प्रसक्तिः न भवति ।

हरि टा - हरि आ - हरि ना - हरिना - हरिणा (अट्कुप्वाङ्नुम्व्यवायेऽपि) । विधि-शब्दस्य तु णत्वाभावे- विधिना ।

विष्णु टा - विष्णु आ - विष्णु ना - विष्णुना । गुरु-शब्दस्य तु रेफात् परस्य नकारस्य णत्वे- गुरुणा ।

भ्यामादिषु हलादिप्रत्ययेषु विभक्तियोजनादिसामान्यप्रक्रिया स्मर्तव्या । हरि भ्याम् - हरिभ्याम् । हरि भिस् - हरिभिस् - हरिभिर् - हरिभिः । विष्णु भ्याम् - विष्णुभ्याम् । विष्णु भिस् - विष्णुभिः ।

### गुणविधायकं विधिसूत्रम्

**घेर्ङिति ७ । ३ । १११ ॥**

**घिसंज्ञकस्य ङिति सुपि गुणः । हरये । हरिभ्याम् । हरिभ्यः ॥**

(घेः, अङ्गस्य, ङिति, सुपि, गुणः)

**सरलार्थः**- ङित्-प्रत्यये सुपि परे घि-संज्ञकस्य अङ्गस्य अन्त्यवर्णस्य स्थाने गुणसंज्ञक आदेशो भवति । सुप्-प्रत्ययेषु चत्वारः प्रत्यया ङितः सन्ति । तेषु ङे, ङसि, ङस् इत्येतेषु

परेषु अनेन घिसंज्ञकस्य अङ्गस्य गुणो विधीयते, ङि-प्रत्यये तु अत्वौत्वविधायकेन 'अच्च घेः' इति सूत्रेण सूत्रमिदं बाध्यते ।

चतुर्थ्येकवचने अङ्गस्य घिसंज्ञायाम्, अनेन सूत्रेण इकारस्य गुणे 'हरे ए' इति जाते, 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'हरये' इति ।

विष्णु ङे - विष्णु ए - विष्णो ए - विष्ण् अव् ए - विष्णवे ।

### पूर्वरूपविधायकं विधिसूत्रम्

**ङसिङसोश्च ६ ।१ ।११० ॥**

**एङो ङसिङसोरति पूर्वरूपमेकादेशः । हरेः २ । हर्योः २ । हरीणाम् ॥**

(एङः, ङसि-ङसोः, च अति, पूर्वपरयोः, एकः, पूर्वः)

सरलार्थः- एकार-ओकारयोः ङसि-प्रत्ययस्य, ङस्-प्रत्ययस्य च अकारे परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशो भवति ।

ङसि-ङस्प्रत्यययोः प्रकृतेर्घिसंज्ञायाम्, पूर्वसूत्रेण अङ्गस्य गुणे कृते प्रातिपदिका एङन्तत्वं प्राप्नुवन्ति, ततः उक्तयोः प्रत्यययोः ह्रस्वाकारे परे अनेन सूत्रेण पूर्वरूप एकादेशो विधीयते । यथा-

हरि ङसि/ङस् - हरि अस् - हरे अस् (घेर्ङिति) - हरेस् (ङसिङसोश्च) - हरेर् - हरेः ।

विष्णु ङसि/ङस् - विष्णु अस् - विष्णो अस् (घेर्ङिति) - विष्णोस् (ङसिङसोश्च) - विष्णोर् - विष्णोः ।

षष्ठी-सप्तम्योर्द्विवचने ओस्-प्रत्यये तु सन्धिकार्यमेव विशेषः-

हरि ओस् - हर् य् ओस् (इको यणचि) - हर्योस् - हर्योर् - हर्योः ।

विष्णु ओस् - विष्ण् व् ओस् (इको यणचि) - विष्ण्वोस् - विष्ण्वोर् - विष्ण्वोः ।

षष्ठीबहुवचने रामवदेव प्रक्रिया-

हरि आम् - हरि नाम् (ह्रस्वनद्यापो नुट्) - हरीनाम् (नामि) - हरीणाम् । विधि- विधीनाम् ।

विष्णु आम् - विष्णु नाम् (ह्रस्वनद्यापो नुट्) - विष्णूनाम् (नामि) । गुरु- गुरूणाम् ।

### अत्वौत्वादेशविधायकं विधिसूत्रम्

**अच्च घेः ७ ।३ ।११९ ॥**

**इदुद्भ्यामुत्तरस्य ङेरौत्, घेरच्च । हरौ । हरिषु । एवं कव्यादयः ॥**

(घेः, इदुद्भ्याम्, ङेः, औत्, अङ्गस्य, औत्, च) ङेः = 'ङि' इत्यस्य षष्ठ्येकवचनम्, औत् = औकारः

**सरलार्थः**- इकारान्तात्, उकारान्तात् च अङ्गात् परस्य ङि-प्रत्ययस्य स्थाने 'औत्' इत्यादेशो भवति, घि-संज्ञकस्य अङ्गस्य अन्तिमवर्णस्य स्थाने अकारादेशश्च भवति । अनेन सूत्रेण 'घेर्ङिति' इत्यनेन प्राप्तं गुणं प्रबाध्य द्वे कार्ये विधीयेते- अङ्गस्य अकारान्तादेशः, प्रत्ययस्य च औकारादेशः । अनेन अत्वौत्वे कृते 'वृद्धिरेचि' इत्यनेन वृद्धिरेकादेशो विधीयते ।

सप्तम्येकवचने- हरि ङि - हरि इ - हर औ (अच्च घेः) - हर् औ - हरौ । विष्णु ङि - विष्णु इ - विष्ण औ (अच्च घेः) - विष्ण् औ - विष्णौ ।

सप्तमीबहुवचने सुप्-प्रत्यये इकारात्, उकाराद् वा उत्तरस्य प्रत्ययस्थस्य सकारस्य षत्वे- हरिषु, विष्णुषु । एवं प्रकारेण सखि-पति-कति-त्रि-शब्दभिन्नानाम् इकारान्तानाम् उकारान्तानां च पुँल्लिङ्ग-प्रातिपदिकानां रूपाणि निष्पद्यन्ते ।

सखिशब्दः मित्रवाचकः । इकारान्त-पुँल्लिङ्गशब्देषु अयम् एव शब्दो घिसंज्ञां न लभते । सखि-प्रातिपदिकात् सु-प्रत्ययेऽनुबन्धलोपे 'सखि स्' इत्यवस्थायाम्-

### अनङादेशविधायकं विधिसूत्रम्

**अनङ् सौ ७ ।१ ।९३ ॥**

**सख्युरङ्गस्यानङादेशोऽसम्बुद्धौ सौ ॥**

(सख्युः, अनङ्, असम्बुद्धौ, सौ)

**सरलार्थः**- सम्बुद्धिभिन्ने सु-प्रत्यये परे सखि-शब्दरूपस्य अङ्गस्य अन्त्यवर्णस्य (इकारस्य) स्थाने 'अनङ् (अन्)' इत्यादेशो भवति । अनङ् इत्यस्य ङकार इत्संज्ञकः, नकारोत्तरवर्ती अकारश्च उच्चारणार्थः, अतः 'अन्' इत्येव अवशिष्यते । ङित्वाद् 'ङिच्च' इति सूत्रेण सखि इत्यस्य अन्त्यस्य इकारस्य स्थाने अन् विधीयते । अयम् आदेशः प्रथमाया एकवचने सुप्रत्यये परे एव भवति न तु सम्बोधनस्य एकवचने, असम्बुद्धौ विधानात् ।

अनेन अङ्गस्य अनङादेशेऽनुबन्धलोपे, ङित्वाद् अन्त्यस्य इकारस्य स्थाने 'अन्' इति विधाने 'सखन् स्' इत्यवस्थायाम्-

### उपधा-संज्ञाविधायकं सूत्रम्-

**अलोऽन्त्यात्पूर्व उपधा १ ।१ ।६५ ॥**

**अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः ॥**
(अन्त्यात्, अलः, पूर्वः, उपधा)

सरलार्थः- कस्मिँश्चिद् अपि शब्दे अन्तिमवर्णात् पूर्वं विद्यमानस्य वर्णस्य 'उपधा' इति संज्ञा भवति । व्याकरणशास्त्रे उपधा-पदेन उपान्त्यवर्णः (अन्त्यवर्णात् पूर्ववर्णः) बोध्यते ।

अनेन सूत्रेण 'सखन्' इत्यवस्थायाम् उपान्त्यस्य खकारात् परस्य अकारस्य उपधा-संज्ञायाम्, प्रत्ययस्य 'सुडनपुंसकस्य' इत्यनेन सर्वनामस्थानसंज्ञायाञ्च आह -

### दीर्घविधायकं विधिसूत्रम्

**सर्वनामस्थाने चासम्बुद्धौ ६ । ४ । ८ ॥**
**नान्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने ॥**
(नः, अङ्गस्य, च, उपधायाः, दीर्घः, असम्बुद्धौ, सर्वनामस्थाने) नः = न् इत्यस्य षष्ठ्येकवचनम् ।

सरलार्थः- सम्बुद्धिभिन्ने सर्वनामस्थानसंज्ञक-प्रत्यये परे सति नकारान्तस्य अङ्गस्य उपधायाः स्थाने दीर्घ आदेशो भवति ।

अनेन 'सखन्' इत्यस्य नकारान्तस्य शब्दस्य उपधाभूतस्य अकारस्य दीर्घे 'सखान् स्' इति जाते-

### अपृक्तसंज्ञाविधायकं सूत्रम्

**अपृक्त एकाल् प्रत्ययः १ । २ । ४१ ॥**
**एकाल् प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् ॥**
(एक-अल्, प्रत्ययः, अपृक्तः)

सरलार्थः- यस्य प्रत्ययस्य अनुबन्धविनिर्मुक्तस्वरूपे केवलम् एक एव वर्णो भवति, तस्य 'अपृक्तः' इति संज्ञा भवति । अनुबन्धेन एकवर्णो अवशिष्टः, एकवर्णत्वेन विहितो वा प्रत्ययः अपृक्तः कथ्यते ।

अनेन सूत्रेण एकवर्णत्वेन अवशिष्टस्य 'स्' इति प्रत्ययस्य अपृक्तसंज्ञायाम्-

### हल्ङ्यादिलोपविधायकं विधिसूत्रम्

**हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ६ । १ । ६८ ॥**
**हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते ॥**
(हल्-ङी-आब्भ्यः, दीर्घात्, सु-ति-सि-अपृक्तम्, हल्, लोपः)

सरलार्थः- हल्वर्णान्तात्, दीर्घौ यौ ङि-आपौ तदन्ताच्च उत्तरस्य सु, तिप्, सिप् इति एतेषाम् अपृक्तसंज्ञकस्य हल्-वर्णस्य लोपो भवति । अनेन सूत्रेण व्यञ्जनवर्णात् परस्य सु-तिप्-सिप्सम्बन्धिनः अपृक्तस्य हल्वर्णस्य, अजन्तशब्दानां विषये तु टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन् इति षण्णां प्रत्ययानां दीर्घस्वरूपेभ्य उत्तरस्य अपृक्तस्य हल्वर्णस्य च लोपो भवति । अनेन हलन्तात् परस्य सु-सम्बन्धिनः अपृक्तस्य सकारस्य लोपे 'सखान्' इति जाते, प्रत्यलक्षणमाश्रित्य पदसंज्ञायाम्-

## नलोपविधायकं विधिसूत्रम्

**न लोपः प्रातिपदिकान्तस्य ८ । २ । ७ ॥**

**प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः । सखा ॥**

(प्रातिपदिक, पदस्य, अन्तस्य, न, लोपः)

सरलार्थः- यदि कस्यचित् प्रातिपदिकस्य पदसंज्ञा अपि भवति, तर्हि तस्य अन्ते स्थितस्य नकारस्य लोपो भवति ।

अनेन सूत्रेण पदसंज्ञकस्य प्रातिपदिकान्तस्य नकारस्य लोपे 'सखा' इति रूपम् ।

सखि सु - सखि स् - सखन् स् - सखान् स् - सखान् - सखा ।

## णिद्वद्भावविधायकम् अतिदेशसूत्रम्

**सख्युरसम्बुद्धौ । ७ । १ । ९२ ।**

**सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् ॥**

(सख्युः, अङ्गात्, असम्बुद्धौ, सर्वनामस्थाने, णित्) णित् = णकार इत् यस्य, तद्वद् इत्यर्थः ।

सरलार्थः- सखि-शब्दरूपाद् अङ्गाद् विहिताः सम्बुद्धिसंज्ञकभिन्नाः सर्वनामस्थानसंज्ञकाः प्रत्यया णित्सदृशा भवन्ति । यद्यपि सु, औ, जस्, अम्, औट् इत्येतेषु सर्वनामस्थानसंज्ञकप्रत्ययेषु णकारो नास्ति तथापि सूत्रमिदम् एतेषु णित्वम् अतिदिशति । तदनु णित्वप्रयुक्तानि कार्याणि च जायन्ते ।

'सखि औ' इत्यवस्थायां सखि-शब्दरूपाद् अङ्गात् परस्य सर्वनामस्थानसंज्ञकस्य औ-प्रत्ययस्य अनेन सूत्रेण णिद्वद्भावे, पूर्वसवर्णदीर्घं बाधित्वा-

### वृद्धिविधायकं विधिसूत्रम्

**अचो ञ्णिति ७ । २ । ११५ ॥**

**अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे । सखायौ । सखायः । हे सखे । सखायम् । सखायौ । सखीन् । सख्या । सख्ये ॥**

(अचः, अङ्गस्य, ञ्णिति, वृद्धिः) ञ्णिति = ञिति णिति च, ञकार-णकारयोः इत्संज्ञा यस्य तस्मिन् इत्यर्थः)

सरलार्थः- ञित्-प्रत्यये, णित्-प्रत्यये च परे सति अच्-वर्णान्तस्य अङ्गस्य अन्त्य-स्वरवर्णस्य स्थाने वृद्धिसंज्ञक आदेशो भवति । पूर्वसूत्रेण णित्वधर्मस्य अतिदेशात् सम्बुद्धिभिन्न-सर्वनामस्थाने परे अनेन सखि-शब्दस्य अन्त्यस्य इकारस्य वृद्धौ, आन्तरतम्याद् ऐकारादेशो विधीयते ।

सखि औ - सखै औ - सख् आय् औ - **सखायौ** । सखि जस् - सखि अस् - सखै अस् - सख् आय् अस् - सखायस् - सखायर् - **सखायः** । सम्बुद्धौ तु णिद्वद्भावस्य अभावाद् वृद्धौ अपि अप्राप्तौ हरिशब्दवत् **'हे सखे'** इति रूपं जायते । सखि अम् - सखै अम् - सख् आय् अम् - **सखायम्** । सखि औट् - सखि औ - सखै औ - सख् आय् औ - सखायौ । शस्-प्रत्यये तस्य सर्वनामस्थानभिन्नतया णित्वस्य अप्रसङ्गे हरिवदेव **'सखीन्'** इति रूपं निष्पद्यते । तृतीयैकवचने सखि टा, सखि आ, इत्यवस्थायाम् घिसंज्ञाया अभावत्वाद् ना-भावस्यापि अभावे इकारस्य यणि- **सख्या** । भ्यामादिहलादौ विभक्तौ, ओस्विभक्तौ, आम्विभक्तौ च सखि-शब्दस्यापि हरिवदेव रूपाणि जायन्ते । ङिद्विभक्तिषु घिप्रयुक्तस्य गुणस्य, अत्वौत्वस्य च अप्राप्तिर्बोध्या । सखि ङे - सखि ए - सख् य् ए (इको यणचि) - सख्ये ।

### उत्वविधायकं विधिसूत्रम्

**ख्यत्यात्परस्य ६ । १ । ११२ ॥**

**खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः । सख्युः ॥**

(ख्य-त्यात्, परस्य, ङसि-ङसोः, अतः, उत्) ख्य = खिशब्द-खीशब्दयोः कृतयणादेशम् 'ख्य्' इति स्वरूपम् । त्य = तिशब्द-तीशब्दयोः कृतयणादेशम् 'त्य्' इति स्वरूपम् । अतः = अकारस्य । उत् = उकारः)

सरलार्थः- खि, खी, ति, ती इति शब्दस्वरूपाणां यणादेशेन निर्मिताभ्याम् 'ख्य्', 'त्य्' इति स्वरूपाभ्याम् उत्तरस्य ङसि-ङस्प्रत्यययोरवयवस्य अकारस्य स्थाने उकारादेशो भवति ।

सूत्रेऽस्मिन् खि-ति-खी-ती-शब्देभ्य उत्तरवर्तिनोः इकार-ईकारयोः यणादेशं विधाय निर्मितयोः 'ख्य्', 'त्य्' शब्दस्वरूपयोरेव ग्रहणं भवति, न तु अन्येषाम् । तेन, मुख्य, अपत्य इत्येतयोः शब्दयोरपि अन्ते 'ख्य', 'त्य' इत्येते शब्दस्वरूपे दृश्येते, परं ते खि-ति-खी-तीशब्दानां यणादेशेन विकृतरूपे न स्तः, अतः ताभ्यां परस्य ङसि-ङस्प्रत्यययोरकारस्य अनेन सूत्रेण उत्वं न भवतीति बोद्धव्यम् । खि-ति-खी-तीशब्दानां विषयेऽपि यत्र यणादेशोऽस्ति, तत्रैव अस्य सूत्रस्य प्रवृत्तिर्भवति, यतः पूर्वं यणादेशे कृते एव अस्य प्रसक्तिर्जायते ।

सखि ङसि/ङस् - सखि अस् - सख् य् अस् (इको यणचि) - सख् य् उस् (ख्यत्यात्परस्य) - सख्युस् - सख्युर् - सख्युः ।

## औत्वविधायकं विधिसूत्रम्

**औत् ७ । ३ । ११८ ।**

**इतः परस्य ङेरौत् । सख्यौ । शेषं हरिवत् ॥**

(इतः, अङ्गात्, ङेः, औत्) इतः = ह्रस्व-इकारात् । ङेः = ङि इत्यस्य । औत् = औकारः ।

सरलार्थः- इकारात् परस्य सप्तम्येकवचनस्य ङि-प्रत्ययस्य स्थाने औकार आदेशो भवति । इकारान्तेषु शब्देषु यस्य नदीसंज्ञा, घिसंज्ञा च न भवति, तस्माद् ङि-प्रत्यये एव अस्य सूत्रस्य प्रसक्तिर्वर्तते, यतः नदीसंज्ञाविषये आमादेशेन (इदुद्भ्याम्), घिसंज्ञाविषये च अत्वौत्वेन (अच्च घेः) विधिरयं बाध्यते ।

सखि ङि - सखि इ - सखि औ (औत्) - सख् य् औ (इको यणचि) - सख्यौ ।

पति-शब्दस्य कृदन्ततया व्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति । टा-विभक्तिम्, ङिद्विभक्तिं च विहाय अन्यासु विभक्तिषु अस्य शब्दस्य सिद्धिप्रक्रिया हरिशब्दवद् ज्ञेया । शेषविभक्तिषु (टा, ङित्) तु अस्य रूपाणि सखि-शब्दवद् जायन्ते । तद्-आह-

## घिसंज्ञाविधायकं सूत्रम्

**पतिः समास एव १ । ४ । ८ ॥**

**घिसंज्ञः । पत्या । पत्ये । पत्युः २ । पत्यौ । शेषं हरिवत् । समासे तु भूपतये ।**

(पतिः, समासे, एव, घि)

सरलार्थः- पति-शब्दः समासे एव घि-संज्ञको भवति । पति-शब्दस्य 'शेषो घ्यसखि' इत्यनेन

सर्वत्र घिसंज्ञायां प्राप्तायाम् अनेन सूत्रेण समासप्रक्रियया निर्मितानां पति-शब्दान्तानां शब्दानाम् एव घि-संज्ञा विधीयते । अतः भूपति, प्रजापति, नरपति इत्यादीनां शब्दानां हरि-शब्दवदेव रूपाणि जायन्ते ।

अनेन सूत्रेण घिसंज्ञाया निषेधे टा, ङे, ङसि, ङस्, ङि इत्येतेषु विभक्तिषु सखि-शब्दसदृशप्रक्रियया पत्या, पत्ये, पत्युः, पत्युः, पत्यौ इत्येतानि रूपाणि निष्पद्यन्ते ।

### कतिशब्दो नित्यं बहुवचनान्तः ॥

किम्-शब्दाद् डति-प्रत्यये निष्पन्नः कति-शब्दो बहुवचने एव प्रयुज्यते । तद्धितप्रत्ययान्ततया व्युत्पन्नपक्षे तस्य प्रातिपदिकसंज्ञा भवति ।

### सङ्ख्यासंज्ञाविधायकं सूत्रम्

**बहुगणवतुडति सङ्ख्या १ ।१ ।२३ ॥**

(बहु-गण-वतु-डति, सङ्ख्या) वतु = वतुप्प्रत्ययान्ताः शब्दाः । डति = डतिप्रत्ययान्तः शब्दः ।

सरलार्थः- बहु-शब्दस्य, गण-शब्दस्य, वतुप्-प्रत्ययान्तस्य शब्दस्य, डति-प्रत्ययान्तस्य शब्दस्य च 'सङ्ख्या' इति संज्ञा भवति, लोके प्रसिद्धानाम् एक, द्वि, त्रि इत्यादीनां सङ्ख्यावाचकशब्दानां लोकत एव सङ्ख्यावाचकत्वं बोध्यम् ।

अस्मिन् सूत्रे सङ्ख्यावाचिनौ एव बहु-गणशब्दौ गृह्येते, न तु वैपुल्य-सङ्घवाचिनौ इति स्मर्तव्यम् । वतुप्-प्रत्ययान्तशब्दा यावत्, तावत्, एतावत् इति त्रयः सन्ति । डति-प्रत्ययान्तस्तु 'कति' इति एक एव शब्दो वर्तते ।

### षट्-संज्ञाविधायकं सूत्रम्

**डति च १ ।१ ।२५ ॥**

**डत्यन्ता सङ्ख्या षट्संज्ञा स्यात् ॥**

(डति, सङ्ख्या, च, षट्)

सरलार्थः- सङ्ख्यासंज्ञकस्य डति-प्रत्ययान्तस्य शब्दस्य (कति-शब्दस्य) 'षट्' इति संज्ञा भवति ।

### जश्शसोर्लुग्विधायकं विधिसूत्रम्

**षड्भ्यो लुक् ७ ।१ ।२१ ॥**

**जश्शसोः ॥**

(षड्भ्यः, जस्-शसोः, लुक्)

सरलार्थः- षट्-संज्ञकात् शब्दाद् उत्तरस्य जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च 'लुक्' भवति । लुक्-शब्देन लुप्ते प्रत्ययलक्षणमाश्रित्य विधीयमानं तन्निमित्तम् अङ्गकार्यम् 'न लुमताङ्गस्य' इति आगामिना सूत्रेण निषिध्यते ।

## लुक्-श्लु-लुप्संज्ञाविधायकं सूत्रम्

**प्रत्ययस्य लुक्श्लुलुपः १ ।१ ।६१ ॥**

**लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् ॥**

(प्रत्ययस्य, अदर्शनम्, लुक्-श्लु-लुपः)

सरलार्थः- लुक्-शब्दं प्रयुज्य विहितस्य प्रत्ययस्य अदर्शनस्य (लोपस्य) लुक्-संज्ञा भवति, श्लु-शब्देन विहितस्य प्रत्ययस्य अदर्शनस्य श्लु-संज्ञा भवति, लुप्-शब्देन विहितस्य प्रत्ययस्य अदर्शनस्य च लुप्-संज्ञा भवति । लुक्, श्लु, लुप् एते त्रयः 'लुमन्तः' कथ्यन्ते, यतः त्रिषु एव 'लु' इति शब्दस्वरूपं समानं वर्तते । लु यत्र अस्ति इत्यर्थे मतुप्-प्रत्यये निष्पन्नस्य लुमत्-शब्दस्य पुँल्लिङ्गे लुमान्, लुमन्तौ, लुमन्तः इत्यादीनि रूपाणि जायन्ते ।

## प्रत्ययलक्षणसूत्रम्

**प्रत्ययलोपे प्रत्ययलक्षणम् १ ।१ ।६२ ॥**

**प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात् । इति जसि चेति गुणे प्राप्ते ॥**

(प्रत्यय-लोपे, प्रत्यय-लक्षणम्)

सरलार्थः- प्रत्ययस्य लोपे कृतेऽपि प्रत्ययाश्रितम् (प्रत्ययनिमित्तकम्) कार्यं भवति । प्रत्ययस्य लोपे कृते अपि तं प्रत्ययं निमित्तं कृत्वा क्रियमाणानि कार्याणि भवन्ति एव इत्याशयः ।

## प्रत्ययलक्षण-निषेधकं सूत्रम्

**न लुमताऽङ्गस्य १ ।१ ।६३ ॥**

**लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् । कति २ । कतिभिः । कतिभ्यः २ । कतीनाम् । कतिषु । युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः ॥ त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ ॥**

(लुमता, प्रत्ययलोपे, अङ्गस्य, प्रत्ययलक्षणम्, न) लुमता = लुक्, श्लु, लुप् इत्येतैः)

**सरलार्थः**- लुक्-श्लु-लुप्शब्दैः प्रत्ययस्य लोपे सति प्रत्ययनिमित्तम् अङ्गकार्यं न भवति । लुक्श्लुलुप्-शब्दैः प्रत्ययस्य लोपानन्तरं 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण प्राप्तं प्रत्ययलक्षणमनेन निषिध्यते । अङ्गकार्यं नाम अङ्गस्य इत्यधिकारे अङ्गमुद्दिश्य जायमानं कार्यम् ।

कति-शब्दस्य नित्यं बहुवचनान्तत्वात् प्रथमायां जस्-प्रत्यये, षट्संज्ञायाम्- कति जस् - कति अस् - कति (षड्भ्यो लुक्) । अत्र प्रत्ययलक्षणमाश्रित्य 'जसि च' इति अङ्गस्य गुणे प्राप्ते अनेन सूत्रेण गुणनिषेधः । शस्-प्रत्यये प्रत्ययस्य लुकि 'कति' इति सिद्ध्यति । भिसादिविभक्तिषु हरिशब्दवत् प्रक्रिया अत्रापि अवलम्बनीया ।

युष्मद्-शब्दस्य, अस्मद्-शब्दस्य, षट्संज्ञक-शब्दानां च रूपाणि त्रिषु लिङ्गेषु समानानि भवन्ति ।

सङ्ख्यावाचकः त्रि-शब्दो बहुवचने एव प्रयुज्यते । सङ्ख्यावाचकेषु त्रि-शब्दाद् आरभ्य नवदशन्-शब्दान्ताः शब्दा नित्यं बहुवचने एव प्रयुज्यन्ते । अतः तेभ्यो बहुवचनसंज्ञका जसादिप्रत्यया एव जायन्ते ।

त्रि जस् - त्रि अस् - त्रे अस् (जसि च) - त्र् अय् अस् - त्रयः । शस्, भिस्, भ्यस्, सुप् इत्येतासु विभक्तिषु अपि हरिवद् एव कर्तव्यम् । आम्-प्रत्यये तु-

## त्रयादेशविधायकं विधिसूत्रम्

**त्रेस्त्रयः ७ । १ । ५३ ॥**

**त्रिशब्दस्य त्रयादेशः स्यादामि । त्रयाणाम् । त्रिषु । गौणत्वेऽपि प्रियत्रयाणाम् ॥**

(त्रेः, अङ्गस्य, आमि, त्रयः)

**सरलार्थः**- आम्-प्रत्यये परे सति त्रि-शब्दान्तस्य अङ्गस्य स्थाने 'त्रय' इति आदेशो भवति । अनेकाल्त्वात् सर्वस्य स्थानिनः स्थाने आदेशोऽयं विधीयते ।

त्रि आम् - त्रय आम् (त्रेस्त्रयः) - त्रय नाम् (ह्रस्वनद्यापो नुट्) - त्रयानाम् (नामि) - त्रयाणाम् ।

अयं त्रयादेशः त्रि-शब्दस्य गौणत्वेन प्रयोगेऽपि भवति । समासे उपसर्जनभूतः शब्द गौणत्वेन स्वीक्रियते (इतरविशेषणतया स्वार्थोपस्थापकं गौणत्वम्) । 'प्रियाः त्रयो यस्याः' इति विग्रहे बहुव्रीहिसमासेन निष्पन्नस्य प्रियत्रि-शब्दस्य अपि आम्-प्रत्यये परे अनेन 'त्रि' इत्यस्य त्रयादेशे 'प्रियत्रयाणाम्' इति रूपं जायते । अस्य शेषरूपाणि हरिवद् भवन्ति ।

सङ्ख्यावाचकस्य द्वि-शब्दस्य नित्यं द्विवचनान्ततया तस्माद् द्विवचनविभक्तय एव उत्पद्यन्ते । प्रथमाया द्विवचने औ-प्रत्यये आह-

### अत्वविधायकं विधिसूत्रम्

**त्यदादीनामः ७ । २ । १०२ ॥**

**एषामकारो विभक्तौ । (द्विपर्यन्तानामेवेष्टिः वा.१८) द्वौ २ । द्वाभ्याम् ३ । द्वयोः २ ॥**

(त्यद्-आदीनाम्, अङ्गस्य, विभक्तौ, अः)

**सरलार्थः**- विभक्तौ परतः त्यदादिगणे पठितानां शब्दानाम् अकारान्तादेशो भवति । अकारान्तादेशः = अन्त्यस्य वर्णस्य स्थाने अकार आदेशः, अत्व-पदेन अपि व्यवह्रियते ।

(त्यदादीनाम्, अङ्गस्य, विभक्तौ, अः, द्वि-पर्यन्तानाम्, एव, इष्टिः)

अयम् अकारान्तादेशः त्यदादिगणपठितशब्देषु द्वि-शब्दपर्यन्तानां शब्दानाम् एव भवतीति वार्तिकार्थः ।

सर्वादिगणे अन्तर्गणरूपेण आगते त्यदादिगणे त्यद्-तद्-यद्-एतद्-इदम्-अदस्-एक-द्वि-युष्मद्-अस्मद्-भवत्-किम् इति शब्दाः सन्ति । अनेन विधीयमानम् अत्वं द्वि-शब्दपर्यन्तानाम् अष्टानां त्यदादिशब्दनाम् एव इष्टं वर्तते, तेन अन्त्यानां युष्मद्, अस्मद्, भवत्, किम् इत्येतेषां चतुर्णां त्यदादिशब्दानाम् अनेन अत्वं न भवतीति बोध्यम् ।

अनेन सूत्रेण अकारान्तादेशे कृते इकारान्तो द्वि-शब्दो विभक्तौ परतः सत्याम् अकारान्तो भवति, तेन सर्व-शब्दस्य द्विवचनवत् द्वि-शब्दस्यापि रूपाणि निष्पद्यन्ते ।

द्वि औ - द्व औ (त्यदादीनामः) - द्वौ (वृद्धिरेचि) । द्वि भ्याम् - द्व भ्याम् (त्यदादीनामः) - द्वा भ्याम् (सुपि च) - द्वाभ्याम् । द्वि ओस् - द्व ओस् - द्वे ओस् (ओसि च) - द्व अय् ओस् - द्वयोस् - द्वयोर् - द्वयोः ।

**प्रयोगसिद्धिप्रकारः**

**हरौ**

हरि-शब्दस्य प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण सप्तम्या एकवचने ङि-प्रत्ययेऽनुबन्धलोपे 'हरि इ' इति जाते 'शेषो घ्यसखि' इति सूत्रेण प्रकृतेर्घिसंज्ञायाम् 'घेर्ङिति' इत्यनेन अङ्गस्य गुणे प्राप्ते, तं बाधित्वा 'अच्च घेः' इति सूत्रेण प्रत्ययस्य स्थाने औकारादेशे, घिसंज्ञकस्य अङ्गस्य च अकारान्तादेशे कृते 'हर औ' इति जाते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ, औकार एकादेशे, वर्णयोगे 'हरौ' इति रूपं साधु ।

शब्द-रूपावलिः

| सर्व-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| हरिः | हरी | हरयः |
| हरिम् | हरी | हरीन् |
| हरिणा | हरिभ्याम् | हरिभिः |
| हरये | हरिभ्याम् | हरिभ्यः |
| हरेः | हरिभ्याम् | हरिभ्यः |
| हरेः | हर्योः | हरीणाम् |
| हरौ | हर्योः | हरिषु |
| हे हरे ! | हे हरी ! | हे हरयः ! |

| सखि-शब्दस्य रूपाणि | | |
|---|---|---|
| सखा | सखायौ | सखायः |
| सखायम् | सखायौ | सखीन् |
| सख्या | सखिभ्याम् | सखिभिः |
| सख्ये | सखिभ्याम् | सखिभ्यः |
| सख्युः | सखिभ्याम् | सखिभ्यः |
| सख्युः | सख्योः | सखीनाम् |
| सख्यौ | सख्योः | सखिषु |
| हे सखे ! | हे सखायौ ! | हे सखायः ! |

| पति-शब्दस्य रूपाणि | | |
|---|---|---|
| पतिः | पती | पतयः |
| पतिम् | पती | पतीन् |
| पत्या | पतिभ्याम् | पतिभिः |
| पत्ये | पतिभ्याम् | पतिभ्यः |
| पत्युः | पतिभ्याम् | पतिभ्यः |
| पत्युः | पत्योः | पतीनाम् |
| पत्यौ | पत्योः | पतिषु |
| हे पते ! | हे पती ! | हे पतयः ! |

| त्रि-शब्दस्य पुँल्लिङ्गे रूपाणि |
|---|
| त्रयः |
| त्रीन् |
| त्रिभिः |
| त्रिभ्यः |
| त्रिभ्यः |
| त्रयाणाम् |
| त्रिषु |
| |

| द्वि-शब्दस्य पुँल्लिङ्गे रूपाणि |
|---|
| द्वौ |
| द्वौ |
| द्वाभ्याम् |
| द्वाभ्याम् |
| द्वाभ्याम् |
| द्वयोः |
| द्वयोः |
| |

## वाक्येषु प्रयोगानुशीलनम्

१. मम सख्युः नाम महेशः अस्ति ।

२. हरेः नाम एव कलौ मोक्षगतेः मार्गः वर्तते ।

३. त्वं गुरोः समीपं गच्छ ।

४. विष्णवे नमः ।

५. पिता हरिं भजति ।

६. सीता पत्या सह वनम् अगच्छत् ।

७. सखायः उद्याने क्रीडन्तः सन्ति ।

८. त्रयाणां देवानां समूहः त्रिदेवः कथ्यते ।

९. द्वौ बालकौ संवदतः ।

१०. कक्षायां कति बालकाः कति च बालिकाः सन्ति ?

## अभ्यासः

**१. सूत्राणि पठित्वा तेषां कार्याणि विलिखत**

(क) जसि च

(ख) ख्यत्यात्परस्य

(ग) पतिः समास एव

(घ) घेर्ङिति

**२. परस्परं मेलयत**

| | |
|---|---|
| शेषो घ्यसखि | उपधासंज्ञा |
| अपृक्त एकाल् प्रत्ययः | भसंज्ञा |
| अलोऽन्त्यात् पूर्व उपधा | षट्संज्ञा |
| बहुगणवतुडति सङ्ख्या | घिसंज्ञा |
| डति च | लुक्-श्लु-लुप्संज्ञा |
| प्रत्ययस्य लुक्श्लुलुपः | अपृक्तसंज्ञा |
| | सङ्ख्यासंज्ञा |

३. **निर्दिष्टकार्याणां विधायकानि सूत्राणि लिखत**

(क) उपधादीर्घः (ख) जश्शसोर्लुक् (ग) प्रत्ययलक्षणम्

४. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) 'घेर्ङिति' इति सूत्रम् ..................... गुणं करोति । (ङिद्विभक्तिषु, सर्वनामस्थानविभक्तिषु)

(ख) 'अचो ञ्णिति' इति सूत्रं ..................... करोति । (गुणम्, वृद्धिम्)

(ग) 'हरयः' इत्यत्र ................ इत्यनेन गुणो भवति । (ह्रस्वस्य गुणः, जसि च)

(घ) .............. उपधा कथ्यते । (उपान्त्यवर्णः, अन्त्यवर्णः)

(ङ) सम्बुद्धौ परतः 'सर्वनामस्थाने चासम्बुद्धौ' इति ............... । (प्रवर्तते, न प्रवर्तते)

(च) टा-ङिद्विभक्तिषु पतिशब्दस्य रूपाणि .............. भवन्ति । (सखिवत्, हरिवत्)

(छ) पतिशब्दः ................ एव घिसंज्ञां लभते । (समासे, असमासे)

(ज) लोपशब्देन लुप्ते तन्निमित्तम् अङ्गकार्यम् .............. । (भवति, न भवति)

(झ) कति-शब्दस्य रूपाणि त्रिषु लिङ्गेषु ............... भवन्ति । (समानानि, भिन्नानि)

५. **अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत**

विष्णवे, भानौ, गिरयः, सखायम्, पत्या, विधीन्, कति

६. **एकवाक्येन उत्तरं लिखत**

(क) इकारान्तेषु कस्य शब्दस्य घिसंज्ञा न भवति ?

(ख) 'ख्यत्यात्परस्य' इत्यनेन कस्य उत्वं भवति ?

(ग) 'हरेः' इत्यत्र पूर्वरूपविधायकं सूत्रं किम् ?

(घ) भूपति-शब्दस्य घिसंज्ञा भवति न वा ?

(ङ) गणपति-शब्दस्य तृतीयैकवचने किं रूपम् ?

(च) कति-शब्दः कस्मिन् लिङ्गे प्रयुज्यते ?

(छ) इकारस्य गुणे, वृद्धौ च कौ वर्णौ विधीयेते ?

(ज) के लुमन्तः ?

७. **प्रश्नानाम् उत्तरं लिखत**

(क) 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण कस्मात् परस्य कस्य लोपो भवति ?

(ख) घि-संज्ञाप्रयुक्तकार्याणि कानि ? तानि च कासु विभक्तिषु जायन्ते ?

(ग) हरि-सखिशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) पति-शब्दस्य रूपसिद्धिप्रक्रिया कुत्र कुत्र हरिशब्दाद् भिन्ना विद्यते ?

(ङ) हरि-शब्दः कासु विभक्तिषु गुणं लभते ?

(च) सखि-शब्दस्य वृद्धिकारकाः सुप्-प्रत्ययाः के ?

८. **ओतु-कवि-सभापतिशब्दानां सर्वाणि रूपाणि लिखत ।**

९. **अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत**

(क) हे हरे (ख) सख्यौ (ग) पत्युः (घ) हरेः

(ङ) त्रयाणाम् (ङ) सखा (च) कति (ज) त्रयाणाम्

अजन्तप्रकरणे

# ईकारान्तपुँल्लिङ्गशब्दाः

**पाति लोकमिति पपीः सूर्यः ॥**

**(१६१ 'दीर्घाज्जसि च') पप्यौ २ । पप्यः । ६ । १ । १०५ ॥ हे पपीः । पपीम् । पपीन् । पप्या । पपीभ्याम् ३ । पपीभिः । पप्ये । पपीभ्यः २ । पप्यः २ । पप्योः २ । दीर्घत्वान्न नुट्, पप्याम् । ङौ तु सवर्णदीर्घः, पपी । पप्योः पपीषु । एवं वातप्रम्यादयः ॥**

पपी-शब्दः ङ्यन्तभिन्नो ईकारान्तशब्दो वर्तते, तस्य च व्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति ।

पपी सु - पपी स् - पपीस् - पपीर् - पपीः । औ, जस्, औट् इत्येतेषु प्रत्ययेषु पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इत्यनेन निषिध्यते, ततो यणि पप्यौ इत्यादि सिद्ध्यन्ति । अम्-प्रत्यये पूर्वरूपम्, शस्-प्रत्यये सवर्णदीर्घश्च विधीयेते । तदतिरिक्तासु अजादिषु विभक्तिषु विशेषकार्याभावात् सन्धिकार्यमेव भवति । आम्-प्रत्ययेऽपि ङ्याब्भिन्नदीर्घान्तत्वाद् नुडागमस्य अप्राप्तिरिति स्मर्तव्यम् । ङि-प्रत्यये 'पपी इ' इत्यवस्थायां सवर्णदीर्घेण 'पपी' इति रूपं जायते, अन्यत्र तु यणादेशेन पप्या, पप्ये, पप्यः, पप्योः, पप्याम् इत्यादीनि रूपाणि जायन्ते । हलादिविभक्तिषु विभक्तियोजनादिकमेव कार्यम् । वातप्रमी-शब्दस्य अपि पपीवद् रूपाणि निष्पद्यन्ते ।

**बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ॥**

बहुश्रेयसी-शब्दः 'बह्व्यः श्रेयस्यो यस्य' इति विग्रहे समासेन निष्पन्नो वर्तते । श्रेयसी-शब्दस्य स्त्रीलिङ्गत्वेऽपि समासेन बहुश्रेयसी-शब्दः पुँल्लिङ्गो जातोऽस्ति । प्रथमा-द्वितीया-तृतीयाविभक्तिषु बहुश्रेयसी-शब्दस्य रूपाणि पपीवद् जायन्ते । सम्बुद्धौ तु-

### नदी-संज्ञाविधायकं सूत्रम्

**यू स्त्र्याख्यौ नदी १ । ४ । ३ ॥**

**ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः ।**

(यू, स्त्र्याख्यौ, नदी) यू = ई+ऊ = ईकार-ऊकारौ, ईकारान्त-ऊकारान्तशब्दौ इत्यर्थः ।
स्त्र्याख्यौ = स्त्री यस्य आख्या (प्रकारः) स स्त्र्याख्यः, तौ = नित्य-स्त्रीलिङ्गशब्दौ इत्यर्थः ।

सरलार्थः- ईकारान्तानाम्, ऊकारान्तानां च नित्य-स्त्रिलिङ्गवाचिनां शब्दानाम् 'नदी' इति संज्ञा भवति ।

ये शब्दा ईकारान्ताः, ऊकारान्ता वा सन्तः केवलं स्त्रीलिङ्गे एव प्रयुज्यन्ते तेषाम् एव अनेन नदीसंज्ञा भवति । कश्चित् शब्द ईकारान्तः/ऊकारान्तः, स्त्रीलिङ्गश्च सन्नपि लिङ्गान्तरेऽपि (पुँल्लिङ्गे, नपुंसकलिङ्गे वा) प्रयुज्यते चेत् तस्य स्त्रीलिङ्गे अपि नदीसंज्ञा न भवति, तस्य नित्यस्त्रीलिङ्गत्वाभावाद् इति स्मर्तव्यम् । यथा- 'स्वयम्भू' इति शब्द ऊकारान्तो वर्तते, स्त्रीलिङ्गोऽपि अस्ति, परन्तु तस्य पुँल्लिङ्गे अपि प्रयोगात् स्त्रीलिङ्गप्रयोगावस्थायाम् अपि नदीसंज्ञा न भवति । एवम् ईकारान्तस्य ग्रामणी-शब्दस्य अपि लिङ्गद्वये विद्यमानत्वात् (स्त्रीलिङ्गेऽनित्यत्वात्) नदीसंज्ञा न जायते ।

**(प्रथमलिङ्गग्रहणं च वा.) । पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः ॥**

सरलार्थः- 'यदि कश्चन नदीसंज्ञकशब्दः समासे उपसर्जनरूपेण आगच्छति तर्हि तस्य समस्तपदस्य अपि नदीसंज्ञा भवति' इत्यर्थकेन 'प्रथमलिङ्गग्रहणं च' इति वार्तिकेन बहुश्रेयसी-शब्दस्य नदीसंज्ञा क्रियते ।

**नदीसंज्ञाप्रयुक्तकार्याणि-**

- सम्बोधनैकवचने प्रातिपदिकस्य अन्त्यवर्णस्य ह्रस्वः । (अम्बार्थनद्योर्ह्रस्वः)
- ङिद्विभक्तीनाम् 'आट्' आगमः । (आण्नद्याः)
- आम्-विभक्तेः 'नुड्' आगमः । (ह्रस्वनद्यापो नुट्)
- ङि-विभक्तेः स्थाने 'आम्' आदेशः । (ङेराम्नद्याम्नीभ्यः, इदुद्भ्याम्)

## ह्रस्वविधायकं विधिसूत्रम्

**अम्बार्थनद्योर्ह्रस्वः ७ । ३ । १०७ ॥**

**सम्बुद्धौ । हे बहुश्रेयसि ॥**

(अम्बार्थ-नद्योः, अङ्गस्य, सम्बुद्धौ, ह्रस्वः)

सरलार्थः- सम्बुद्धिसंज्ञके प्रत्यये परे अम्बा-शब्दस्य पर्यायरूपेण प्रयुज्यमानानां शब्दानाम्, नदीसंज्ञकानां शब्दानां च अङ्गस्य अन्त्यवर्णस्य ह्रस्व आदेशो भवति । 'अम्बा' इति शब्दः 'माता' इत्यर्थे प्रयुज्यते । अम्बा, अक्का, अल्ला इत्यादयः अम्बार्थक-शब्दाः सन्ति, यतः एतेषां सर्वेषाम् अर्थो माता अस्ति । एतेषां शब्दानाम्, नदीसंज्ञकानां शब्दानाम्, तदन्तशब्दानां

च अनेन सूत्रेण सम्बोधनस्य एकवचने ह्रस्वान्तत्वं विधीयते ।

बहुश्रेयसी सु (सम्बोधनम्) - बहुश्रेयसी स् - नदीसंज्ञायाम्, अनेन अङ्गस्य ह्रस्वे- बहुश्रेयसि स् - बहुश्रेयसि (एङ्ह्रस्वात् सम्बुद्धेः) - हे बहुश्रेयसि ।

## आडागमविधायकं विधिसूत्रम्

**आण्नद्याः ७ ।३ ।११२ ॥**

**नद्यन्तात्परेषां ङितामाडागमः ॥**

(नद्याः, अङ्गात्, ङिति, आट्)

सरलार्थः- नदीसंज्ञकाद् अङ्गात् परस्य ङित्-प्रत्ययस्य 'आट्' इत्यागमो भवति । आट् इत्यस्य टकार इत्, टित्वाद् 'आद्यन्तौ टकितौ' इत्यनेन आद्यवयवत्वे प्रत्ययस्य आदौ 'आ' इति संयोज्यते ।

## वृद्धिविधायकं विधिसूत्रम्

**आटश्च ६ ।१ ।९० ॥**

**आटोऽचि परे वृद्धिरेकादेशः । बहुश्रेयस्यै । बहुश्रेयस्याः । बहुश्रेयसीनाम् ॥**

(आटः, अचि, च, पूर्वपरयोः, एकः, वृद्धिः)

सरलार्थः- 'आट्' इति आगमाद् अच्-वर्णे परे सति पूर्वपरयोः (आडचोः) स्थाने वृद्धिसंज्ञक एकादेशो भवति ।

बहुश्रेयसी ङे - बहुश्रेयसी ए - बहुश्रेयसी आ ए (आण्नद्याः) - बहुश्रेयसी ऐ (आटश्च) - बहुश्रेयस् य् ऐ (इको यणचि) - **बहुश्रेयस्यै** । बहुश्रेयसी ङसि/ङस् - बहुश्रेयसी अस् - बहुश्रेयसी आ अस् (आण्नद्याः) - बहुश्रेयसी आस् (आटश्च) - बहुश्रेयस् य् आस् (इको यणचि) - बहुश्रेयस्यास् - बहुश्रेयस्यार् - **बहुश्रेयस्याः** । आम्-प्रत्यये ङयन्तत्वाद् नुडागमे- **बहुश्रेयसीनाम्** इति ।

## आमादेशविधायकं विधिसूत्रम्

**ङेराम्नद्याम्नीभ्यः ७ ।३ ।११६ ॥**

**नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् । बहुश्रेयस्याम् । शेषं पपीवत् ॥ अङयन्तत्वान्न सुलोपः अतिलक्ष्मीः । शेषं बहुश्रेयसीवत् ॥ प्रधीः ॥**

(नदी-आप्-नीभ्यः, अङ्गात्, ङेः, आम्)

सरलार्थः- नदीसंज्ञकाद् अङ्गात् परस्य, आबन्ताद् अङ्गात् परस्य, 'नी' इति शब्दस्वरूपान्तात् च अङ्गात् परस्य सप्तम्येकवचनस्य ङि-प्रत्ययस्य स्थाने 'आम्' इत्यादेशो भवति । आमादेशस्य स्थानिवत्वाद् ङित्वे तत्प्रयुक्तकार्याणि अपि जायन्ते इति बोध्यम् । सेनानी, राजनी, ग्रामणी इत्यादयो नी-शब्दान्तशब्दाः सन्ति । अनेन सूत्रेण नी-शब्दात्, नीशब्दान्तशब्दात् च विहितस्य 'ङि' इत्यस्य आमादेशो विधीयते ।

बहुश्रेयसी ङि - बहुश्रेयसी इ - बहुश्रेयसी आम् (ङेराम्नद्याम्नीभ्यः) - बहुश्रेयसी आ आम् (आण्नद्याः) - बहुश्रेयसी आम् (आटश्च) - बहुश्रेयस् य् आम् (इको यणचि) - **बहुश्रेयस्याम्** ।

'लक्ष्मीम् अतिक्रान्तः' इति विग्रहे समासेन निष्पन्न अतिलक्ष्मी-शब्दो ङ्यन्तो नास्ति, अतः तस्मात् परस्य सोः हल्ङ्यादिलोपो न भवति । अतिलक्ष्मी सु - अतिलक्ष्मी स् - अतिलक्ष्मीस् - अतिलक्ष्मीर् - अतिलक्ष्मीः । शेषरूपाणि बहुश्रेयसीवत् ज्ञेयानि ।

'प्रकर्षेण ध्यायति' इत्यर्थे क्विप्-प्रत्यये निष्पन्नस्य प्रधी-शब्दस्य अपि अङ्यन्तत्वात् सुलोपाभावे 'प्रधीः' इति रूपम् । औ-प्रत्यये तु-

## इयङुवङादेशविधायकं विधिसूत्रम्

**अचिश्नुधातुभ्रुवां य्वोरियङुवङौ ६ । ४ । ७७ ॥**

**श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे । इति प्राप्ते ॥**

(अचि, श्नु-धातु-भ्रुवाम्, य्वोः, अङ्गस्य, इयङ्-उवङौ) य्वोः = इवर्ण-उवर्णयोः ।

सरलार्थः- अजादिप्रत्यये परे सति श्नु-प्रत्ययान्तस्य अङ्गस्य, इवर्णान्तस्य उवर्णान्तस्य च धातोः (धातुसंज्ञकस्य) अङ्गस्य, 'भ्रू' इति शब्दरूपस्य अङ्गस्य च स्थाने 'इयङ्', 'उवङ्' इत्येतौ आदेशौ भवतः । उभयोरेव आदेशयोः ङकार इत्संज्ञकः, अकारश्च उच्चारणार्थः, अतः 'इय्', 'उव्' इत्येतौ अवशिष्येते । ङित्वात् 'ङिच्च' इत्यनेन स्थानिनः अन्त्यस्य वर्णस्य (इवर्ण-उवर्णयोः) स्थाने एतौ आदेशौ विधीयेते । आन्तरतम्यात् तालुस्थानकस्य इवर्णस्य स्थाने तादृश एव 'इय्' आदेशो भवति, ओष्ठस्थानकस्य उवर्णस्य च स्थाने तादृश एव 'उव्' आदेशो भवति । श्नुप्रत्ययान्तस्य, भ्रूशब्दस्य च विषये उवर्णान्तत्वाद् उवङादेशः, तथैव उवर्णान्तधातूनां स्थानेऽपि उवङादेश एव । इयङादेशस्तु इवर्णान्तधातूनाम् एव इति बोध्यम् । विधिरयं यण्-गुण-वृद्धिविधिभिर्बाध्यते, अतः तेषां निषेधानन्तरमेव अस्य प्रसक्तिर्भवतीति

बोध्यम् ।

'प्रधी औ' इत्यवस्थायाम् पूर्वसवर्णदीर्घस्य निषेधेन यणि प्राप्ते तं बाधित्वा अनेन सूत्रेण इयङादेशे प्राप्ते-

यणविधायकं विधिसूत्रम्

**एरनेकाचोऽसंयोगपूर्वस्य ६ । ४ । ८२ ॥**

**धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणजादौ प्रत्यये । प्रध्यौ । प्रध्यः । प्रध्यम् । प्रध्यौ । प्रध्यः । प्रध्यि । शेषं पपीवत् । एवं ग्रामणीः । ङौ तु ग्रामण्याम् ॥ अनेकाचः किम् ? नीः । नियौ । नियः । अमि शसि च परत्वादियङ्, नियम् । ङेराम्, नियाम् ॥ असंयोगपूर्वस्य किम् ? सुश्रियौ । यवक्रियौ ॥**

(अनेकाचः, अङ्गस्य, असंयोगपूर्वस्य, एः, धातोः, अचि, यण्) एः = 'इ' इत्यस्य षष्ठ्येकवचनम् ।

सरलार्थः- यदि अङ्गम् अनेकाच् वर्तते, तस्य अङ्गस्य अन्ते धातुः अस्ति, तस्य च धातोः अन्ते धातोरवयव इवर्णो विद्यते, तस्य च इवर्णस्य पूर्वस्मिन् भागे संयोगो न भवति चेत् तादृशस्य अङ्गस्य अन्त्यवर्णस्य (इवर्णस्य) स्थाने 'यण्' आदेशो भवति, अजादि-प्रत्यये परे सति ।

अनेन सूत्रेण अलोऽन्त्यपरिभाषया अन्त्यस्य ईकारस्य यणि कृते 'प्रध् य् औ', 'प्रध्यौ' इति । एवमेव अम्, औट्, शस्, ङि चेति विभक्तिषु अनेन सूत्रेण यणादेशो विधीयते । शेषविभक्तिषु पपीवत् प्रक्रिया भवति ।

ग्रामणी-शब्दस्य ङि-विभक्तौ प्रधी-शब्दाद् भिन्नप्रक्रियया रूपाणि निष्पद्यन्ते, ङि-प्रत्यये तु 'ङेराम्नद्याम्नीभ्यः' इत्यनेन आमादेशे, यणि- ग्रामण्याम् ।

अनेन सूत्रेण अनेकाच एव अङ्गस्य अणविधानाद् नी-शब्दस्य विषये अस्य प्रसक्तिर्न, अतस्तत्र इयङादेशो विधीयते । नी औ - न् इय् औ (अचि श्नुधातुभ्रुवां य्वोरियङुवङौ) - नियौ । नियः । अम्-प्रत्यये पूर्वरूपं बाधित्वा इयङादेशे- नियम् । शस्-प्रत्यये पूर्वसवर्णदीर्घं बाधित्वा इयङादेशे- नियः । टादिषु अजादिषु प्रत्ययेषु अपि इयङादेशे 'निया' इत्यादि रूपाणि जायन्ते । ङिविभक्तौ 'ङेराम्नद्याम्नीभ्यः' इत्यनेन प्रत्ययस्य आमादेशे, अङ्गस्य इयङादेशे- नियाम् ।

संयोगपूर्व-इवर्णान्तस्य अङ्गस्य अपि अनेन यण् न भवतीति कारणेन 'सुष्ठु श्रयति' इत्यर्थकस्य 'सुश्री' शब्दस्य अपि इयङादेशो भवति । यथा- सुश्री औ- सुश्र् इय् औ- सुश्रियौ ।

शब्देऽस्मिन् ईकारात्पूर्वम् 'श्र्' इति शकार-रेफयोः संयोगो विद्यते । यवक्री-शब्दस्थस्येकारस्य संयोग पूर्वकत्वेन यणादेशाभावे इयङादेशे **'यवक्रियौ'** इत्यादि रूपाणि ज्ञेयानि ।

### गतिसंज्ञाविधायकं सूत्रम्

**गतिश्च १ । ४ । ६० ॥**

**प्रादयः क्रियायोगे गतिसंज्ञाः स्युः ।**

(निपाताः, प्रादयः, क्रियायोगे, गतिः, च)

**सरलार्थः**- क्रियया सह प्रयुज्यमानाः प्रादि-गणपठिताः शब्दाः (प्रादयः) क्रियायाम् अन्विताः सन्ति चेत् निपातसंज्ञकाः सन्तो गतिसंज्ञकाश्च भवन्ति । सूत्रेऽस्मिन् चकारनिर्देशात् प्रादय एकसंज्ञाधिकारे पठिताः सन्तोऽपि अनेकसंज्ञाम् (निपातसंज्ञया सहैव गतिसंज्ञाम्) लभन्ते इति स्मर्तव्यम् ।

**(गतिकारकेतरपूर्वपदस्य यण् नेष्यते वा. २०) । शुद्धधियौ ॥**

**सरलार्थः**- 'यदि अङ्गे विद्यमानं पूर्वपदं गतिसंज्ञकम्, कारकसंज्ञकं वा नास्ति तर्हि 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन विहितं यण् भवति इति वार्तिकार्थः ।

शुद्धधी औ, इति स्थिते, इयङादेशं बाधित्वा पूर्वसूत्रेण यणादेशे प्राप्ते 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इत्यनेन गतिकारकभिन्नोत्तरपदकत्वाद् यण्निषेधे, बाधकाभावे इयङादेशे- **शुद्धधियौ** । **शुद्धधियः** इत्यादि ।

### यण्-निषेधकं सूत्रम्

**न भूसुधियोः ६ । ४ । ८५ ॥**

**एतयोरचि सुपि यणन । सुधियौ । सुधिय इत्यादि ॥ सुखमिच्छतीति सुखीः । सुतीः । सुख्यौ । सुत्यौ । सुख्युः । सुत्युः । शेषं प्रधीवत् ।**

(भू-सुधियोः, अङ्गस्य, यण्, न)

**सरलार्थः**- अजादि-सुप्प्रत्यये परे सति भू-शब्दस्य, सुधी-शब्दस्य च अङ्गस्य 'यण्' आदेशो न भवति । भू-सुधीशब्दयोः अजादि-सुप्प्रत्ययेषु 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन प्राप्तौ उवङ्-इयङादेशौ बाधित्वा 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणादेशे प्राप्ते अनेन सूत्रेण तस्य निधेषः क्रियते, ततः 'बाधकाभावे पुनरुत्सर्गशास्त्रस्य प्रवृत्तिः' इति न्यायेन पुनः उवङ्-इयङौ आदिश्येते ।

सुधी-शब्दः 'सुष्ठु ध्यायति' इत्यर्थे सु इत्युपसर्गपूर्वकाद् ध्याधातोः क्विप्प्रत्ययेन निष्पद्यते । सुप्रत्यये- सुधीः । सुधी औ, इत्यवस्थायाम् इयङादेशं बाधित्वा यणि प्राप्ते अनेन सूत्रेण तस्य निषेधे च पुनः इयङादेशे- सुध् इय् औ, सुधियौ । जसादौ अपि अजादिविभक्तिषु इयङादेशो बोध्यः ।

सुखम् इच्छति, इत्यर्थे क्यच्प्रत्यये सुखी-शब्दो निष्पद्यते, तथैव सुतम् इच्छतीति सुती । एतयोः सिद्धिप्रक्रियायाम् इयङादेशं बाधित्वा यणादेशो विधीयते, परन्तु खी-तीशब्दान्तत्वात् ङसि-ङस्विभक्त्योः यणादेशात् पश्चात् 'ख्यत्यात्परस्य' इत्यनेन उत्वमपि भवतीति विशेषप्रक्रिया स्मर्तव्या । शेषविभक्तिषु एतयो रूपाणि प्रधीवद् निष्पद्यन्ते ।

### प्रयोगसिद्धिप्रकारः

**सुधियौ**

सुधी-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया द्विवचने औ-प्रत्यये 'सुधी औ' इति जाते, यणं बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते, तस्य च 'दीर्घाज्जसि च' इत्यनेन निषेधे, पुनः 'इको यणचि' इत्यनेन यणि प्राप्ते तं प्रबाध्य 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण ईकारस्य इयङादेशे प्राप्ते तं बाधित्वा 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि प्राप्ते, 'न भूसुधियोः' इति सूत्रेण तन्निषेधे, बाधकाभावे पुनः इयङादेशे, ङित्वाद् अन्त्यवर्णस्य स्थाने कृते 'सुध् इय् औ' इति जाते, वर्णसम्मेलने 'सुधियौ' इति रूपं सिद्धम् ।

**शब्द-रूपावलिः**

| बहुश्रेयसी-शब्दस्य रूपाणि | | |
|---|---|---|
| बहुश्रेयसी | बहुश्रेयस्यौ | बहुश्रेयस्यः |
| बहुश्रेयसीम् | बहुश्रेयस्यौ | बहुश्रेयसीन् |
| बहुश्रेयस्या | बहुश्रेयसीभ्याम् | बहुश्रेयसीभिः |
| बहुश्रेयस्यै | बहुश्रेयसीभ्याम् | बहुश्रेयसीभ्यः |

| प्रधी-शब्दस्य रूपाणि | | |
|---|---|---|
| प्रधीः | प्रध्यौ | प्रध्यः |
| प्रध्यम् | प्रध्यौ | प्रध्यः |
| प्रध्या | प्रधीभ्याम् | प्रधीभिः |
| प्रध्ये | प्रधीभ्याम् | प्रधीभ्यः |

| | | |
|---|---|---|
| बहुश्रेयस्याः | बहुश्रेयसीभ्याम् | बहुश्रेयसीभ्यः |
| बहुश्रेयस्याः | बहुश्रेयस्योः | बहुश्रेयसीनाम् |
| बहुश्रेयस्याम् | बहुश्रेयस्योः | बहुश्रेयसीषु |
| हे बहुश्रेयसि ! | हे बहुश्रेयस्यौ ! | हे बहुश्रेयस्यः ! |

| | | |
|---|---|---|
| प्रध्यः | प्रधीभ्याम् | प्रधीभ्यः |
| प्रध्यः | प्रध्योः | प्रध्याम् |
| प्रध्यि | प्रध्योः | प्रधीषु |
| हे प्रधीः ! | हे प्रध्यौ ! | हे प्रध्यः ! |

## वाक्येषु प्रयोगानुशीलनम्

१. बहुश्रेयस्यः पुरुषाः सुखिनः भवन्ति ।

२. माता पप्ये अर्घ्यम् अर्पयति ।

३. प्रध्या जनेन आविष्कारः कृतः ।

४. ग्रामणीः दरिद्रान् भरति ।

५. सुश्रियाम् कृते चिन्ता नैव भवति ।

६. सुखीः जनः यथासमयं परिश्रमं कुर्यात् ।

## अभ्यासः

**१. सूत्राणि पठित्वा तेषां कार्याणि विलिखत**

(क) गतिश्च (ख) न भूसुधियोः

(ग) एरनेकाचोऽसंयोगपूर्वस्य (घ) अचि श्नुधातुभ्रुवां य्वोरियङुवङौ

**२. कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) 'आण्नद्याः' इति सूत्रेण ..................... विधीयते । (आण्, आट्)

(ख) प्रधी-शब्दस्य सम्बुद्धौ ..................... इति रूपं भवति । (प्रधीः, प्रधि)

(ग) 'ग्रामण्यौ' इत्यत्र ..................... इत्यनेन यण् भवति । (इको यणचि, एरनेकाचोऽसंयोगपूर्वस्य)

(घ) 'नियाम्' इत्यत्र ..................... भवति । (आडागमः, नुडागमः)

(ङ) 'सुश्रियौ' इत्यत्र ..................... यण् न भवति । (संयोगपूर्वत्वात्, एकाच्त्वात्)

३. परस्परं मेलयत

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| प्रध्यः | आम् |
| सुधिया | सवर्णदीर्घः |
| बहुश्रेयस्यै | आट् |
| पपी | ह्रस्वः |
| नियाम् | इयङ् |
| बहुश्रेयसि | यण् |

४. अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत

पप्याम्, सुखीः, सुत्युः, निया, बहुश्रेयस्याम्, अतिलक्ष्मीः

५. रिक्तस्थानं पूरयित्वा रूपावलिं लिखत

| | | |
|---|---|---|
| सुखीः | ........... | सुख्यः |
| ........... | सुख्यौ | ........... |
| सुख्या | ........... | ........... |
| ........... | सुखीभ्याम् | ........... |
| ........... | ........... | सुखीभ्यः |
| सुख्युः | सुख्योः | ........... |
| ........... | ........... | सुखीषु |
| ........... | हे सुख्यौ ! | ........... |

६. एकवाक्येन उत्तरं लिखत

(क) 'शुद्धधियौ' इत्यत्र केन यण् निषिध्यते ?

(ख) 'न भूसुधियोः' इत्यनेन कयोः किं वार्यते ?

(ग) आडागमाद् अचि केन सूत्रेण वृद्धिर्भवति ?

(घ) प्रधी-शब्दस्य नदीसंज्ञा भवति न वा ?

(ङ) नित्यं नदीसंज्ञाविधायकं सूत्रं किम् ?

७. प्रश्नानाम् उत्तरं लिखत

(क) 'यूस्त्र्याख्यौ नदी' इति सूत्रस्य अर्थं सोदाहरणं लिखत ।

(ख) नदी-संज्ञाप्रयुक्तकार्याणि कानि ? तानि च कासु विभक्तिषु जायन्ते ?

(ग) पपी-बहुश्रेयसीशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) सखि-सुखीशब्दयो रूपाणि कासु विभक्तिषु समानप्रक्रियया निष्पद्यन्ते ?

(ङ) 'पप्याम्' इत्यत्र नुडागमाभावे कारणं किम् ?

(च) अम्बार्थ-शब्दाः के ?

(छ) एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन कस्याम् अवस्थायां कस्य यण् विधीयते ?

(ज) ग्रामणी-शब्दस्य नदीसंज्ञाभावेऽपि 'ङि' इत्यस्य आमादेशः कथं भवति ?

८. प्रयोगसिद्धिप्रक्रियां दर्शयत

| | | |
|---|---|---|
| (क) हे बहुश्रेयसि | (ख) सुत्युः | (ग) प्रध्यौ |
| (घ) नियाम् | (ङ) बहुश्रेयस्याः | (ङ) अतिलक्ष्म्यै |

एकविंशः पाठः

अजन्तप्रकरणे

# उकारान्त-ऋकारान्तादिपुँल्लिङ्गशब्दा

**शम्भुर्हरिवत् । एवं भान्वादयः ॥**

शम्भु, भानु इत्यादीनाम् उकारान्तपुँल्लिङ्गशब्दानां घिसंज्ञा भवतीति कारणेन तेषां रूपाणि हरिशब्दवदेव प्रक्रियया निष्पद्यन्ते । अतः हरिशब्दस्य सिद्धिप्रक्रियायां विष्णु-शब्दस्य अपि उदाहरणं प्रस्तुतं वर्तते । शम्भु, भानु इत्यादि शब्दानां रूपाणि विष्णुवद् एव साधनीयानि इति बोध्यम् । उकारान्तशब्देषु क्रोष्टु-शब्दस्तु विशेषो वर्तते, अतः तस्य सिद्धिप्रक्रिया अधः प्रदीयते-

## तृज्वद्भाव-विधायकम् अतिदेशसूत्रम्

**तृज्वत्क्रोष्टुः ७ ।१ ।९५ ॥**

**असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ॥**

(असम्बुद्धौ, सर्वनामस्थाने, क्रोष्टुः, तृच्-वत्)

सरलार्थः- सम्बुद्धिभिन्ने सर्वनामस्थाने परे सति 'क्रोष्टु' इति शब्दस्य तृज्वद्भावो भवति । सम्बोधनैकवचनं विहाय अन्यासु सर्वनामस्थानविभक्तिषु परतः शृगालवाच-कस्य क्रोष्टु-शब्दस्य स्थाने अर्थकृतेन आन्तर्येण समानार्थकः क्रोष्टृ-शब्दः प्रयोगे आनेतव्यः ।

## गुणविधायकं विधिसूत्रम्

**ऋतो ङिसर्वनामस्थानयोः ७ ।३ ।११० ॥(**

**ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च । इति प्राप्ते-**

(ऋतः, अङ्गस्य, ङि-सर्वनामस्थानयोः, गुणः)

सरलार्थः- ङि-प्रत्यये, सर्वनामस्थानसंज्ञकप्रत्यये च परे सति ऋकारान्तस्य अङ्गस्य अन्त्यवर्णस्य गुणो भवति । ऋकारस्य गुणे कृते अकारे 'उरण् रपरः' इत्यनेन रपरत्वे 'अर्' इति गुणादेशो विधीयते ।

शृगालवाचकात् पुँल्लिङ्गात् कोष्टु-शब्दात् सुप्रत्यये 'तृज्वत्क्रोष्टुः' इति तृज्वद्भावे 'कोष्टृ

स्' इत्यवस्थायाम् अनेन सूत्रेण गुणे प्राप्ते-

### अनङादेशविधायकं विधिसूत्रम्

**ऋदुशनस्पुरुदंसोऽनेहसां च ७ ।१ ।९४ ॥**

**ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ ॥**

(ऋत्-उशनस्-पुरुदंसस्-अनेहसाम्, अङ्गस्य, असम्बुद्धौ, सौ, अनङ्)

सरलार्थः- सम्बुद्धिभिन्ने सर्वनामस्थाने परे ऋकारान्तानां शब्दानाम्, उशनस्-शब्दस्य, पुरुदंसस्-शब्दस्य, अनेहस्-शब्दस्य च अन्त्यवर्णस्य स्थाने 'अनङ् (अन्)' इत्यादेशो भवति । ङित्वाद् अन्त्यवर्णस्य स्थाने विधीयते । उशनस् = दैत्यगुरोः शुक्राचार्यस्य वाचकः शब्दः । पुरुदंसस् = मार्जारस्य वाचकः शब्दः । अनेहस् = समयस्य वाचकः शब्दः ।

### दीर्घविधायकं विधिसूत्रम्

**अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ६ ।४ ।११ ॥**

**अबादीनामुपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारम् । क्रोष्टारौ । क्रोष्टॄन् ॥**

(अप्-तृन्-तृच्-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄणाम्, अङ्गस्य, उपधायाः, असम्बुद्धौ, सर्वनामस्थाने, दीर्घः ।)

सरलार्थः- सम्बुद्धिभिन्ने सर्वनामस्थाने परे सति तृन्-तृच्प्रत्ययान्तशब्दानाम्, अप्, स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ इत्येतेषां शब्दानां च अङ्गस्य उपधाया दीर्घो भवति । अप् = जलवाचकः शब्दः । स्वसृ = भगिनीवाचकः शब्दः । नप्तृ = पौत्रवाचकः, दौहित्रवाचकश्च शब्दः । नेष्टृ = ऋत्विग्विशेषवाचकः शब्दः । त्वष्टृ = प्रजापतिवाचकः शब्दः । क्षत्तृ = सारथिवाचकः शब्दः । होतृ = ऋत्विग्वाचकः शब्दः । पोतृ = ऋत्विग्विशेषवाचकः शब्दः । प्रशास्तृ = राजवाचकः शब्दः ।

क्रोष्टु सु - क्रोष्टु स् - क्रोष्टृ स् (तृज्वत्क्रोष्टुः) - क्रोष्टन् स् (ऋदुशनस्पुरुदंसोऽनेहसां च) - क्रोष्टान् स् (अप्तृन्तृच्..........) - क्रोष्टान् (हल्ङ्याब्भ्यो दीर्घात्.......) - क्रोष्टा (न लोपः प्रातिपदिकान्तस्य) ।

क्रोष्टु औ - क्रोष्टृ औ (तृज्वत्क्रोष्टुः) - क्रोष्टर् औ (ऋतो ङिसर्वनामस्थानयोः) - क्रोष्टार् औ (अप्तृन्तृच्..........) - क्रोष्टारौ । एवमेव, जस्-प्रत्यये- क्रोष्टारः, अम्-प्रत्यये- क्रोष्टारम्,

औट्-प्रत्यये- क्रोष्टारौ । सम्बोधनैकवचने तु सर्वनामस्थाने सत्यपि तृज्वद्भावस्य अविधानाद् विष्णुवदेव 'हे क्रोष्टो' इति । शस्विभक्तौ तृज्वद्भावाभावे विष्णुवत्- क्रोष्टून् ।

## तृज्वद्भावविधायकं विधिसूत्रम्

**विभाषा तृतीयादिष्वचि ७ ।१ ।९७ ॥**

**अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्ट्रे ॥**

(तृतीयादिषु, अचि, क्रोष्टु, तृज्वत्, विभाषा)

सरलार्थः- तृतीयातः सप्तमीपर्यन्तेषु अजादि-प्रत्ययेषु परेषु क्रोष्टु-शब्दस्य विकल्पेन तृज्वद्भावो भवति ।

अनेन सूत्रेण तृज्वद्भावपक्षे क्रोष्टु-शब्दस्य स्थाने क्रोष्टृ-शब्दादेशे विशेषप्रक्रिया वर्तते, पक्षान्तरे तु विष्णुशब्दवद् रूपाणि ज्ञेयानि ।

क्रोष्टु टा - क्रोष्टु आ - क्रोष्टृ आ (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् आ (इको यणचि) - क्रोष्ट्रा । पक्षे- क्रोष्टुना । क्रोष्टु ङे - क्रोष्टु ए - क्रोष्टृ ए (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् ए (इको यणचि) - क्रोष्ट्रे । पक्षे- क्रोष्टवे ।

## उत्वविधायकं विधिसूत्रम्

**ऋत उत् ६ ।१ ।१११ ॥**

**ऋतो ङसिङसोरति उदेकादेशः । रपरः ॥**

(ऋतः, ङसि-ङसोः, अति, पूर्वपरयोः, एकः, उत्)

सरलार्थः- ऋकारात्, ऌकारात् च ङसि-प्रत्ययस्य, ङस्-प्रत्ययस्य च अकारे परे सति पूर्वपरयोः स्थाने उकार एकादेशो भवति । 'उरण् रपरः' इत्यनेन रपरत्वेन ऋकार-अकारयोः स्थाने 'उर्' इति, ऌकार-अकारयोः स्थाने च 'उल्' इत्येतौ आदिश्येते । कोष्टृ ङसि इत्यत्र अनुबन्धलोपे कोष्टृ अस् इत्यवस्थायाम् अनेन इति सूत्रेण पूर्वपरयोः स्थाने उत्वे, रपरत्वे 'उर्' इति एकादेशे कोष्टुरस् इति जाते

## संयोगान्तलोपस्य नियमसूत्रम्

**रात्सस्य ८ ।२ ।२४ ॥**

**रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य । रस्य विसर्गः । क्रोष्टुः २ । क्रोष्टोः २ ।**

(संयोगान्तस्य, पदस्य, रात्, सस्य, लोपः ।)

सरलार्थः- पदान्ते विद्यमानस्य संयोगस्य उपान्त्यवर्णो यदि रेफः अस्ति चेत् तस्मात् परस्य केवलं सकारस्य एव लोपो भवति, नान्येषां संयोगान्तवर्णानाम् । पदान्तस्य संयोगान्तस्य वर्णस्य 'संयोगान्तस्य लोपः' इत्यनेनैव लोपे सिद्धे अस्य सूत्रस्य पाठो नियमार्थः 'सिद्धे सत्यारभ्यमाणो विधिर्नियमाय कल्पते' इति परिभाषया । नियमास्तु संयोगान्तलोपे रेफात् परस्य यदि लोपः तर्हि सस्य एव न अन्यस्य इति ।

क्रोष्टु ङसि/ङस् - क्रोष्टु अस् - क्रोष्टृ अस् (विभाषा तृतीयादिष्वचि) - क्रोष्ट् उर् स् (ऋत उत्) - क्रोष्टुर् (रात्सस्य) - क्रोष्टुः । पक्षे- क्रोष्टोः । क्रोष्टु ओस् - क्रोष्टृ ओस् (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् ओस् (इको यणचि) - क्रोष्ट्रोस् - क्रोष्ट्रोर् - क्रोष्ट्रोः । पक्षे- क्रोष्ट्वोः ।

**वा.२१ (नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन) । क्रोष्टूनाम् । क्रोष्टरि । पक्षे हलादौ च शम्भुवत् ॥ हूहूः । हूह्वौ । हूह्वः । हूहूम् । हूहून् इत्यादि ॥ अतिचमूशब्दे तु नदीकार्यं विशेषः । हे अतिचमु । अतिचम्वै । अतिचम्वाः । अतिचमूनाम् ॥ अलपूः ॥**

क्रोष्टु आम्, इत्यवस्थायाम्, नुडागमस्य अपेक्षया परत्वाद् अनेन सूत्रेण विकल्पेन तृज्वद्भावे प्राप्ते, 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन पूर्वं नुडागमे 'क्रोष्टु नाम्' इत्यवस्थायाम् 'नामि' इति दीर्घे 'क्रोष्टूनाम्' इति एकमेव रूपं सिद्ध्यति । ङि-विभक्तौ तु-

क्रोष्टु ङि - क्रोष्टु इ - क्रोष्टृ इ (विभाषा तृतीयादिष्वचि) - क्रोष्टर् इ (ऋतो ङिसर्वनामस्थानयोः) - क्रोष्टरि । पक्षे- क्रोष्टौ ।

हूहू-शब्दो गन्धर्वविशेषवाचकः, ऊकारान्तः, पुँल्लिङ्गश्च वर्तते ।

हूहू सु - हूहू स् - हूहूस् - हूहूर् - हूहूः । हूहू औ - हूहू औ - हूह् व् औ - हूह्वौ । ('दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधः) । अन्यत्रापि विशेषकार्यं नास्ति ।

अतिचमू-शब्दस्य तु चमू-शब्दान्तत्वात् तस्य च नित्यं स्त्रीलिङ्गे वर्तमानत्वात् नदीसंज्ञा भवति । तेन नदीसंज्ञाप्रयुक्तकार्याणि तस्य सिद्धिप्रक्रियायां जायन्ते इति बोध्यम् । अन्यत्र तु हूहूवदेव ।

अतिचमू ङे - अतिचमू ए - अतिचमू आट् (आ) ए (आण्नद्याः) - अतिचमू ऐ (आटश्च) - अतिचम् व् ऐ - अतिचम्वै ।

खलपू-प्रातिपदिकात् सुप्रत्यये- खलपूः । औ-प्रत्यये पूर्वसवर्णदीर्घस्य निषेधानन्तरं यणं बाधित्वा ऊकारस्य उवङादेशे प्राप्ते-

## यण्-विधायकं विधिसूत्रम्

**ओः सुपि ६ । ४ । ८३ ॥**

**धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादचि सुपि । खलप्वौ । खलप्वः । एवं सुल्वादयः ॥ स्वभूः । स्वभुवौ । स्वभुवः । वर्षाभूः ॥**

(अनेकाचः, अङ्गस्य, असंयोगपूर्वस्य, ओः, धातोः, सुपि, अचि, यण्)

सरलार्थः- यदि अङ्गम् अनेकाच् वर्तते, तस्य अङ्गस्य अन्ते धातुः अस्ति, तस्य च धातोः अन्ते धातोरवयव उवर्णो विद्यते, तस्य च उवर्णस्य पूर्वस्मिन् भागे संयोगो न भवति चेत् तादृशस्य अङ्गस्य अन्त्यवर्णस्य (उवर्णस्य) स्थाने 'यण्' आदेशो भवति, अजादि-प्रत्यये परे सति ।

अनेन सूत्रेण उवङादेशं बाधित्वा ऊकारस्य यणि- खलप् व् औ, खलप्वौ । एवमेव अन्यासु अजादिषु विभक्तिषु अपि बोध्यम् । सुलू-शब्दस्य अपि खलपूवद् रूपाणि जायन्ते । स्वभू-शब्दस्य तु अनेन सूत्रेण यणि प्राप्ते 'न भूसुधियोः' इत्यनेन निषेधाद् बाधकाभावे ऊकारस्य स्थाने ऊवङादेशो विधीयते, तेन अजादौ विभक्तौ स्वभुवौ, स्वभुवः इत्यादीनि रूपाणि निष्पद्यन्ते । वर्षाभू-शब्दस्य तु-

## यण्-विधायकं विधिसूत्रम्

**वर्षाभ्वश्च । ६ । ४ । ८४ ।**

**अस्य यण् स्यादचि सुपि । वर्षाभ्वावित्यादि ॥ दृन्भूः ।**

(वर्षाभ्वः, अङ्गस्य, च अचि, सुपि, यण्)

सरलार्थः- अजादि-सुप्-प्रत्यये परे सति 'वर्षाभू' इति शब्दस्य अन्त्यवर्णस्य स्थाने यण् आदेशो भवति । विधिरयम् उवङादेशस्य अपवादः ।

मण्डूक-पर्यायाद् वर्षाभू-प्रातिपदिकाद् औ-प्रत्यये, उवङादेशं बाधित्वा अनेन यणि- वर्षाभ्वौ । एवम् अन्यत्रापि अजादौ विभक्तौ ।

**वा.२२ दृन्करपुनः पूर्वस्य भूवो यण् वक्तव्यः) दृन्भ्वौ । एवं करभूः ॥ धाता । हे धातः ! । धातारौ । धातारः ।**

**सरलार्थः**- दृम्भू-करभू-पुनर्भू-शब्दानाम् अजादि-सुप्-प्रत्यये परे अन्त्यवर्णस्य यणादेशो भवतीति वार्तिकार्थः। औ-प्रत्ययादिषु अनेन उवङादेशं बाधित्वा यणि कृते- दृन्भ्वौ, करभ्वौ, पुनर्भ्वौ इत्यादि रूपाणि जायन्ते।

अथ ऋकारान्त-पुँल्लिङ्गशब्दानां रूपाणि निष्पाद्यन्ते। अस्मिन् क्रमे प्रायशः कृततृज्वद्भावस्य क्रोष्टृ-शब्दस्य रूपसिद्धिप्रक्रियायां प्रयुक्तानि सूत्राणि उपयुज्यन्ते।

'दधाति' इत्यर्थे तृच्-प्रत्ययेन निष्पन्नो धातृ-शब्दो ब्रह्मवाची वर्तते। तस्मात् सु-प्रत्यये-

धातृ सु - धातृ स् - धातन् स् (गुणं बाधित्वा अनङ्) - धातान् स् - (अप्तृन्......) - धातान् (हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्) - **धाता** (न लोपः प्रातिपदिकान्तस्य)। धातृ औ - धातर् औ (ऋतो ङिसर्वनामस्थानयोः) - धातार् औ (अप्तृन्.......) - **धातारौ**। एवं **धातारः, धातारम्, धातारौ**। सम्बुद्धौ तु 'ऋदुशनस्...' इति अनङादेशस्य अप्राप्तौ, 'अप्तृन्...' इति उपधादीर्घस्य च अप्रसङ्गात्- धातृ सु - धातृ स् - धातर् स् (ऋतो ङिसर्वनामस्थानयोः) - धातर् (रात्सस्य) - धातः। अन्यासु आम्भिन्नेषु अजादिप्रत्ययेषु क्रोष्टृशब्दवत् प्रक्रिया अवलम्बनीया। आम्-प्रत्यये- धातृ आम्, धातृ नाम् (ह्रस्वनद्यापो नुट्), धातृ नाम् (नामि), इत्यवस्थायाम्-

**(ऋवर्णान्नस्य णत्वं वाच्यम् वा.)। धातॄणाम्। एवं नप्त्रादयः॥ पिता। अप्तृन्निति सूत्रे नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम्। तेनेह न। पितरौ। पितरः। पितरम्। शेषं धातृवत्। एवं जामात्रादयः॥ ना। नरौ॥**

**सरलार्थः**- समानपदे ऋवर्णात् परस्य नकारस्य अपि णत्वं भवति, अव्यवधाने सति, अनेन णत्वं वाच्यम्' इति वार्तिकेन नकारस्य णत्वे- धातॄणाम्। हलादौ विभक्तौ तु विभक्तियोजनादिकमेव कार्यम्- **धातृभ्याम्, धातृभिः, धातृभ्यः, धातृषु**।

अप्तृन्तृच् इत्यादिसूत्रे तृन्तृच्-प्रत्ययाभ्यां सह उणादिनिष्पन्नानां पाठो नियमार्थः - उणादि-प्रकरणे निष्पन्नानां शब्दानां 'अप्तृन्तृच् ... इत्यादिना यदि दीर्घादेशः तर्हि नप्त्रा-दीनामेव, तेन प्रकरणे मातृपित्रादीनां शब्दानां न दीर्घः। अतः औ, जस्, अम्, औट् इत्येतेषु प्रत्ययेषु पितरौ, पितरः, पितरम्, पितरौ इति धातृशब्दाद् भिन्नप्रक्रियया रूपाणि जायन्ते। पितृ औ - पितर् औ (गुणः) - पितरौ। इत्यादि। शेषविभक्तिषु धातृवत्। जामातृ-भ्रातृ-शब्दौ पितृवत्।

मनुष्यवाचकस्य नृ-शब्दस्य आम्-प्रत्ययं विहाय सर्वत्रैव पितृवद् रूपाणि निष्पद्यन्ते। यथा- ना, नरौ, नरः, हे नः, नरम्, नरौ नॄन्, न्रा इत्यादि। आम्-प्रत्यये तु-

### दीर्घविधायकं विधिसूत्रम्

**नृ च ६ । ४ । ६ ॥**

**अस्य नामि वा दीर्घः । नृणाम्, नृणाम् ॥**

(नृ, अङ्गस्य, नामि, दीर्घः, उभयथा)

**सरलार्थः**- षष्ठीबहुवचनस्य नाम्-प्रत्यये परे सति नृ-शब्दस्य अङ्गस्य अन्त्यवर्णस्य दीर्घो विभाषया भवति । नामि = नुडागमसहिते आमि । अनेन 'नामि' इत्यनेन प्राप्तं नित्यं दीर्घं बाधित्वा विकल्पेन दीर्घो विधीयते । 'सकृद्गतौ विप्रतिषेधेन यद् बाधितं तद् बाधितमेव' इति परिभाषया 'नामि' इत्यस्य पुनःप्रवृत्तिर्न भवतीति स्मर्तव्यम् ।

नृ आम् - नृ नाम् - नॄ नाम् (नृ च) - नॄनाम् - नॄणाम् (ऋवर्णान्नस्य णत्वं वाच्यम्) । पक्षे- नृणाम् ।

अथ ओकारान्तस्य गो-शब्दस्य साधनं क्रियते । धेनुवाचकाद् गो-शब्दात् सु-प्रत्यये-

### णिद्वद्भावातिदेशविधायकं सूत्रम्

**गोतो णित् ७ । १ । ९० ॥**

**ओकाराद्विहितं सर्वनामस्थानं णिद्वत् । गौः । गावौ । गावः ॥**

(गोतः, सर्वनामस्थाने, णित्)

**सरलार्थः**- गो-शब्दस्य ओकाराद् विहितस्य सर्वनामस्थान-प्रत्ययस्य णिद्वद्भावो भवति । 'अचो ञ्णिति' इत्यनेन वृद्धिविधानार्थोऽयं णिद्वद्भावः ।

गो सु - गो स् - अनेन णित्वे- गौ स् (अचो ञ्णिति) - गौस् - गौर् - **गौः** । गो औ - अनेन णित्वे- गौ औ (अचो ञ्णिति) - ग् आव् औ - **गावौ** । गो जस् - गो अस् - अनेन णित्वे- गौ अस् (अचो ञ्णिति) - ग् आव् अस् - गावस्- गावर् - **गावः** ।

### एकादेश-आत्वविधायकं सूत्रम्

**औतोऽम्शसोः ६ । १ । ९३ ॥**

**ओतोऽम्शसोरचि आकार एकादेशः । गाम् । गावौ । गाः । गवा । गवे । गोः । इत्यादि ।**

(ओतः, अम्-शसोः, अचि, एकः, पूर्वपरयोः, आ) औतः = आ ओतः ।

सरलार्थः- ओकारान्त-शब्दात् परस्य द्वितीयाविभक्तेः अम्-प्रत्ययस्य, शस्-प्रत्ययस्य च अच्-वर्णे परे पूर्वपरयोः स्थाने आकार एकादेशो भवति ।

गो-शब्दाद् अम्-प्रत्यये णित्वात् प्राप्तां वृद्धिं बाधित्वा अनेन आकार एकादेशो विधीयते । यथा-

गो अम् - ग् आ म् (औतोऽम्शसोः) - गाम् । गो शस् - गो अस् - ग् आ स् (औतोऽम्शसोः) - गास् - गार् - गाः । गो टा - गो आ - ग् अव् आ (एचोऽयवायावः) - गवा । गो ङे - गो ए- ग् अव् ए (एचोऽयवायावः) - गवे । गो ङसि/ङस् - गो अस् - गोस् (ङसिङसोश्च) - गोर् - गोः । (अवादेशं बाधित्वा पूर्वरूपम्) । शेषेषु अजादिषु प्रत्ययेषु अवादेशेन गवोः, गवाम्, गवि इति सिद्ध्यन्ति । हलादिषु तु विभक्तियोजनेन गोभ्याम्, गोभिः, गोभ्यः, गोषु इति ।

अथ ऐकारान्त-शब्दः- रै । रै-शब्दो धनवाचको वर्तते । अजादौ विभक्तौ आयादेशेन रायौ, रायः, रायम् इत्यादीनि रूपाणि निष्पद्यन्ते । हलादिषु तु-

## आत्वविधायकं विधिसूत्रम्

**रायो हलि ७ । २ । ८५ ॥**

**अस्याकारादेशो हलि विभक्तौ । राः । रायौ । रायः । राभ्यामित्यादि ॥ ग्लौः । ग्लावौ । ग्लावः । ग्लौभ्यामित्यादि ॥**

(रायः, अङ्गस्य, हलि, विभक्तौ, आ)

सरलार्थः- हलादिविभक्तिषु परासु रै-शब्दस्य अन्त्यवर्णस्य (ऐकारस्य) स्थाने आकार आदेशो भवति । अनेन आकारान्तादेशे कृते हलादौ विभक्तौ रै-शब्दो रा-शब्दे परिवर्तते ।

रै सु - रै स् - रा स् (रायो हलि) - रास् - रार् - राः । एवं हे राः, राभ्याम्, राभिः, राभ्यः, रासु ।

अथ औकारान्तः, चन्द्रवाचको ग्लौ-शब्दः । ग्लौ-शब्दे विशेषकार्याभावाद् विभक्तियोजनानन्तरं सन्धिकार्यम्, रुत्वसत्वादिकार्यमेव विधातव्यं भवति । यथा-

ग्लौ सु - ग्लौ स् - ग्लौस् - ग्लौर् - ग्लौः । एवं हे ग्लौः, ग्लौभ्याम्, ग्लौभिः, ग्लौभ्यः, ग्लौषु ।

ग्लौ औ - ग्ल् आव् औ - ग्लावौ । एवं ग्लावः, ग्लावम्, ग्लावौ, ग्लावः, ग्लावा इत्यादि ।

**प्रयोगसिद्धिप्रकारः**

**गाम्**

गो-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण द्वितीयाया एकवचने अम्-प्रत्यये 'गो अम्' इति जाते 'गोतो णित्' इति सूत्रेण प्रत्ययस्य णिद्वद्भावे 'अचो ञ्णिति' इत्यनेन अङ्गस्य वृद्धौ प्राप्तायाम्, तां बाधित्वा 'औतोऽम्शसोः' इति सूत्रेण पूर्वपरयोः स्थाने आकार एकादेशे 'ग् आ म्' इति जाते, वर्णयोगे 'गाम्' इति रूपं साधु ।

**शब्द-रूपावलिः**

| धातृ-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| धाता | धातारौ | धातारः |
| धातारम् | धातारौ | धातॄन् |
| धात्रा | धातृभ्याम् | धातृभिः |
| धात्रे | धातृभ्याम् | धातृभ्यः |
| धातुः | धातृभ्याम् | धातृभ्यः |
| धातुः | धात्रोः | धातॄणाम् |
| धातरि | धात्रोः | धातृषु |
| हे धातः ! | हे धातारौ ! | हे धातारः ! |

| गो-शब्दस्य रूपाणि | | |
|---|---|---|
| गौः | गावौ | गावः |
| गाम् | गावौ | गाः |
| गवा | गोभ्याम् | गोभिः |
| गवे | गोभ्याम् | गोभ्यः |
| गोः | गोभ्याम् | गोभ्यः |
| गोः | गवोः | गवाम् |
| गवि | गवोः | गोषु |
| हे गौः ! | हे गावौ ! | हे गावः ! |

**पितृ-शब्दस्य रूपाणि**

| | | |
|---|---|---|
| पिता | पितरौ | पितरः |
| पितरम् | पितरौ | पितॄन् |

शेषं धातृवत् ।

## वाक्येषु प्रयोगानुशीलनम्

१. यजमानः विप्राय गां ददाति ।

२. गवां शाला गोशाला कथ्यते ।

३. परेषां रायि लोभो नैव कर्तव्यः ।

४. धात्रे नमः ।

५. पुत्रः पित्रे पत्रं लिखति ।

६. भवतः भ्रातुः नाम किम् अस्ति ?

७. परिश्रमिणां नृणां कृते किमपि असम्भवं नास्ति ।

## अभ्यासः

### १. सूत्राणि पठित्वा तेषां कार्याणि विलिखत

(क) तृज्वत्क्रोष्टुः (ख) ऋत उत् (ग) औतोऽम्शसोः

(घ) रायो हलि (ङ) ओः सुपि (च) रात्सस्य

### २. परस्परं मेलयत

| | |
|---|---|
| धाता | आवादेशः |
| राभ्याम् | गुणः |
| क्रोष्टारौ | अनङादेशः |
| जामातुः | यण् |
| गौः | आकारान्तादेशः |
| ग्लावः | वृद्धिः |
| | उत्वम् |

### ३. सूत्राणि पूरयत

(क) ऋदुशन.................. । (ख) ऋतो.................... ।

(ग) अप्तृन्.................... । (घ) विभाषा.................... ।

(ङ) नुमचिर.................... । (च) ऋवर्णान्नस्य.................... ।

४. **अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत**

क्रोष्ट्रा, पितरि, नुः, रासु, गोः, धात्रोः

५. **एकवाक्येन उत्तरं लिखत**

(क) 'पितरि' इत्यत्र केन सूत्रेण गुणो भवति ?

(ख) कस्य प्रातिपदिकस्य आम्-प्रत्यये विकल्पेन दीर्घो भवति ?

(ग) 'क्रोटुः' इत्यत्र तृज्वद्भावविधायकं सूत्रं किम् ?

(घ) 'धातॄणाम्' इत्यत्र केन णत्वं विधीयते ?

(ङ) क्रोष्टु-शब्दस्य द्वितीयैकवचने किं रूपम् ?

(च) गो-शब्दस्य कासु विभक्तिषु वृद्धिर्भवति ?

(छ) 'वर्षाभ्वश्च' इति सूत्रं किं करोति ?

६. **प्रश्नानाम् उत्तरं लिखत**

(क) 'दृन्करपुनः पूर्वस्य भूवो यण वक्तव्यः' इति वार्तिके के शब्दा निर्दिष्टाः सन्ति ?

(ख) 'अप्तृन्.....' इति सूत्रेण केषाम् उपधादीर्घो विधीयते ?

(ग) धातृ-पितृशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) क्रोष्टु-शब्दस्य रूपसिद्धिप्रक्रिया कुत्र कुत्र शम्भुशब्दाद् भिन्ना विद्यते ?

(ङ) पितृ-शब्दः कासु विभक्तिषु गुणं लभते ?

(च) रै-शब्दस्य कुत्र कुत्र आत्वं भवति ?

७. **नृ-रै-स्वयम्भू-शब्दानां सर्वाणि रूपाणि लिखत ।**

८. **अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत**

| | | |
|---|---|---|
| (क) क्रोष्टा | (ख) वर्षाभ्वौ | (ग) पितरः |
| (घ) हे धातः | (ङ) गाः | (ङ) नृणाम् |

**इत्यजन्तपुँल्लिङ्गाः ।**

अजन्तस्त्रीलिङ्गप्रकरणे

# आबन्तशब्दाः

**आबन्तशब्देषु सामान्यकार्याणि-**

- सु-प्रत्ययस्य- हल्ङ्यादिलोपः । (हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्)
- औ/औट्-प्रत्यययोः- 'शी' आदेशः । (औङ आपः)
- जस्-प्रत्यये- पूर्वसवर्णदीर्घनिषेधः, सवर्णदीर्घश्च । (दीर्घाज्जसि च)
- शस्-प्रत्यये- पूर्वसवर्णदीर्घः, नत्वाभावश्च । (प्रथमयोः पूर्वसवर्णः)
- टा/ओस्-प्रत्यययोः- अङ्गान्तस्य आकारस्य एत्वम् । (आङि चापः)
- ङे/ङसि/ङस्/ङि-प्रत्ययेषु- याट् (या) आगमः । (याडापः)
- ङि-प्रत्ययस्य- 'आम्' आदेशः । (ङेराम्नद्याम्नीभ्यः)
- आम्-प्रत्ययस्य- नुट् (न्) आगमः । (ह्रस्वनद्यापो नुट्)

**रमा ।**

स्त्री-प्रत्ययान्तशब्देषु प्रातिपदिकत्वं 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया भवति । प्रायशः अजन्तस्त्रीलिङ्गशब्दाः आबन्ताः, ङ्यन्ता वा भवन्ति, अतः तेभ्यो विहितस्य सु-प्रत्ययस्य सकारस्य हल्ङ्यादिलोपो भवति । 'रमते' इत्यर्थे रम्-धातोः अच्-प्रत्ययेन निष्पन्नाद् रम-शब्दात् स्त्रीत्वविवक्षायां टाप्-प्रत्यये 'रमा' इति शब्दो निष्पद्यते । तस्य च उक्तया परिभाषया प्रातिपदिकसंज्ञायां सिद्धायां तस्मात् सुप्-प्रत्यया भवन्ति ।

रमा-प्रातिपदिकात् सुप्रत्यये-

रमा सु - रमा स् - रमा (हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्) ।

**शी-आदेशविधायकं विधिसूत्रम्**

**औङः आपः ७ ।१ ।१८ ॥**

**आबन्तादङ्गात्परस्यौङः शी स्यात् । औङित्यौकारविभक्तेः संज्ञा । रमे । रमाः ॥**

(आपः, अङ्गात्, औङः, शी)

सरलार्थः- आप्-प्रत्ययान्ताद् अङ्गात् परयोः औ-औट्प्रत्यययोः स्थाने सर्वादेशरूपेण 'शी' आदेशो भवति । शकारस्य 'लशक्वतद्धिते' इत्यनेन इत्संज्ञायां लोपे 'ई' इत्येव अवशिष्यते । रमा औ - रमा शी - रमा ई - रमे । जस्-प्रत्यये तु सवर्णदीर्घं बाधित्वा प्राप्तस्य पूर्वसवर्णदीर्घस्य 'दीर्घाज्जसि च' इत्यनेन निषेधे पुनः सवर्णदीर्घो विधीयते । रमा जस् - रमा अस् - रमास् (अकः सवर्णे दीर्घः) - रमार् - रमाः ।

## एत्वविधायकं विधिसूत्रम्

**सम्बुद्धौ च ७ ।३ ।१०६ ॥**

**आप एकारः स्यात्सम्बुद्धौ । एङ्ह्रस्वादिति सम्बुद्धिलोपः । हे रमे । हे रमे । हे रमाः । रमाम् । रमे । रमाः ॥**

(आपः, अङ्गस्य, सम्बुद्धौ, सुपि, च, एत्)

सूत्रार्थः सम्बोधनेऽर्थे प्रथमाया एकवचन-प्रत्यये परे आबन्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकार आदेशो भवति । अनेन एत्वे कृते 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यनेन सम्बुद्धिसंज्ञकस्य हल्वर्णस्य (स् इत्यस्य) लोपो विधीयते ।

रमा सु - रमा स् - रमे स् - रमे । द्विवचन-बहुवचनयोस्तु प्रथमावद् बोध्यम् । रमा अम् - रमाम् (अमि पूर्वः) । शस्-प्रत्यये पूर्वसवर्णदीर्घे स्त्रीलिङ्गत्वात् सकारस्य नत्वं न प्रवर्तते । रमा शस् - रमा अस् - रमास् (प्रथमयोः पूर्वसवर्णः) - रमार् - रमाः ।

## एत्वविधायकं विधिसूत्रम्

**आङि चापः । ७ । ३ । १०५ ।**

**आङि ओसि चाप एकारः । रमया । रमाभ्याम् । रमाभिः ॥**

(आपः, अङ्गस्य, ओसि, आङि, च, सुपि, एत्)

सरलार्थः- टा-प्रत्यये, ओस्-प्रत्यये च परे सति आबन्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकार आदिश्यते । अनेन एत्वे कृते 'एचोऽयवायावः' इति अयादेशो भवति ।

रमा टा - रमा आ - रमे आ - रम् अय् आ - रमया । रमा ओस् - रमे ओस् - रम् अय् ओस् - रमयोस् - रमयोर् - रमयोः । भ्यामादिहलादिषु विभक्तिषु तु विभक्तियोजनेनैव

रूपाणि सिद्ध्यन्ति ।

## याडागमविधायकं विधिसूत्रम्

**याडापः ७ ।३ ।११३ ॥**

**आपो ङितो याट् । वृद्धिः । रमायै । रमाभ्याम् २ । रमाभ्यः २ । रमायाः २ । रमयोः २ । रमाणाम् । रमायाम् । रमासु ॥ एवं दुर्गाम्बिकादयः ॥**

(आपः, अङ्गात्, ङिति, सुपि, याट्)

सरलार्थः- आबन्ताद् अङ्गाद् उत्तरस्य सुप्सम्बन्धिनो ङित्-प्रत्ययस्य 'याट्' इति आगमो भवति । टकारस्य इत्संज्ञायां लोपे 'या' इत्येव अवशिष्यते, टित्वात् प्रत्ययस्य आद्यवयवश्च भवति ।

रमा + ङे - रमा ए - रमा याट् (या) ए - रमा या ए - रमा यै (वृद्धिरेचि) - **रमायै** । रमा + ङसि/ङस् - रमा अस् - रमा या अस् - रमा या अस् - रमा यास् - रमायास् - रमायार् - **रमायाः** । रमा आम् - रमा नाम् (ह्रस्वनद्यापो नुट्) - रमाणाम् - **रमाणाम्** (अट्कुप्वाङ्नुम्व्यवायेऽपि) । रमा ङि - रमा इ - रमा आम् (ङेराम्नद्याम्नीभ्यः) - रमा याट् (या) आम् (याडापः) - रमा या आम् - रमा याम् - **रमायाम्** ।

अनया एव प्रक्रियया दुर्गा, अम्बिका इत्यादीनामपि आबन्तप्रातिपदिकानां सिद्धिप्रक्रिया ज्ञेया ।

अथ अजन्तसर्वनामशब्दानां स्त्रीलिङ्गे रूपसाधनम्-

## स्याडागमस्य, ह्रस्वस्य च विधायकं विधिसूत्रम्

**सर्वनाम्नः स्याड्ढ्रस्वश्च ७ ।३ ।११४ ॥**

**आबन्तात्सर्वनाम्नो ङितः स्याट् स्यादापश्च ह्रस्वः । सर्वस्यै । सर्वस्याः । सर्वासाम् । सर्वस्याम् । शेषं रमावत् ॥ एवं विश्वादय आबन्ताः ॥**

(सर्वनाम्नः, आपः, ङिति, सुपि, स्याट्, अङ्गस्य, ह्रस्वः, च)

सरलार्थः- सर्वनामसंज्ञकाद् आबन्ताद् अङ्गात् परस्य ङित्-सुप्प्रत्ययस्य 'स्याट्' इति आगमो भवति, तथा च अङ्गस्य अन्त्यवर्णस्य (आपः) ह्रस्वः अपि भवति । टकारस्य अनुबन्धलोपे 'स्या' इत्येव अवशिष्यते, स च टित्वात् प्रत्ययस्य आद्यवयवत्वेन तिष्ठति । 'याडापः' इत्यनेन याडागमे प्राप्ते सर्वनामशब्दानां विषये अनेन स्याडागमः, ह्रस्वश्च विधीयेते ।

सर्व-शब्दस्य स्त्रीलिङ्गे प्रयोगे टाप्-प्रत्ययेन 'सर्वा' इति आबन्तशब्दो निष्पद्यते, तस्य च लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वे आम्-ङिद्भिन्नविभक्तिषु रमावद् एव प्रक्रियया रूपाणि निष्पद्यन्ते । यथा- सर्वा, सर्वे, सर्वाः इत्यादि । ङिद्विभक्तिषु तु- सर्वा ङे - सर्वा ए - सर्व स्या ए (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्यै (वृद्धिरेचि) - सर्वस्यै । सर्वा ङसि/ङस् - सर्वा अस् - सर्व स्या अस् (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्यास् (अकः सवर्णे दीर्घः) - सर्वस्यार् - सर्वस्याः ।

आम्-प्रत्यये सर्वनामसंज्ञायाम्, नुडागमं बाधित्वा 'आमि सर्वनाम्नः सुट्' इति सुडागमो भवति । यथा-

सर्वा आम् - सर्वा साम् (नुटं बाधित्वा सुट्) - सर्वासाम् । सर्वा ङि - सर्वा इ - सर्वा आम् (ङेराम्नद्याम्नीभ्यः) - सर्व स्या आम् (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्याम् (अकः सवर्णे दीर्घः) - सर्वस्याम् । शेषविभक्तिषु रमावत् ।

**स्त्रीलिङ्गे आबन्तशब्देषु सर्वनामसंज्ञाप्रयुक्तकार्याणि-**

ङे/ङसि/ङस्/ङि-प्रत्ययेषु- प्रत्ययस्य 'स्याट्' आगमः, अङ्गस्य ह्रस्वश्च ।

आम्-प्रत्यये- प्रत्ययस्य 'सुट्' आगमः ।

एवं प्रकारेण विश्वादीनां सर्वनामशब्दानामपि स्त्रीलिङ्गे टापि कृते 'विश्वा' इत्यादिप्रातिपदिकानां रूपाणि सर्वावत् एव साधनीयानि । यथा- विश्वा, विश्वस्यै, विश्वस्याः, विश्वासाम्, विश्वस्याम् इत्यादि ।

## सर्वनामसंज्ञाविधायकं सूत्रम्

**विभाषा दिक्समासे बहुव्रीहौ १ । १ । २८ ॥**

**सर्वनामता वा । उत्तरपूर्वस्यै, उत्तरपूर्वायै । तीयस्येति वा सर्वनामसंज्ञा । द्वितीयस्यै, द्वितीयायै ॥ एवं तृतीया ॥ अम्बार्थेति ह्रस्वः । हे अम्ब । हे अक्क । अल्ल ॥ जरा । जरसौ इत्यादि । पक्षे रमावत् ॥ गोपा विश्वपावत् ॥**

(दिक्समासे, बहुव्रीहौ, सर्वादीनि, विभाषा, सर्वनामानि)

**सरलार्थः**- दिग्वाचकशब्दैः निर्मितस्य बहुव्रीहि-समासस्य विकल्पेन सर्वनामसंज्ञा भवति । 'दिङ्नामान्यन्तराले' इत्यनेन विहिताः समासा दिक्समासा उच्यन्ते ।

'उत्तरस्याः पूर्वस्याश्च दिशोः यद् अन्तरालं सा दिक्' इति विग्रहे वहुव्रीहिसमासेन निष्पन्नस्य उत्तरपूर्वशब्दस्य स्त्रीत्वे टापि उत्तरपूर्वा-प्रातिपदिकस्य अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा

विधीयते । तेन ङिद्विभक्तिषु, आम्विभक्तौ च अस्य शब्दस्य सर्वनामसंज्ञापक्षे सर्ववत्, तदभावे रमावत् रूपाणि जायन्ते । यथा- उत्तरपूर्वस्यै, उत्तरपूर्वायै इत्यादि ।

द्वितीया-तृतीया-प्रातिपदिकयोस्तु 'तीयस्य ङित्सु वा' इति वार्तिकेन विकल्पेन सर्वनामसंज्ञायाम् उत्तरपूर्वावत् तयोरपि रूपाणि जायन्ते ।

मातृवाचकस्य अम्बा-शब्दस्य रूपाणि सम्बुद्धौ एव रमाशब्दाद् भिन्नप्रक्रियया निष्पद्यते, कारणं च अत्र 'अम्बार्थनद्योर्ह्रस्वः' इत्यनेन ह्रस्वविधानं वर्तते । अम्बा सु (सम्बोधनैकवचनम्) - अम्बा स् - अम्ब स् (अम्बार्थनद्योर्ह्रस्वः) - अम्ब (एङ्ह्रस्वात् सम्बुद्धेः) - हे अम्ब । एवमेव, मातृवाचकयोः अक्का-अल्लाशब्दयोश्च हे अक्क, हे अल्ल इत्येते रूपे ज्ञेये । शेषविभक्तिषु एतेषां रूपाणि रमावत् ।

जरा-शब्दस्य अजादौ विभक्तौ 'जराया जरसन्यतरस्याम्' इत्यनेन विकल्पेन जरसादेशो विधीयते । अतः अजादिषु विभक्तिषु जरसादेशपक्षे अस्य रूपाणि पुँल्लिङ्गे पठितेन निर्जर-शब्देन सदृशानि ज्ञेयानि । यथा- औप्रत्यये- जरसौ, जस्-प्रत्यये- जरसः इत्यादि । जरसादेशाभावे, हलादिविभक्तिषु च अस्य रूपाणि रमावत् निष्पद्यन्ते । यथा- जरा, जरे जराः इत्यादि ।

'गाः पाति' इत्यर्थे स्त्रीलिङ्गे निष्पन्नस्य गोपा-शब्दस्य आबन्तत्वाभावात्, आकारान्तधातुरूपप्रातिपदिकत्वात् च विश्वपा-शब्दवत् सिद्धिर्भवति । यथा- गोपाः, गोपौ, गोपाः, हे गोपाः, गोपाम्, गोपः इत्यादि ।

## प्रयोगसिद्धिप्रकारः

### हे रमे

रमा-शब्दस्य आबन्ततया 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया प्रातिपदिकत्वे 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण सम्बोधनस्य एकवचने सु-प्रत्ययेऽनुबन्धलोपे 'रमा स्' इति जाते 'सम्बुद्धौ च' इति सूत्रेण अङ्गस्य अन्त्यस्य आकारस्य एत्वे 'रमे स्' इति जाते 'एङ्ह्रस्वात् सम्बुद्धेः' इति सूत्रेण सम्बुद्धिसंज्ञकस्य सकारस्य लोपे 'रमे' इति जाते 'हे'शब्दस्य पूर्वप्रयोगे 'हे रमे' इति रूपं साधु । सम्बोधनस्य द्विवचनेऽपि 'हे रमे' इत्येव रूपं सिद्धयति ।

### शब्द-रूपावलिः

| रमा-शब्दस्य रूपाणि | | |
|---|---|---|
| रमा | रमे | रमाः |
| रमाम् | रमे | रमाः |
| रमया | रमाभ्याम् | रमाभिः |
| रमायै | रमाभ्याम् | रमाभ्यः |
| रमायाः | रमाभ्याम् | रमाभ्यः |
| रमायाः | रमयोः | रमाणाम् |
| रमायाम् | रमयोः | रमासु |
| हे रमे ! | हे रमे ! | हे रमाः ! |

| सर्व-शब्दस्य स्त्रीलिङ्गे (सर्वा-शब्दस्य) रूपाणि | | |
|---|---|---|
| सर्वा | सर्वे | सर्वाः |
| सर्वाम् | सर्वे | सर्वाः |
| सर्वया | सर्वाभ्याम् | सर्वाभिः |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वयोः | सर्वासाम् |
| सर्वस्याम् | सर्वयोः | सर्वासु |
| हे सर्वे ! | हे सर्वे ! | हे सर्वाः ! |

### वाक्येषु प्रयोगानुशीलनम्

१. रमा विद्यालये पठति ।

२. सर्वाः महिलाः तत्र गच्छन्तु ।

३. सर्वासां नारीणां सम्मानो भवेत् ।

४. रमायै नमः ।

५. हे अम्ब ! मह्यं भोजनं देहि ।

## अभ्यासः

१. **सूत्राणाम् अर्थं लिखत**

(क) आङि चापः

(ख) सर्वनाम्नः स्याड्ढ्रस्वश्च

(ग) तृतीया दिक्समासे बहुव्रीहौ

(घ) औङ आपः

२. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) आबन्तसर्वनामशब्दाद् ङिद्विभक्तेः ..................... विधीयते । (याडागमः, स्याडागमः)

(ख) अदन्तप्रातिपदिकात् स्त्रीलिङ्गे ..................... भवति । (टाप्, ङीप्)

(ग) 'रमायै' इत्यत्र ..................... भवति । (दीर्घः, वृद्धिः)

(घ) 'आङ्' इत्यनेन ..................... बोधो भवति । (टा-विभक्तेः, औट्-विभक्तेः)

(ङ) अल्ला-शब्दः ..................... वर्तते । (नदीसंज्ञकः, अम्बार्थकः)

३. **परस्परं मेलयत**

| | |
|---|---|
| रमयोः | याट् |
| सर्वासाम् | ह्रस्वः |
| अम्बिकायाम् | याडामौ |
| अक्क | स्याड्ढ्रस्वौ |
| बालायै | एत्वम् |
| विश्वस्यै | सुट् |

४. **अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत**

लतया, कवितयोः, गीते, कथायाम्, उमायाः, उभयस्यै, कतमासाम्, परस्याम्, शिक्षिकाभिः ।

**५. एकवाक्येन उत्तरं लिखत**

(क) अम्बार्थशब्दाः के ?

(ख) 'रमायाम्' इत्यत्र आमादेशविधायकं सूत्रं किम् ?

(ग) गोपा-शब्दस्य तृतीयैकवचने किं रूपम् ?

(घ) याडागमः केन सूत्रेण विधीयते ?

(ङ) अन्य-शब्दस्य स्त्रीलिङ्गे किं प्रातिपदिकम् ?

**६. प्रश्नानाम् उत्तरं लिखत**

(क) याडागमः कुत्र कुत्र भवति ?

(ख) स्त्रीलिङ्गे सर्वनामसंज्ञाप्रयुक्तानि कार्याणि कानि ? तानि च कासु विभक्तिषु जायन्ते ?

(ग) रमा-सर्वाशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) रमा-अम्बाशब्दयोः रूपसिद्धिप्रक्रियायां का भिन्नता ?

(ङ) गोपा-शब्दस्य विश्वपाशब्दवत्वे कारणं किम् ?

(च) आबन्तस्य एकारः कुत्र कुत्र भवति ?

**७. विश्व-अन्य-दक्षिणशब्दानां स्त्रीलिङ्गे रूपाणि लिखत ।**

**८. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्श्य वाक्ये प्रयोगं च दर्शयत**

(क) रमायै (ख) रमयोः (ग) रमायाम्

(घ) सर्वस्याः (ङ) हे अम्ब (च) सर्वासाम्

अजन्तस्त्रीलिङ्गप्रकरणे

# मति-त्रि-गौर्यादिशब्दाः

**इकारान्त-स्त्रीलिङ्गशब्दाः**

**मतीः मत्या ॥**

मति-शब्दः क्तिन्-प्रत्ययान्तो वर्तते, अतः 'स्त्रियां क्तिन्' इति सूत्रेण अस्य प्रयोगः स्त्रीलिङ्गे भवति । अस्य प्रायेण रूपाणि हरिशब्दवद् भवन्ति । स्त्रीलिङ्गे नत्व-नाभावयोः अप्राप्तेः कारणेन, विकल्पेन नदीसंज्ञायाः कारणेन च मति-शब्दस्य कतिपयरूपाणि हरिशब्दाद् भिन्नानि भवन्ति । सु-औ-जस्-अम्-औट्-प्रत्ययेषु, सम्बुद्धौ च हरिवद् **मतिः, मती, मतयः, मतिम्, मती, हे मते** इत्येतानि रूपाणि मतिशब्दस्य भवन्ति । शस्-प्रत्यये तु पूर्वसवर्णदीर्घानन्तरं सकारस्य नत्वं स्त्रीलिङ्गे न भवति, 'तस्माच्छसो नः पुंसि' इत्यनेन 'पुंसि' इति निर्देशेन पुँल्लिङ्गशब्दानां विषये एव नत्वस्य विधानात् सकारस्य रुत्वविसर्गे 'मतीः' इति रूपं जायते ।

मति शस् - मति अस् - मतीस् - मतीर् - मतीः । टा-प्रत्यये सत्यामपि घिसंज्ञायाम् 'टा' इत्यस्य नाभावो न भवति, 'आङो नाऽस्त्रियाम्' इत्यनेन 'अस्त्रियाम्' इति निर्देशेन स्त्रीलिङ्गे नाभावस्य निषेधात् । अतो यणादेशे कृते 'मत्या' इत्येवं रूपं भवति ।

मति टा - मति आ - मत् य् आ - मत्या । ङिद्विभक्तिषु तु मतिशब्दो विकल्पेन नदीसंज्ञां लभते-

### नदीसंज्ञाविधायकं सूत्रम्

**ङिति ह्रस्वश्च १ । ४ । ६ ॥**

**इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ, ह्रस्वौ चेवर्णोवर्णौ, स्त्रियां वा नदीसंज्ञौ स्तो ङिति । मत्यै, मतये । मत्याः २ । मतेः २ ॥**

(इयङ्-उवङ्-स्थानौ, यू, स्त्र्याख्यौ, ह्रस्वः, च, ङिति, नदी, वा, अस्त्री)

**सरलार्थः**- स्त्री-शब्दं विहाय अन्ये इयङ्-उवङादेशयोः स्थानिरूपेण विद्यमाना ईकारान्ताः,

ऊकारान्ताश्च नित्यस्त्रीलिङ्गशब्दाः, तथा नित्यं स्त्रीलिङ्गे प्रयुज्यमाना इकारान्ताः, उकारान्ताश्च शब्दा अपि ङिद्विभक्तिषु परतः विकल्पेन नदीसंज्ञका भवन्ति ।

अनेन सूत्रेण नदीसंज्ञापक्षे आडागमादि-नदीसंज्ञाप्रयुक्तकार्याणि जायन्ते । नदीसंज्ञाभावे च घिसंज्ञायां गुणादि-घिप्रयुक्तकार्याणि जायन्ते । यथा-

नदीसंज्ञापक्षे- मति ङे - मति ए - मति आट् ए (आण्नद्याः) - मति आ ए - मति ऐ (आटश्च) - मत् य् ऐ (इको यणचि) - मत्यै । घिसंज्ञापक्षे हरिवत्- मति ङे - मति ए - मते ए - मत् अय् ए - मतये ।

मति ङसि/ङस् - मति अस् - मति आ अस् (आण्नद्याः) - मति आस् (आटश्च) - मत् य् आस् (इको यणचि) - मत्यास् - मत्यार् - मत्याः । पक्षे- मतेः ।

## आमादेशविधायकं विधिसूत्रम्

**इदुद्भ्याम् ७ । ३ । ११७ ॥**

**इदुद्भ्यां नदीसंज्ञकाभ्यां परस्य ङेराम् । मत्याम्, मतौ । शेषं हरिवत् ॥ एवं बुद्ध्यादयः ॥**

(इदुद्भ्याम्, नद्याः, अङ्गात्, ङे, आम्)

सरलार्थः- इकारान्तात्, उकारान्तात् च नदीसंज्ञकात् शब्दात् परस्य सप्तम्येकवचनस्य ङि-प्रत्ययस्य स्थाने 'आम्' आदेशो भवति ।

मति ङि - मति इ - मति आम् (इदुद्भ्याम्) - मति आ आम् (आण्नद्याः) - मति आम् (आटश्च) - मत् य् आम् (इको यणचि) - मत्याम् । पक्षे- मतौ । शेषविभक्तिषु हरिवदेव मतिशब्दस्यापि रूपाणि जायन्ते । एवं प्रकारेण बुद्धि, स्तुति, श्रुति, कृति, गति, वृद्धि, विभक्ति इत्यादीनां इकारान्त-स्त्रीलिङ्गप्रातिपदिकानामपि रूपाणि मतिवत् प्रक्रियया निष्पद्यन्ते ।

## तिसृ-चतस्रादेशविधायकं विधिसूत्रम्

**त्रिचतुरोः स्त्रियां तिसृचतसृ ७ । २ । ९९ ॥**

**स्त्रीलिङ्गयोरेतौ स्तो विभक्तौ ॥**

(त्रि-चतुरोः, स्त्रियाम्, तिसृ-चतसृ, विभक्तौ)

सरलार्थः- विभक्तौ परस्यां सत्याम्, स्त्रीत्वविवक्षायां सङ्ख्यावाचिनोः त्रि-चतुर्-शब्दयोः स्थाने क्रमेण 'तिसृ', 'चतसृ' इत्येतौ आदेशौ भवतः । स्त्रीलिङ्गे रूपसाधनक्रमे त्रि-शब्दस्य 'तिसृ', चतुर्-शब्दस्य च 'चतसृ' इत्येतौ आदिश्येते इत्यर्थः । अनेन ऋदन्तशब्दविधानानन्तरम् 'ऋन्नेभ्यो ङीप्' इति स्त्रीप्रत्ययविधायकसूत्रेण ङीपि प्राप्ते 'न षट्स्वस्रादिभ्यः' इत्यनेन

निषिध्यते इति बोध्यम् ।

### रेफादेशविधायकं विधिसूत्रम्

**अचि र ऋतः ७ । २ ।१०० ॥**

**तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि । गुणदीर्घोत्वानामपवादः । तिस्रः । तिस्रः । तिसृभिः । तिसृभ्यः । तिसृभ्यः । आमि नुट् ॥**

(तिसृ-चतसृ, अचि, विभक्तौ, ऋतः, रः)

सरलार्थः- अजादि-विभक्तिषु परतः ऋकारान्तयोः तिसृ-चतसृशब्दयोः अन्त्यस्य ऋकारस्य स्थाने रेफादेशो भवति । विधिरयम् (रेफादेशः) गुणस्य, दीर्घस्य, उत्वस्य च अपवादो वर्तते, इत्युक्ते अनेन तानि बाध्यन्ते ।

त्रि जस्/शस् (नित्यं बहुवचनान्तः) - त्रि अस् - तिसृ अस् (त्रिचतुरोः स्त्रियां तिसृचतसृ) - तिस् र् अस् - तिस्रस् - तिस्रर् - तिस्रः । भिसादौ तु 'तिसृ' इत्यादेशे, हलादित्वाद् अनेन रेफादेशस्य अप्राप्तौ- तिसृभिः । आम्-प्रत्यये- तिसृविधानानन्तरं नुडागमे 'तिसृ नाम्' इत्यवस्थायाम् 'नामि' इत्यनेन दीर्घे प्राप्ते-

### दीर्घनिषेधकं सूत्रम्

**न तिसृचतसृ ६ । ४ । ४ ॥**

**एतयोर्नामि दीर्घो न । तिसृणाम् । तिसृषु ॥ द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ॥ गौरी । गौर्यौ । गौर्यः । हे गौरि । गौर्यौ । इत्यादि ॥ एवं नद्यादयः ॥ लक्ष्मीः । शेषं गौरीवत् ॥ एवं तरीतन्त्र्यादयः ॥ स्त्री । हे स्त्री ॥**

(तिसृ-चतसृ, अङ्गस्य, नामि, दीर्घः, न)

सरलार्थः- नाम्-प्रत्यये परे तिसृशब्दस्य, चतसृ-शब्दस्य च दीर्घो न भवति ।

अनेन दीर्घनिषेधे 'तिसृनाम्' इत्यवस्थायाम्, नकारस्य णत्वे- तिसृणाम् । सुप्-प्रत्यये- तिसृषु । द्वि-शब्दस्य त्यदादिगणे पाठात् 'त्यदादीनामः' इति अत्वे, द्व-शब्दस्य स्त्रीत्वविवक्षायां टापि 'द्वा' इति प्रातिपदिकम्, ततः सर्वाशब्दस्य द्विवचनवत् सिद्धिप्रक्रिया भवति ।

गौरी-नदीशब्दादीनां ङ्यन्तशब्दानाम् 'यूस्त्र्याख्यौ नदी' इत्यनेन नित्यं नदीसंज्ञा भवति, अतः सम्बुद्धौ, ङिद्विभक्तिषु च बहुश्रेयसीशब्दवत् तेषां रूपाणि निष्पद्यन्ते । लक्ष्मी-शब्दस्य तु

अङ्यन्ततया प्रथमैकवचने हल्ङ्यादिलोपाभावे, सम्बुद्धौ च ह्रस्वाभावेन हल्लोपाभावे उभयत्र विसर्गयुतं रूपं भवतीति विशेषः ।

### इयङादेशविधायकं विधिसूत्रम्

**स्त्रियाः ६ । ४ । ७९ ॥**

**अस्येयङ् स्यादजादौ प्रत्यये परे । स्त्रियौ । स्त्रियः ॥**

(स्त्रियाः, अङ्गस्य, अचि, इयङ्)

**सरलार्थः**- अजादौ प्रत्यये परे स्त्री-शब्दस्य 'इयङ्' आदेशो भवति । अनुबन्धेन 'इय्' इति अन्त्यादेशो विधीयते ।

स्त्री औ - स्त्र् इय् औ - स्त्रियौ । एवं जस्-प्रत्यये- स्त्रियः ।

### इयङादेशविधायकं विधिसूत्रम्

**वाम्शसोः ६ । ४ । ८० ॥**

**अमि शसि च स्त्रिया इयङ् वा स्यात् । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः । स्त्रिया । स्त्रियै । स्त्रियाः । परत्वान्नुट् । स्त्रीणाम् । स्त्रीषु ॥ श्रीः । श्रियौ । श्रियः ॥**

(अम्-शसोः, स्त्रियाः, वा, इयङ्)

**सरलार्थः**- अम्-शस्-प्रत्यययोः परयोः सत्योः स्त्री-शब्दस्य अन्त्यवर्णस्य स्थाने विकल्पेन 'इयङ्' आदेशो भवति । पूर्वसूत्रेण नित्यं प्राप्ते अनेन विकल्प्यते ।

स्त्री अम् - स्त्र् इय् अम् - स्त्रियम् । पक्षान्तरे पूर्वरूपे- स्त्रीम् । स्त्री शस् - स्त्री अस् - स्त्र् इय् अस् - स्त्रियस् - स्त्रियर् - स्त्रियः । पक्षान्तरे पूर्वसवर्णदीर्घे, रुत्वविसर्गौ- स्त्रीः । टादौ अजादिप्रत्यये तु पूर्वसूत्रेण नित्यं इयङादेशो भवति । नित्यं नदीसंज्ञकत्वात् ङिद्विभक्तिषु नदीसंज्ञाप्रयुक्तकार्याणि अपि जायन्ते । स्त्री ङे - स्त्री ए - स्त्री आ ए (आण्नद्याः) - स्त्री ऐ (आटश्च) - स्त्र् इय् ऐ (स्त्रियाः) - स्त्रियै ।

### नदीसंज्ञानिषेधकं विधिसूत्रम्

**नेयङुवङ्स्थानावस्त्री १ । ४ । ४ ॥**

**इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री । हे श्रीः । श्रियै, श्रिये । श्रियाः, श्रियः ॥**

(इयङ्-उवङ्-स्थानौ, यू, नदी, न, अस्त्री)

सरलार्थः- स्त्री-शब्दं विहाय अन्ये इयङ्-उवङादेशयोः स्थानिरूपेण अवस्थिता ईकारान्ताः, ऊकारान्ताश्च शब्दाः नदीसंज्ञका न भवन्ति । अनेन नित्यनदीसंज्ञाया निषेधे 'ङिति ह्रस्वश्च' इत्यनेन विकल्पेन नदीसंज्ञा विधीयते ।

लक्ष्मीवाचकस्य श्री-शब्दस्य अङ्यन्ततया प्रथमायाम्, सम्बोधने च सुप्रत्यये- श्रीः । अजादौ विभक्तौ 'अचि श्नुधातु...' इति इयङादेशो विधीयते । ङिद्विभक्तिषु वैकल्पिकनदीसंज्ञायाम् आडादिकमपि प्रवर्तन्ते । इयङ् तु उभयोः पक्षयोर्भवत्येव । आम्-प्रत्यये तु विशेष उच्यते-

## नदीसंज्ञाविधायकं विधिसूत्रम्

**वामि १ । ४ । ५ ॥**

**इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री । श्रीणाम्, श्रियाम् । श्रियाम्, श्रियि ॥ धेनुर्मतिवत् ॥**

(इयङ्-उवङ्-स्थानौ, यू, स्त्र्याख्यौ, आमि, नदी, वा, अस्त्री)

सरलार्थः- स्त्री-शब्दं विहाय अन्ये इयङ्-उवङादेशयोः स्थानिरूपेण अवस्थिता ईकारान्ताः, ऊकारान्ताश्च शब्दाः आम्-प्रत्यये परे विकल्पेन नदीसंज्ञका भवन्ति । अनेन नदीसंज्ञापक्षे परत्वाद् नुडागमो जायते, पक्षान्तरे तु नदीसंज्ञाभावे नुडागमस्य अप्राप्तौ इयङादेशो विधीयते ।

श्री आम् - श्री नाम् - श्रीनाम् - श्रीणाम् । नदीसंज्ञाभावे- श्री आम् - श्र् इय् आम् - श्रियाम् ।

गोर्वाचकस्य धेनुशब्दस्य सिद्धिः मतिवत्प्रक्रियया भवति । उकारान्तस्त्रीलिङ्गत्वात् 'ङिति ह्रस्वश्च' इत्यनेन विकल्पेन नदीसंज्ञायां मतिवत् कार्याणि प्रवर्तन्ते इत्यर्थः । नदीसंज्ञाभावपक्षे तु शस्-टाप्रत्ययौ विहाय अन्यत्र धेनुशब्दस्य रूपाणि शम्भुशब्दवद् जायन्ते ।

## तृज्वद्भावविधायकं विधिसूत्रम्

**स्त्रियां च ७ । १ । ९६ ॥**

**स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते ॥**

(स्त्रियाम्, क्रोष्टुः, तृज्वत्)

सरलार्थः- स्त्रीलिङ्गे क्रोष्टुशब्दस्य तृज्वद्भावो भवति । पुँल्लिङ्गे कासुचन विभक्तिषु एव लब्धतृज्वद्भावः शब्दोऽयं स्त्रीलिङ्गे सर्वासु विभक्तिषु क्रोष्टृरूपेण प्रयुज्यते ।

## ङीप्प्रत्ययविधायकं विधिसूत्रम्

**ऋन्नेभ्यो ङीप् ४ । १ । ५ ॥**

**ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात् । क्रोष्ट्री गौरीवत् ॥ भूः श्रीवत् ॥ स्वयम्भूः पुंवत् ॥**

(ऋत्-नेभ्यः, प्रातिपदिकात्, स्त्रियाम्, ङीप्, प्रत्ययः, परश्च)

सरलार्थः- ऋकारान्तात्, नकारान्तात् च प्रातिपदिकात् स्त्रीलिङ्गे ङीप्-प्रत्ययो भवति । ङीप्-प्रत्ययस्य ङकार-पकारौ इत्संज्ञकौ वर्तेते, तयोर्लोपे 'ई' इत्येव अवशिष्यते ।

क्रोष्टु-शब्दस्य स्त्रीलिङ्गे प्रयुज्यमाने 'स्त्रियां च' इत्यनेन तृज्वद्भावेन 'क्रोष्टृ' इत्यादेशे तस्मात् प्रकृतसूत्रेण ङीप्-प्रत्ययेऽनुबन्धलोपे 'क्रोष्टृ ई' इत्यवस्थायां यणि, वर्णयोगे 'क्रोष्ट्री' इति प्रातिपदिकात् सुब्विभक्तयो जायन्ते । अस्य ङचन्त-प्रातिपदिकस्य गौरीशब्दवत् प्रक्रियया रूपाणि निष्पद्यन्ते ।

## ङीप्प्रत्ययनिषेधकं विधिसूत्रम्

**न षट्स्वस्रादिभ्यः ४ ।१ ।१० ॥**

**ङीप्टापौ न स्तः ।**

**स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।**

**याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥**

**स्वसा । स्वसारौ ॥ माता पितृवत् । शसि मातॄः ॥ द्यौर्गोवत् ॥ राः पुंवत् ॥ नौर्ग्लौवत् ॥**

(षट्-स्वस्रादिभ्यः, ङ्याप्प्रातिपदिकात्, स्त्रियाम्, ङीप्, प्रत्ययः, न)

सरलार्थः- षट्-संज्ञकशब्देभ्यः, स्वस्रादि-शब्देभ्यश्च स्त्रीलिङ्गे ङीप्-टाप्-प्रत्ययौ न भवतः । प्रदत्तायां कारिकायां सप्त स्वस्रादिशब्दाः सङ्गृहीताः सन्ति । ते च स्वसृ, त्रि, चतुर्, ननान्दृ, दुहितृ, यातृ, मातृ । एतेषु त्रि-चतुर्शब्दौ विहाय सर्वे ऋकारान्ताः सन्ति । त्रि-चतुर्शब्दौ अपि स्त्रीलिङ्गे तिसृ, चतसृ इत्यादेशानान्तरम् ऋकारान्ता जायन्ते, परन्तु विशेषसिद्धिप्रक्रियायाः कारणेन तयोर्निरूपणं पूर्वमेव विहितम् । अनेन ङीप्-प्रत्ययस्य निषेधे कृते शस्-प्रत्ययं विहाय अन्यासु विभक्तिषु एतेषां रूपाणि ऋकारान्त-पुँल्लिङ्गवद् निष्पद्यन्ते । शस्-प्रत्यये तु नत्वाभावे विसर्गसहितं रूपं भवति ।

मातृ शस् - मातृ अस् - मातॄस् (प्रथमयोः पूर्वसवर्णः) - मातॄर् - मातॄः ।

## प्रयोगसिद्धिप्रकारः

**मत्याम्/मतौ**

मति-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण सप्तम्या एकवचने ङि-प्रत्ययेऽनुबन्धलोपे 'मति इ' इति जाते, 'ङिति ह्रस्वश्च' इत्यनेन प्रकृतेः विकल्पेन नदीसंज्ञायाम् 'इदुद्भ्याम्' इति सूत्रेण 'ङे' इत्यस्य आमादेशे 'मति आम्' इति जाते, स्थानिवत्वेन ङित्वाद् 'आण्नद्याः' इत्यनेन प्रत्ययस्य आडागमेऽनुबन्धलोपे 'मति आ आम्' इति जाते 'आटश्च' इत्यनेन वृद्धौ 'मति आम्' इति जाते, यणि, वर्णयोगे 'मत्याम्' इति रूपं सिद्धम् । नदीसंज्ञाभावे घिसंज्ञायम् 'घेर्ङिति' इत्यनेन अङ्गस्य गुणे प्राप्ते, तं बाधित्वा 'अच्च घेः' इति सूत्रेण प्रत्ययस्य स्थाने औकारादेशे, घिसंज्ञकस्य अङ्गस्य च अकारान्तादेशे कृते 'मत औ' इति जाते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ, औकार एकादेशे, वर्णयोगे 'मतौ' इति रूपं च साधु ।

### शब्द-रूपावलिः

| मति-शब्दस्य रूपाणि | | |
|---|---|---|
| मति | मती | मतयः |
| मतिम् | मती | मतीः |
| मत्या | मतिभ्याम् | मतिभिः |
| मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| मत्याः/मतेः | मत्योः | मतीनाम् |
| मत्याम्/मतौ | मत्योः | मतिषु |
| हे मते ! | हे मती ! | हे मतयः ! |

| गौरी-शब्दस्य रूपाणि | | |
|---|---|---|
| गौरी | गौर्यौ | गौर्यः |
| गौरीम् | गौर्यौ | गौरीः |
| गौर्या | गौरीभ्याम् | गौरीभिः |
| गौर्यै | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौर्योः | गौरीणाम् |
| गौर्याम् | गौर्योः | गौरीषु |
| हे गौरि ! | हे गौर्यौ ! | हे गौर्यः ! |

| मातृ-शब्दस्य रूपाणि | | |
|---|---|---|
| माता | मातरौ | मातरः |
| मातरम् | मातरौ | मातॄः |

**त्रि-शब्दस्य स्त्रीलिङ्गे रूपाणि**

तिस्रः

तिस्रः

| | |
|---|---|
| शेषं पितृवत् । | तिसृभिः<br>तिसृभ्यः<br>तिसृभ्यः<br>तिसृणाम्<br>तिसृषु |

## वाक्येषु प्रयोगानुशीलनम्

१. अहं मात्रा सह वन्दनां करोमि ।

२. विनाशकाले मनुष्यस्य मतिः विपरीता भवति ।

३. बुद्धिः एव बलवती भवति ।

४. मम पार्श्वे तिस्रः लेखन्यः विद्यन्ते ।

५. हे लक्ष्मीः ! मम दारिद्र्यम् अपसारय ।

६. अस्माकं गृहे प्रतिदिनं धेन्वाः पूजा भवति ।

## अभ्यासः

**२. सूत्राणाम् अर्थं विलिखत**

(क) त्रिचतुरोः स्त्रियां तिसृचतसृ (ख) न षट्स्वस्रादिभ्यः (ग) अचि र ऋतः

**३. परस्परं मेलयत**

| | |
|---|---|
| बुद्ध्यै | ङि |
| स्तुत्याम् | जस् |
| तिस्रः | ङे |
| स्वसुः | आम् |
| जरसा | सु |
| स्त्रीणाम् | टा |
| | ङस् |

**४. कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) 'मत्याम्' इत्यत्र ....... इति सूत्रेण आमादेशः । (ङेराम्नद्याम्नीभ्यः, इदुद्भ्याम्)

(ख) स्त्री-शब्दस्य नदीसंज्ञा .................... भवति । (नित्यम्, विकल्पेन)

(ग) आडागमः ..................... प्रवर्तते । (नदीसंज्ञायाम्, घिसंज्ञायाम्)

(घ) मति-शब्दस्य नदीसंज्ञा ..................... इत्यनेन भवति । (ङिति ह्रस्वश्च, यू स्त्र्याख्यौ नदी)

(ङ) लक्ष्मी-शब्दः ..................... विद्यते । (ङ्यन्तः, अङ्यन्तः)

(च) वृद्धि-शब्दः ..................... वर्तते । (मतिवत्, हरिवत्)

(छ) पतिशब्दः ..................... एव घिसंज्ञां लभते । (समासे, असमासे)

५. **अधस्तन-प्रयोगाणां वाक्ये प्रयोगं दर्शयत**

स्त्रियै, तिसृणाम्, ननान्दा, द्वे, जरा, मातरम्

६. **एकवाक्येन उत्तरं लिखत**

(क) श्री-शब्दस्य कोऽर्थः ?

(ख) 'वामि' इति सूत्रेण किं विधीयते ?

(ग) क्रोष्टु-शब्दस्य स्त्रीलिङ्गे केन सूत्रेण तृज्वद्भावः ?

(घ) क्रोष्ट्री-शब्दे कः स्त्रीप्रत्ययः अस्ति ?

(ङ) स्वसृ-शब्दस्य द्वितीयाबहुवचने किं रूपम् ?

७. **प्रश्नानाम् उत्तरं लिखत**

(क) 'ङिति ह्रस्वश्च' इत्यनेन केषां नदीसंज्ञा भवति ?

(ख) मतिशब्दस्य सत्यामपि घिसंज्ञायां नादेशाभावे कारणं किम् ?

(ग) हरि-मतिशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) द्वि-शब्दस्य स्त्रियां रमाशब्दवद् रूपाणि भवन्ति इत्यत्र कारणं किम् ?

(ङ) स्वस्रादयः शब्दाः के ?

८. **यातृ-नदी-स्त्रीशब्दानां सर्वाणि रूपाणि लिखत ।**

९. **अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत**

| | | |
|---|---|---|
| (क) मत्याः | (ख) स्त्रियम् | (ग) हे मातः |
| (घ) धेनूः | (ङ) श्रीणाम् | (ङ) गौर्याम् |

अजन्तप्रकरणे

# अवर्णान्तनपुंसकलिङ्गशब्दाः

**नपुंसकलिङ्गे प्रवर्तमानानि सामान्यकार्याणि-**

- अदन्तप्रातिपदिकाद् विहितयोः सु/अम्-प्रत्यययोः स्थाने 'अम्' आदेशः । (अतोऽम्)
- अदन्तभिन्नप्रातिपदिकाद् विहितयोः सु/अम्-प्रत्यययोः लुक् । (स्वमोर्नपुंसकात्)
- औ/औट्-प्रत्यययोः स्थाने 'शी' आदेशः । (नपुंसकाच्च)
- जस्/शस्-प्रत्यययोः स्थाने 'शि' आदेशः । (जश्शसोः शिः)
- शि-प्रत्ययस्य (जस्-शस्-प्रत्यययोः) सर्वनामस्थानसंज्ञा । (शि सर्वनामस्थानम्)
- दीर्घान्तप्रातिपदिकानां ह्रस्वः । (ह्रस्वो नपुंसके प्रातिपदिकस्य)
- प्रथमा-द्वितीयाविभक्त्योः समानरूपाणि ।
- तृतीयादिविभक्तिषु प्रायः शब्दानां पुँल्लिङ्गवद् रूपाणि ।
- अजादौ विभक्तौ प्रायशः इकारान्तप्रातिपदिकानां 'नुम्' आगमः । (इकोऽचि विभक्तौ)

## अमादेशविधायकं विधिसूत्रम्

**अतोऽम् ७ ।१ ।२४ ॥**

**अतोऽङ्गात् क्लीबात्स्वमोरम् । अमि पूर्वः । ज्ञानम् । एङ्ह्रस्वादिति हल्लोपः । हे ज्ञान ॥**

(अतः, नपुंसकात्, अङ्गात्, स्वमोः, आम्)

सरलार्थः- नपुंसकलिङ्गे विद्यमानाद् अकारान्ताद् अङ्गाद् विहितयोः सु-अम्-प्रत्यययोः स्थाने 'अम्' आदेशो भवति । 'स्वमोर्नपुंसकात्' इति सूत्रेण सर्वेभ्यो नपुंसकलिङ्गप्रातिपदिकेभ्यः परयोः सु-अम्-प्रत्यययोः लुकि प्राप्ते अदन्तशब्दानां विषये अनेन लुकं बाधित्वा अमादेशो विधीयते ।

बोधार्थको ज्ञान-शब्दो ज्ञा-धातोर्ल्युट्प्रत्ययेन निष्पन्नत्वात् नित्यं नपुंसकलिङ्गे प्रयुज्यते, तस्य च व्युत्पन्नपक्षे प्रातिपदिकसंज्ञायाम्- ज्ञान सु/अम् - ज्ञान अम् - ज्ञानम् (अमि पूर्वः) ।

### शी-आदेशविधायकं विधिसूत्रम्

**नपुंसकाच्च ७ ।१ ।१९ ॥**

**क्लीबादौङः शी स्यात् । भसंज्ञायाम् ॥**

(नपुंसकात्, अङ्गात्, औङः, शी)

सरलार्थः- नपुंसकलिङ्गे विद्यमानाद् अङ्गात् परयोः औ-औट्-प्रत्यययोः स्थाने 'शी' आदेशो भवति । 'ई' इत्येव अवशिष्यते । नपुंसकलिङ्गे सर्वत्रैव अस्य प्रसक्तिर्वर्तते ।

### अवर्ण-इवर्णयोर्लोपविधायकं विधिसूत्रम्

**यस्येति च ६ ।४ ।१४८ ॥**

**ईकारे तद्धिते च परे भस्येवर्णावर्णयोर्लोपः । इत्यल्लोपे प्राप्ते । वा.२४ (औङः श्यां प्रतिषेधो वाच्यः) । ज्ञाने ॥**

(भस्य, अङ्गस्य, यस्य, तद्धिते, ईति, च, लोपः) यस्य = इश्च अश्च यः तस्य, इवर्ण-अवर्णयोरित्यर्थः ।

सरलार्थः- तद्धितप्रत्यये परे, ईकारे परे च भसंज्ञकस्य अङ्गस्य अन्त्यस्य अवर्णस्य, इवर्णस्य च लोपो भवति । नपुंसकलिङ्गे औ-औट्-प्रत्यययोः सर्वनामस्थानभिन्नत्वात् तयोः प्रकृतेः 'यचि भम्' इति सूत्रेण भसंज्ञा भवति ।

औ-औट्-प्रत्यययोः स्थाने 'शी' इत्यादेशे कृते 'यस्येति च' इति सूत्रेण विधीयमानो लोपो न भवतीति वार्तिकार्थः । अनेन वार्तिकेन 'नपुंसकाच्च' इत्यनेन विहिते 'शी' इत्यस्य ईकारे परे 'यस्येति च' इत्यस्य प्रसक्तिः निषिध्यते । ततः अकार-ईकारयोः स्थाने गुणो भवति ।

ज्ञान औ - ज्ञान शी (नपुंसकाच्च) - ज्ञान ई - ज्ञान् ए (आद् गुणः) - ज्ञाने ।

### शि-आदेशविधायकं विधिसूत्रम्

**जश्शसोः शिः ७ ।१ ।२० ॥**

**क्लीबादनयोः शिः स्यात् ॥**

(नपुंसकात्, अङ्गात्, जस्-शसोः, शिः)

सरलार्थः- नपुंसकलिङ्गाद् अङ्गाद् उत्तरयोः जस्-शस्-प्रत्यययोः स्थाने 'शि' आदेशो भवति । सर्वादेशरूपेण विहितस्य 'शि' इत्यस्य शकारस्य इत्संज्ञायां लोपे 'इ' इति अवशिष्यते । अयमपि आदेशो नपुंसकलिङ्गे सर्वत्र भवति ।

### सर्वनामस्थानसंज्ञा-विधायकं सूत्रम्

**शि सर्वनामस्थानम् १ ।१ ।४२ ॥**

**शि इत्येतदुक्तसंज्ञं स्यात् ॥**

(शि, सर्वनामस्थानम्)

सरलार्थः- 'शि' इत्यस्य सर्वनामस्थान-संज्ञा भवति । 'शि' च पूर्वसूत्रेण नपुंसकलिङ्गे जस्-शस्प्रत्यययोः स्थाने विधीयते ।

### नुमागमविधायकं विधिसूत्रम्

**नपुंसकस्य झलचः ७ ।१ ।७२ ॥**

**झलन्तस्याजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने ॥**

(झलचः, नपुंसकस्य, सर्वनामस्थाने, नुम्)

सरलार्थः- सर्वनामस्थाने परे सति झलन्तस्य, अजन्तस्य च नपुंसकलिङ्ग-प्रातिपदिकस्य 'नुम्' आगमो भवति । अनुबन्धलोपेन 'न्' इत्येव अवशिष्यते । इकारान्तप्रातिपदिकेषु तु विधिरयं नुम्-विधायकेन 'इकोऽचि विभक्तौ' इति सूत्रेण बाध्यते ।

### आगमस्थाननिर्णय-परिभाषासूत्रम्

**मिदचोऽन्त्यात्परः १ ।१ ।४७ ॥**

**अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात् । उपधादीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं पुंवत् ॥ एवं धनवनफलादयः ॥**

(मित्, अन्त्यात्, अचः, परः)

सरलार्थः- मित् (म् इत् यस्य) आगमः स्थानिनः अन्त्यात् स्वरवर्णाद् अनन्तरं समुदायस्य एव अङ्गरूपेण तिष्ठति । टित्, कित्, मित् इति आगमेषु टित्-कितोर्विषये 'आद्यन्तौ टकितौ' इत्यनेन व्यवस्था कृता, अनेन च मिदागमस्य विषयो नियम्यते ।

ज्ञान जस्/शस् - ज्ञान अस् - ज्ञान शि (जश्शसोः शिः) - ज्ञान इ - ज्ञानन् इ (नपुंसकस्य भलचः) - ज्ञानान् इ (सर्वनामस्थाने चासम्बुद्धौ) - ज्ञानानि । सम्बोधने-

ज्ञान सु - ज्ञान अम् (अतोऽम्) - ज्ञानम् (अमि पूर्वः) - ज्ञान (एङ्ह्रस्वात् सम्बुद्धेः) - हे ज्ञान । तृतीयादिविभक्तौ नपुंसकलिङ्गे विशेषकार्याभावाद् एतासु विभक्तिषु नपुंसकलिङ्ग-प्रातिपदिकानां रूपाणि पुँल्लिङ्गवदेव जायन्ते । ज्ञान-शब्दस्य अपि अदन्ततया रामवत्-ज्ञानेन, ज्ञानाभ्याम्, ज्ञानैः इत्यादीनि रूपाणि जायन्ते ।

## अद्डादेशविधायकं विधिसूत्रम्

**अद्ड्डतरादिभ्यः पञ्चभ्यः ७ ।१ ।२५ ॥**

**एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात् ॥**

(डतरादिभ्यः, पञ्चभ्यः, अङ्गात्, स्वमोः, अद्ड्)

सरलार्थः- नपुंसकलिङ्गे डतर-प्रत्ययान्तशब्देभ्यः, डतम-प्रत्ययान्तशब्देभ्यः, अन्य-अन्यतर-इतर-शब्देभ्यश्च सु/अम्-प्रत्यययोः स्थाने 'अद्ड्' इति आदेशो भवति । डकारस्य इत्संज्ञायाम् 'अद्' इति अवशिष्यते, डित्वविधानाद् अङ्गस्य टिभागस्य लोपो भवति । सूत्रमिदम् 'अतोऽम्' इति सूत्रेण प्राप्तम् अमादेशं बाधते ।

## टिलोपविधायकं विधिसूत्रम्

**टेः ६ । ४ ।१४३ ॥**

**डिति भस्य टेर्लोपः । कतरत्, कतरद् । कतरे । कतराणि । हे कतरत् । शेषं पुंवत् । एवं कतमत् । इतरत् । अन्यत् । अन्यतरत् । अन्यतमस्य त्वन्यतममित्येव ।**

(भस्य, टेः, डिति, लोपः)

सूत्रार्थः डकार इत् यस्य स डित् । डित्-प्रत्यये परे सति भसंज्ञकस्य अङ्गस्य टिभागस्य लोपो भवति । अत्र स्मर्तव्यं यत्- यदि कस्मिँश्चित् प्रत्यये डकार इत्संज्ञकोऽस्ति, तस्य अन्यत् किमपि प्रयोजनं च नास्ति, तर्हि तस्मिन् प्रत्यये परे असत्यामपि भसंज्ञायाम् अनेन सूत्रेण अङ्गस्य टिलोपो भवति ।

कतर सु/अम् - कतर अद्ड् (अद्ड्डतरादिभ्यः पञ्चभ्यः) - कतर अद् - कतर् अद् (टेः) - कतरद् - कतरत् (वाऽवासाने) । चर्त्वाभावे- कतरद् ।

एवंरीत्या अन्य-कतम-यतम-यतरादीनामपि अन्यत्, कतमत्, यतमत्, यतरत् इत्यादीनि रूपाणि भवन्ति । एकतरशब्दस्य तु-

**वा.२५ (एकतरात्प्रतिषेधो वक्तव्यः) । एकतरम् ॥**

सरलार्थः- एकतर-शब्दाद् विहितयोः सु-अम्प्रत्यययोः स्थाने अद्डादेशो न भवति । अनेन अद्डादेशनिषेधे ज्ञानवद् यथा-

एकतर सु/अम् - एकतर अम् (अतोऽम्) - एकतरम् (अमि पूर्वः) ।

## ह्रस्वविधायकं विधिसूत्रम्

**ह्रस्वो नपुंसके प्रातिपदिकस्य १ । २ । ४७ ॥**

**अजन्तस्येत्येव । श्रीपं ज्ञानवत् ॥**

(नपुंसके, प्रातिपदिकस्य, ह्रस्वः)

सरलार्थः- नपुंसकलिङ्गे वर्तमानस्य अजन्त-प्रातिपदिकस्य अन्त्यवर्णस्य स्थाने ह्रस्वादेशो भवति । अनेनैव सूत्रेण सर्वे अजन्तनपुंसकलिङ्गप्रातिपदिका ह्रस्वान्ता भवन्ति ।

श्रियं पातीति विग्रहे निष्पन्नस्य श्रीपा-प्रातिपदिकस्य नपुंसकप्रयोगे अनेन सूत्रेण ह्रस्वान्तादेशे आकारस्य अकारे 'श्रीप' इति जाते, तस्मात् सुप्रत्यये, अम्-प्रत्यये च ज्ञानवत्- श्रीपम् ।

श्रीपा सु/अम् - श्रीप सु/अम् - श्रीप अम् - श्रीपम् ।

### प्रयोगसिद्धिप्रकारः

**ज्ञानानि**

ज्ञान-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया बहुवचने जस्-प्रत्ययेऽनुबन्धलोपे 'ज्ञान जस्' इति जाते 'जश्शसोः शिः' इति सूत्रेण 'जस्' इत्यस्य स्थाने 'शि' इत्यादेशेऽनुबन्धलोपे 'ज्ञान इ' इति जाते 'शि सर्वनामस्थानम्' इत्यनेन 'शि' इत्यस्य सर्वनामस्थानसंज्ञायाम् 'नपुंसकस्य झलचः' इति सूत्रेण अङ्गस्य नुमागमेऽनुबन्धलोपे, मित्वाद् अन्त्यादचोऽकारस्य परावयवत्वे 'ज्ञानन् इ' इति जाते 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण उपधाया अकारस्य दीर्घे 'ज्ञानान् इ' इति जाते, वर्णसम्मेलने 'ज्ञानानि' इति रूपं सिद्धम् ।

### शब्द-रूपावलिः

**ज्ञान-शब्दस्य पुँल्लिङ्गे रूपाणि**

| | | |
|---|---|---|
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| ज्ञानात्-द् | ज्ञानाभ्याम् | ज्ञानेभ्यः |

| | | |
|---|---|---|
| ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| ज्ञाने | ज्ञानयोः | ज्ञानेषु |
| हे ज्ञान ! | हे ज्ञाने ! | हे ज्ञानानि ! |

**सर्व-शब्दस्य नपुंसकलिङ्गे रूपाणि**

| | | |
|---|---|---|
| सर्वम् | सर्वे | सर्वाणि |
| सर्वम् | सर्वे | सर्वाणि |

शेषरूपाणि पुँल्लिङ्गवद् भवन्ति ।

**कतर-शब्दस्य नपुंसकलिङ्गे रूपाणि**

| | | |
|---|---|---|
| कतरत्-द् | कतरे | कतराणि |
| कतरत्-द् | कतरे | कतराणि |
| (शेषं पुंवत्) | | |
| हे कतरत्-द् ! | हे कतरे ! | हे कतराणि ! |

**वाक्येषु प्रयोगानुशीलनम्**

१. ज्ञानेन विना जीवनमन्धकारमयं भवति ।

२. विज्ञानाद् ज्ञानं श्रेष्ठतरं वर्तते ।

३. उद्याने पुष्पाणि विकसितानि सन्ति ।

४. सर्वं जगद् ईश्वरेण व्याप्तं विद्यते ।

५. अहं प्रातः पठनाद् अन्यत् कार्यं न करोमि ।

६. तव सर्वाणि मित्राणि शिक्षितानि सन्ति ।

७. मित्र ! मह्यं त्रीणि पुस्तकानि यच्छ ।

८. अहं प्रतिदिनं द्वे फले खादामि ।

## अभ्यासः

१. **सूत्राणामर्थं लिखित्वा कक्षायां श्रावयत**

(क) अतोऽम्

(ख) शि सर्वनामस्थानम्

(ग) यस्येति च

(घ) नपुंसकाच्च

(ङ) जश्शसोः शिः

२. **परस्परं मेलयत**

| | |
|---|---|
| अतोऽम् | शि |
| यचि भम् | सर्वनामस्थानम् |
| अमि पूर्वः | भसंज्ञा |
| नपुंसकाच्च | शी |
| शि सर्वनामस्थानम् | अम् |
| जश्शसोः शिः | पूर्वरूपम् |

३. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) नपुंसकलिङ्गे प्रथमा-द्वितीयाविभक्त्यो रूपाणि ...... भवन्ति । (भिन्नानि, समानानि)

(ख) 'टेः' इति सूत्रेण ............ क्रियते । (टिलोपः, अन्त्यवर्णलोपः)

(ग) अदन्त-नपुंसकलिङ्गाद् विहितस्य सु-प्रत्ययस्य ....... भवति । (लुक्, अमादेशः)

(घ) .............. इत्यस्य सर्वनामस्थानसंज्ञा भवति । (शि, शी)

(ङ) नपुंसके सुप्रत्ययस्य सर्वनामस्थानसंज्ञा ............... । (भवति, न भवति)

(च) ..................... इति शब्दस्य अद्‌डादेशो न भवति । (कतर, एकतर)

(छ) श्रीपा-शब्दस्य नपुंसकलिङ्गे प्रथमैकवचने ..... रूपं भवति । (श्रीपम्, श्रीपाम्)

५. **वाक्येषु योजयत**

फलानि, वनम्, मित्रे, ज्ञानम्, पुस्तकम्, भवनम्

६. **एकवाक्येन उत्तरं लिखत**

(क) 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन किं क्रियते ?

(ख) 'ज्ञानम्' इत्यत्र पूर्वरूपविधायकं सूत्रं किम् ?

(ग) नपुंसके जस्-प्रत्ययस्य स्थाने किमादिश्यते ?

(घ) नपुंसकलिङ्गे कुत्र 'शी' आदेशो भवति ?

(ङ) कतम-शब्दस्य नपुंसकलिङ्गे प्रथमैकवचने किं रूपम् ?

(च) 'अतोऽम्' इति सूत्रं कस्य अपवादः ?

(छ) 'ज्ञान औ' इत्यत्र अकारलोपः केन निषिद्धः ?

७. **प्रश्नानाम् उत्तरं लिखत**

(क) नपुंसकलिङ्गे प्रवर्तमानानि सामान्यकार्याणि कानि ?

(ख) नपुंसकलिङ्गे प्रथमायां केषां सर्वनामशब्दानां रूपाणि सर्वशब्दात् पृथग् भवन्ति ?

(ग) राम-ज्ञानशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) नपुंसके दीर्घान्तशब्दा न भवन्ति इत्यत्र कारणं किम् ?

(ङ) डतरादयः पञ्च के सन्ति ? तेषु कति प्रत्ययाः कति च प्रातिपदिकानि ?

८. **मित्र-शब्दस्य रूपाणि लिखत ।**

९. **प्रयोगाणां सिद्धिपथं दर्शयत**

(क) हे ज्ञान (ख) ज्ञानम् (ग) कतरत्

(घ) एकतरम् (ङ) श्रीपम्

अजन्तप्रकरणे

# इकारान्तादि-नपुंसकलिङ्ग-शब्दाः

## स्वमोर्लुग्विधायकं विधिसूत्रम्

**स्वमोर्नपुंसकात् ७ । १ । २३ ॥**

**लुक् स्यात् । वारि ॥**

(नपुंसकात्, अङ्गात्, सु-अमोः, लुक्)

सरलार्थः- नपुंसकलिङ्गे विद्यमानाद् अङ्गात् परयोः सु-अम्-प्रत्यययोः लुक् भवति । अकारान्तप्रातिपदिकं विहाय सर्वेषु नपुंसकलिङ्गप्रातिपदिकेषु अस्य विधेः प्रवृत्तिः भवति । अनेन लुकि कृते 'न लुमताङ्गस्य' इत्यनेन अङ्गकार्यं निषिध्यते ।

जलस्य वाचको वारि-शब्दो नित्यं नपुंसकलिङ्गे प्रयुज्यते, तस्य च अव्युत्पन्नपक्षे प्रातिपदिकसंज्ञा भवति ।

वारि सु/अम् - वारि (अनेन स्वमोर्लुकि) ।

## नुमागमविधायकं विधिसूत्रम्

**इकोऽचि विभक्तौ । ७ । १ । ७३ ।**

**इगन्तस्य क्लीबस्य नुमचि विभक्तौ । वारिणी । वारीणि । न लुमतेत्यस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुणः । हे वारे, हे वारि । आङो ना । वारिणा । घेर्ङितीति गुणे प्राप्ते । वा.२६ (वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन) । वारिणे । वारिणः । वारिणोः । नुमचिरेति नुट् । वारीणाम् । वारिणि । हलादौ हरिवत् ॥**

(इकः, नपुंसकस्य, अचि, विभक्तौ, नुम्)

सरलार्थः- अजादौ विभक्तौ परे नपुंसकलिङ्गे वर्तमानस्य इगन्त-प्रातिपदिकस्य नुम् आगमो भवति । इक् अन्ते यस्य स इगन्तः, इ-उ-ऋ-लृवर्णान्त इत्यर्थः । जस्-शस्प्रत्यययोरपि 'नपुंसकस्य झलचः' इति सूत्रं बाधित्वा अनेनैव नुमागमो बोध्यः । तथा च औत्व-गुण-वृद्धि-तृज्वद्भावैः सह विरोधे सति अनेन नुम् भवति । नाभावेन, नुडागमेन च सह विरोधे तु विधिरयं न प्रवर्तते ।

वारि औ/औट् - वारि शी (नपुंसकाच्च) - वारि ई - वारिन् ई (अनेन नुम्) - वारिनी - वारिणी (अट्कुप्वाङ्नुम्व्यवायेऽपि) । वारि जस्/शस् - वारि अस् - वारि शि (जश्शसोः शिः) - वारि इ - वारिन् इ (इकोऽचि विभक्तौ) - वारीन् इ (सर्वनामस्थाने चासम्बुद्धौ) - वारीनि - वारीणि (अट्कुप्वाङ्नुम्व्यवायेऽपि) ।

सम्बोधनैकवचने तु 'स्वमोर्नपुंसकात्' इत्यनेन सोर्लुकि प्रत्ययलक्षणमाश्रित्य 'ह्रस्वस्य गुणः' इत्यनेन गुणे प्राप्ते 'न लुमताङ्गस्य' इत्यनेन तन्निषेधे 'हे वारि' इति रूपम् । 'इकोऽचि विभक्तौ' इति सूत्रे 'अचि' इति ग्रहणेन 'न लुमताङ्गस्य' इत्यस्य अनित्यत्वज्ञापनाद् लुमता शब्देन प्रत्यये लुप्तेऽपि एकस्मिन् पक्षे अङ्गकार्यं स्वीक्रियते, अतः अङ्गकार्यनिषेधाभावपक्षे इकारस्य सम्बुद्धिनिमित्तके गुणे 'हे वारे' इत्यपि रूपं सिद्ध्यति ।

टाविभक्तौ वारि-शब्दस्य घिसंज्ञायां नुमागमं बाधित्वा नाभावः क्रियते । यथा-

वारि टा - वारि आ - वारि ना (आङो नाऽस्त्रियाम्) - वारिना - वारिणा ।

ङिद्विभक्तिषु 'घेर्ङिति' इति गुणेन सह नुमागमस्य विरोधे, परत्वाद् गुणे प्राप्ते वार्तिकम् आह - 'वृद्धौत्व.....' इति । वृद्धिः, औत्वम्, तृज्वद्भावः, गुणः इति एतेषु प्राप्तेषु पूर्वविप्रतिषेधेन नुमागमः कर्तव्यः इति वार्तिकार्थः ।

वारि ङे - वारि ए - वारिन् ए (वृद्धौत्व...., इकोऽचि विभक्तौ) - वारिने - वारिणे । एवमेव अन्यासु ङिद्विभक्तिषु अपि बोध्यम् । ओस्-प्रत्यये अनेन नुमि- वारिणोः ।

आम्-प्रत्यये नुडागमेन सह अस्य विप्रतिषेधे 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकबलेन 'ह्रस्वनद्यापो नुट्' इति नुडागमो भवति । तत्र नुम्करणे, नुट्करणे च अङ्ग-प्रत्यययोर्मध्ये नकारस्य एव प्रवेशात् किमर्थं नुड् इति जिज्ञासायाम् अङ्गस्य नुम्करणे नाम्परत्वाभावात् 'नामि' इत्यनेन दीर्घस्य अप्राप्तौ 'वारिणाम्' इति अनिष्टरूपापत्तिरिति ज्ञेयम् ।

वारि आम् - वारि नाम् (नुमचिर......, ह्रस्वनद्यापो नुट्) - वारी नाम् (नामि) - वारीनाम् - वारीणाम् । हलादौ विभक्तौ वारिशब्दस्य रूपाणि हरिवत् सिद्ध्यन्ति ।

### अनङादेशविधायकं विधिसूत्रम्

**अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७ ।१ ।७५ ॥**

**एषामनङ् स्याट्टादावचि ॥**

(अस्थि-दधि-सक्थि-अक्ष्णाम्, तृतीयादिषु, अचि, अनङ्, उदात्तः)

सरलार्थः- तृतीयादिषु अजादौ विभक्तौ परतः अस्थि, दधि, सक्थि, अक्षि इति चतुर्णां शब्दानाम् अन्त्यवर्णस्य स्थाने 'अनङ् (अन्) आदेशो भवति, स च अनङ् उदात्तस्वरवान् च

भवति । अनुबन्धेन 'अन्' इति अवशेषः, ङित्वाद् अन्त्यवर्णस्य (इकारस्य) अयम् आदेशः । उदात्तानुदात्तस्वरितानाम् अभ्यासः सम्प्रति वैदिकभाषायाम् एव विद्यते, लौकिकभाषायां तु लुप्तप्रायो दृश्यते । विधिरयं नुम्-नुट्-नाभावानाम् अपवादो वर्तते । अनेन विहितस्य अन् इत्यस्य अकारस्य आगामिसूत्राभ्यां लोपो भवति ।

### अकारलोपविधायकं विधिसूत्रम्

**अल्लोपोऽनः ६ । ४ । १३४ ॥**

**अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः । दध्ना । दध्ने । दध्नः । दध्नोः । दध्नोः । दध्नाम् ॥**

(अनः, भस्य, अङ्गस्य, अत्-लोपः)

सरलार्थः- सर्वनामस्थानभिन्ने यकारादौ, अजादौ च स्वादिप्रत्यये परे सति भसंज्ञकस्य अङ्गस्य अन्ते स्थितस्य 'अन्' इत्यस्य अकारस्य लोपो भवति ।

दधि-शब्दस्य प्रथमा-द्वितीययोः वारिवत् रूपाणि भवन्ति - दधि, दधिनी, दधीनि । टाप्रत्यये- दधि टा - दधि आ - दधन् आ (अस्थिदधि....) - दध् न् आ (अल्लोपोऽनः) - दध्ना । एवमेव दध्ने, दध्नः, दध्नः, दध्नोः, दध्नाम् इति रूपाणि जायन्ते । ङिप्रत्यये-

### अकारलोपविधायकं सूत्रम्

**विभाषा ङिश्योः ६ । ४ । १३६ ॥**

**अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः । दध्नि, दधनि । शेषं वारिवत् ॥ एवमस्थिसक्थ्यक्षीणि ॥ सुधि । सुधिनी । सुधीनि । हे सुधे, हे सुधि ॥**

(अनः, भस्य, अङ्गस्य, अत्, ङिश्योः, विभाषा, लोपः)

सरलार्थः- सर्वनामस्थानभिन्नेषु यकारादिषु, अजादिषु च स्वादिप्रत्ययेषु ङि-शी-प्रत्यययोः परयोः सत्योः भसंज्ञकस्य अङ्गस्य अन्ते स्थितस्य 'अन्' इत्यस्य अकारस्य विकल्पेन लोपो भवति ।

दधि ङि - दधि इ - दधन् इ (अस्थिदधि....) - दध् न् इ (विभाषा ङिश्योः) - दध्नि । अलोपाभावपक्षे- दधिनि । अनया एव प्रक्रियया अस्थि-सक्थि-अक्षिशब्दानामपि अस्थ्ना, सक्थ्ना, अक्ष्णा इत्यादीनि दधिवदेव रूपाणि जायन्ते । सुधी-प्रातिपदिकस्य नपुंसके प्रयोगे प्रातिपदिकस्य ह्रस्वे कृते सुधि-शब्दस्य वारिवत् रूपाणि ज्ञेयानि ।

## पुंस्त्व-अतिदेशसूत्रम्

**तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ७ । १ । ७४ ॥**

**प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि । सुधिया, सुधिनेत्यादि ॥ मधु । मधुनी । मधूनि । हे मधो, हे मधु ॥ सुलु । सुलुनी । सुलूनि । सुलुनेत्यादि ॥ धातृ । धातृणी । धातॄणि । हे धातः, हे धातृ । धातॄणाम् ॥ एवं ज्ञात्रादयः ॥**

(भाषितपुंस्कस्य, नपुंसकस्य, इकः, अङ्गस्य, तृतीयादिषु, अचि, विभक्तौ, पुंवत्, गालवस्य । गालवस्य = गालवनामकस्य ऋषेर्मते, विकल्पेन इत्यर्थः)

**सरलार्थः**- तृतीयादिषु अजादिषु प्रत्ययेषु परेषु नपुंसकलिङ्गे प्रयुज्यमानानाम् इगन्तानां भाषितपुंस्क-प्रातिपदिकानां विकल्पेन पुंवद्भावो भवति । भाषितपुंस्कः = ये शब्दाः पुँल्लिङ्ग-नपुंसकलिङ्गयोः समानेऽर्थे प्रयुज्यन्ते ते भाषितपुंस्क-शब्देन व्यवह्रियन्ते । यथा- कर्तृ, धातृ आदयः सर्वे तृच्-तृन्-प्रत्ययान्ताः शब्दाः पुं-नपुंसकलिङ्गयोः समानार्थे प्रयुज्यन्ते, अतः एते भाषितपुंस्काः कथ्यन्ते । एतेषां पुंवद्भावस्य चिन्तनं गालवेन कृतम्, न तु पाणिनिना इति कृत्वा विधिरयं वैकल्पिको वर्तते ।

कृतह्रस्वस्य सुधि-प्रातिपदिकस्य भाषितपुंस्कत्वात् टा-प्रत्यये अनेन विकल्पेन पुंवद्भावे पुँल्लिङ्ग-सुधीशब्दवत् 'सुधिया' इति रूपम्, पुंवद्भावाभावपक्षे तु वारिवत् 'सुधिना' इति । एवं ङे, ङसि इत्यादिषु अपि बोध्यम् ।

मधु-शब्दस्य वारिवत् प्रक्रियया सिद्धिर्जायते । सुलू-शब्दस्य नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वे सुलु-शब्दस्य अपि मधुवत् प्रक्रिया बोद्धव्या ।

धातृ सु/अम् - धातृ (स्वमोर्नपुंसकात्) । धातृ औ/औट् - धातृ शी (नपुंसकाच्च) - धातृ ई - धातृन् ई (इकोऽचि विभक्तौ) - धातृनी - धातृणी (ऋवर्णान्नस्य णत्वं वाच्यम्) । धातृ जस्/शस् - धातृ शि (जश्शसोः शिः) - धातृ इ - धातृन् इ (इकोऽचि विभक्तौ) - धातॄन् इ (सर्वनामस्थाने चासम्बुद्धौ) - धातॄनि - धातॄणि (ऋवर्णान्नस्य णत्वं वाच्यम्) । सम्बोधने- धातृ सु - धातृ स् - धातृ (स्वमोर्नपुंसकात्) - 'न लुमताङ्गस्य' इत्यस्य अनित्यत्वपक्षे- धातर् (ह्रस्वस्य गुणः) - धातः - हे धातः । पक्षान्तरे- हे धातृ । भाषितपुंस्कत्वात् टादौ अचि पुंवद्भावपक्षे पुँल्लिङ्गधातृवत्, पक्षान्तरे च नुमागमस्य प्रक्रिया अवलम्बनीया । आम्-प्रत्यये तु उभयोरपि पक्षयोः समानप्रक्रिया भवति । एवं ज्ञातृ, कर्तृ इत्यादीनां शब्दानामपि रूपाणि निष्पद्यन्ते ।

### ह्रस्वादेशनियमाकं-परिभाषासूत्रम्

**एच इग्घ्रस्वादेशे १ ।१ ।४८ ॥**

**आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात् । प्रद्यु । प्रद्युनी । प्रद्यूनि । प्रद्युनेत्यादि ॥ प्ररि । प्ररिणी । प्ररीणि । प्ररिणा । एकदेशविकृतमनन्यवत् । प्रराभ्याम् । प्ररीणाम् ॥ सुनु । सुनुनी । सुनूनि । सुनुनेत्यादि ॥**

(एचः, ह्रस्वादेशे, इक्)

सरलार्थः- एच्-वर्णानां स्थाने ह्रस्वादेशे क्रियमाणे इक्-वर्णा एव भवन्ति । अकारो न भवति इत्यर्थः । ए, ओ, ऐ, औ इत्येतेषां वर्णानां ह्रस्वे आदिश्यमाने ह्रस्वसंज्ञकेषु अ, इ, उ, ऋ, लृ इत्येतेषु वर्णेषु अकारं विहाय अन्ये वर्णा आन्तरतम्याद् विधातव्या इति सूत्रस्य आशयः । तेन तालुस्थानसाम्यात् एकार-ऐकारयोः ह्रस्वे इकारः, ओष्ठस्थानसाम्यात् च ओकार-औकारयोः स्थाने उकारो विधीयेते ।

ओकारान्तस्य प्रद्यो-शब्दस्य नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वे उकारान्तादेशे 'प्रद्यु' इत्यस्य मधुवद् रूपाणि जायन्ते । प्रै-शब्दस्य ह्रस्वे इकारान्तादेशे 'प्ररि' इति शब्दो अजादौ विभक्तौ वारिवत् रूपाणि लभते । हलादौ तु तस्य 'एकदेशविकृतमनन्यवत्' इति न्यायेन रै-शब्दवदेव व्यवहारे 'रायो हलि' इत्यनेन आकारान्तादेशे प्रराभ्याम् इत्यादि रूपाणि भवन्ति । औकारान्तस्य सुनौ-शब्दस्य ह्रस्वे उकारान्तादेशे सुनु-शब्दो मधुवत् प्रक्रियया सिद्ध्यति ।

**प्रयोगसिद्धिप्रकारः**

**वारिणे**

वारि-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण चतुर्थ्या एकवचने ङे-प्रत्ययेऽनुबन्धलोपे 'हरि ए' इति जाते 'शेषो घ्यसखि' इति सूत्रेण प्रकृतेर्घिसंज्ञायाम् 'घेर्ङिति' इत्यनेन अङ्गस्य गुणे प्राप्ते, 'इकोऽचि विभक्तौ' इति सूत्रेण अङ्गस्य नुमागमे च प्राप्ते, परत्वाद् नुमं बाधित्वा गुणे प्राप्ते 'वृद्धौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' इति वार्तिकेन पूर्वस्य विप्रतिषेधेन नुमागमे कृते, मित्वाद् अन्त्यादच इकारस्य परावयवत्वे 'वारिन् ए' इति जाते, वर्णयोगे, नकारस्य णत्वे 'वारिणे' इति रूपं सिद्धम् ।

## शब्द-रूपावलिः

| वारि-शब्दस्य रूपाणि | | |
|---|---|---|
| वारि | वारिणी | वारीणि |
| वारि | वारिणी | वारीणि |
| वारिणा | वारिभ्याम् | वारिभिः |
| वारिणे | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिणोः | वारीणाम् |
| वारिणि | वारिणोः | वारिषु |
| हे वारे/हे वारि ! | हे वारिणी ! | हे वारीणि ! |

| दधि-शब्दस्य रूपाणि | | |
|---|---|---|
| दधि | दधिनी | दधीनि |
| दधि | दधिनी | दधीनि |
| दध्ना | दधिभ्याम् | दधिभ्यः |
| दध्ने | दधिभ्याम् | दधिभ्यः |
| दध्नः | दधिभ्याम् | दधिभ्यः |
| दध्नः | दध्नोः | दध्नाम् |
| दध्नि/दधिनि | दध्नोः | दधिषु |
| हे दधे !/हे दधि | हे दधिनी ! | हे दधीनि ! |

### धातृ-शब्दस्य नपुंसकलिङ्गे रूपाणि

| | | |
|---|---|---|
| धातृ | धातृणी | धातॄणि |
| धातृ | धातृणी | धातॄणि |
| धात्रा/धातृणा | धातृभ्याम् | धातृभिः |
| धात्रे/धातृणे | धातृभ्याम् | धातृभ्यः |
| धातुः/धातृणः | धातृभ्याम् | धातृभ्यः |
| धातुः/धातृणः | धात्रोः/धातृणोः | धातॄणाम् |
| धातरि/धातृणि | धात्रोः/धातृणोः | धातृषु |
| हे धातः/हे धातृ ! | हे धातृणी ! | हे धातॄणि ! |

### वाक्येषु प्रयोगानुशीलनम्

१. अहं प्रातः ईषदुष्णं वारि पिबामि ।

२. दध्ना संस्कृतं भोजनं मह्यं रोचते ।

३. वयं अक्षिभ्यां पश्यामः ।

४. धातृणे नमः ।

५. मधुमक्षिकाभिः बहूनि मधूनि सञ्चितानि सन्ति ।

६. अहं सुधिया मित्रेण परामृष्टः ।

७. दधीचिः अस्थ्नः दानेन लोकोपकारम् अकरोत् ।

## अभ्यासः

१. **सूत्राणां कार्यं निर्दिशत**

(क) स्वमोर्नपुंसकात् (ख) इकोऽचि विभक्तौ

(ग) अल्लोपोऽनः (घ) एच इग्घ्रस्वादेशे

(ङ) तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य

२. **परस्परं मेलयत**

| | |
|---|---|
| वारीणाम् | पुंवद्भावः |
| सुधि | नुट् |
| धात्रे | नुम् |
| मधुनः | गुणः |
| हे धातः | वृद्धिः |
| अक्षि | ह्रस्वः |
| दध्नोः | अनङ् |
| | लुक् |

३. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) नपुंसकलिङ्गे प्रातिपदिकानाम् ..................... भवति । (ह्रस्वः, दीर्घः)

(ख) 'वारीणि' इत्यत्र ..................... इत्यनेन नुम् भवति । (नपुंसकस्य झलचः, इकोऽचि विभक्तौ)

(ग) आमि नुम्नुटोः ..................... जायते । (नुम्विधिः, नुड्विधिः)

(घ) नुम्-गुणयोरेकत्र प्राप्तौ ..................... कर्तव्यः । (नुम्, गुणः)

(ङ) 'स्वमोर्नपुंसकात्' इत्यनेन ..................... शब्दाद् विहितयोः स्वमोर्लुग्भवति । (अदन्तात्, अदन्तभिन्नात्)

(च) नुमागमः ..................... अङ्गस्य भवति । (अदन्तस्य, इगन्तस्य)

४. **अधस्तन-प्रयोगाणां प्रातिपदिक-लिङ्ग-विभक्तीर्निर्दिशत**

सरस्वत्याम्, शम्भुना, मधुनी, लताभिः, अक्ष्णा, बालाय

५. **एकवाक्येन उत्तरं लिखत**

(क) नपुंसकप्रातिपदिकानां ह्रस्वः केन भवति ?

(ख) 'अतोऽम्', 'स्वमोर्नपुंसकात्' इत्यनयोरेकत्र प्राप्तौ किं प्रवर्तते ?

(ग) 'वारिणा' इत्यत्र नकारः कुत आगतः ?

(घ) दधि-शब्दस्य घिसंज्ञा भवति न वा ?

(ङ) सक्थि-शब्दस्य तृतीयैकवचने किं रूपम् ?

(च) ऐकारस्य ह्रस्वे कृते को वर्ण आदिश्यते ?

(छ) क्लीब-शब्दस्य कोऽर्थः ?

(ज) सुनौ-शब्दस्य नपुंसकलिङ्गे पुंवद्भावो भवति न वा ?

(झ) 'हे वारे' इत्यत्र गुणविधायकं सूत्रं किम् ?

६. **प्रश्नानाम् उत्तरं लिखत**

(क) 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इति सूत्रे कति शब्दा निर्दिष्टाः सन्ति ?

(ख) दधि-शब्दस्य अनङादेशः कासु विभक्तिषु विधीयते ?

(ग) वारि-दधिशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) मधु-शब्दस्य रूपसिद्धिप्रक्रिया कुत्र कुत्र शम्भुशब्दसदृशा विद्यते ?

(ङ) एकारस्य ह्रस्वादेशे अकारः कथं न भवति ?

(च) वारि-शब्दः कुत्र कुत्र नुमागमो लभते ?

(छ) भाषितपुंस्क-पदेन किं बोध्यते ?

(ज) 'वृद्धौत्व.....' इति वार्तिकस्य अर्थं लिखत ।

७. **सुधी-शब्दस्य नपुंसकलिङ्गे रूपाणि लिखत ।**

८. **अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत**

(क) वारीणि (ख) दध्ना (ग) सुधिना

(घ) धातृणे (ङ) वारीणाम् (ङ) मधु

षड्विंशः पाठः

हलन्तपुँल्लिङ्गप्रकरणे

# हकारान्तेषु लिहादिशब्दाः

## ढकारादेशविधायकं विधिसूत्रम्

**हो ढः ८ । २ । ३१ ॥**

**हस्य ढः स्याज्झलि पदान्ते च । लिट्, लिड् । लिहौ । लिहः । लिड्भ्याम् । लिट्त्सु, लिट्सु ॥**

(हः, ढः, **झलि, पदस्य, अन्ते**)

सरलार्थः- हकारस्य स्थाने ढकारादेशो भवति झलि परे पदान्ते च । पदान्ते उदाहरणं 'लिट्' इति । अत्र हि लिह्धातोः क्विपि सर्वापहारिलोपे कृदन्तत्वात्प्रातिपदिकसंज्ञायां लिह्शब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'लिह् स्' इति जाते सकारस्य 'हल्ङ्याब्भ्यो...' इत्यादिना सूत्रेण लोपे 'लिह्' इत्यवस्थायां अनेन सूत्रेण हकारस्य ढकारादेशे जश्त्वेन डकारे तस्य 'वाऽवसाने' इति सूत्रेण विभाषया चर्त्वेन टकारे च 'लिट्' इति रूपम् । चर्त्वाभावे ढकारस्य जश्त्वे सति 'लिड्' इति च रूपं सिद्ध्यति । भ्यामादिहलादिविभक्तिषु 'स्वादिष्वसर्वनामस्थाने' इत्यनेन पदसंज्ञायाम्, हकारस्य ढत्वे, जश्त्वे च 'लिड्भ्याम्' इत्यादि ।

लिट्त्सु, लिट्सु, इत्यत्र "ड: सि धुट्" इति सूत्रेण वा धुडागमः ।

## घकारादेशविधायकं विधिसूत्रम्

**दादेर्धातोर्घः ८ । २ । ३२ ॥**

**झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य घः ॥** 'हो ढः' इत्यस्यापवादसूत्रमिदम् ।

(दादेः, धातोः, हः, घः, **झलि, पदस्य, अन्ते**)

सरलार्थः- धातूपदेशकाले यो धातुः दकारादिः विद्यते, तदवयवस्य हकारस्य स्थाने घकारादेशो भवति, झलि परे पदान्ते च । 'दुह् प्रपूरणे' धातोः क्विपि सर्वापहारिलोपे कृदन्तत्वात् प्रातिपदिकसंज्ञायां दुह्शब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'दुह्' इत्यवस्थायाम् अनेन सूत्रेण हकारस्य घकारादेशे 'दुघ्' इति जाते-

### भष्भावविधायकं विधिसूत्रम्

**एकाचो बशो भष् झषन्तस्य स्ध्वोः ८ । २ । ३७ ॥**

**धात्ववयवस्यैकाचो झषन्तस्य बशो भष् से ध्वे पदान्ते च । धुक्, धुग् । दुहौ । दुहः । धुग्भ्याम् । धुक्षु ॥**

(धातोः, झषन्तस्य, एकाचः, बशः, भष्, स्ध्वोः, पदस्य, अन्ते)

सरलार्थः- धातोः अवयवो यो झषन्त एकाच्, तदवयवस्य 'बश्' इत्यस्य स्थाने भषादेशो भवति सकारे परे, ध्वशब्दे परे, पदान्ते च । अनेन सूत्रेण 'दुघ्' इत्यस्य दकारस्य भष्भावे, आन्तरम्याद् धकारादेशे 'धुघ्' इत्यवस्थायां पदसंज्ञायां धकारस्य जश्त्वेन गकारे, 'वाऽवसाने' इति सूत्रेण विभाषया चर्त्वे 'धुक्' इति, चर्त्वाभावे 'धुग्' इति च रूपे सिद्धयतः ।

### घकारादेशविधायकं विधिसूत्रम्

**वा द्रुहमुहष्णुहष्णिहाम् ८ । २ । ३३**

**एषां हस्य वा घो झलि पदान्ते च । ध्रुक्, ध्रुग्, ध्रुट्, ध्रुड् । द्रुहौ । द्रुहः । ध्रुग्भ्याम्, ध्रुड्भ्याम् । ध्रुक्षु, ध्रुट्त्सु, ध्रुट्सु ॥ एवं मुक्, मुग् इत्यादि ॥**

(द्रुह्-मुह्-ष्णुह्-ष्णिहाम्, धातोः, हः, वा, घः, झलि, पदस्य, अन्ते)

सरलार्थः- द्रुह्-मुह्-ष्णुह्-ष्णिह् इति एतेषां शब्दानामवयवस्य हकारस्य स्थाने विभाषया घकारादेशो भवति, झलि परे, पदान्ते च । 'द्रुह्' इत्यस्य व्युत्पन्नपक्षे प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'द्रुह्' इत्यवस्थायामनेन सूत्रेण विभाषया हकारस्य स्थाने घकारादेशे, भष्भावेन दकारस्य धकारे, जश्त्वेन घकारस्य गकारे, गकारस्य विभाषया चर्त्वेन ककारे च 'ध्रुक्' इति, चर्त्वाभावे 'ध्रुग्' इति, घकाराभावे 'हो ढः' इति सूत्रेण हकारस्य ढकारे, तस्य जश्त्वेन डकारे, विभाषया चर्त्वेन टकारे 'ध्रुट्' इति, चर्त्वाभावे 'ध्रुड्' इति च रूपाणि सिद्धयन्ति ।

### सकारादेशविधायकं विधिसूत्रम्

**धात्वादेः षः सः ६ । १ । ६४ ॥**

**स्नुक्, स्नुग्, स्नुट्, स्नुड् । एवं स्निक्, स्निग्, स्निट्, स्निड् ॥ विश्ववाट्, विश्ववाड् । विश्ववाहौ । विश्ववाहः । विश्ववाहम् । विश्ववाहौ ॥**

सरलार्थः- धात्वादौ स्थितस्य षकारस्य स्थाने सकारादेशो भवति । 'ष्णुह् उद्गिरणे' इति धातोः अनेन सूत्रेण सकारादेशे निमित्तापाये नैमित्तिकस्याप्यपायः इति नियमाद् णकारस्य नकारे च 'स्नुह्' इत्यस्माद् धातोः क्विपि सर्वापहारिलोपे कृदन्तत्वात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे, सकारस्य हल्ङ्यादिलोपे 'वा द्रुहमुहष्णुहष्णिहाम्' इति सूत्रेण विभाषया हकारस्य घकारे, जश्वेन गकारे, तस्य विभाषया चर्त्वेन ककारे च 'स्नुक्' इति, चर्त्वाभावपक्षे 'स्नुग्' इति, घत्वाभावपक्षे 'हो ढः' इति ढकारे, तस्य जश्त्वेन डकारे, तस्य विभाषया चर्त्वेन टकारे 'स्नुट्' इति, चर्त्वाभावपक्षे 'स्नुड्' इति च रूपाणि सिद्ध्यन्ति ।

'विश्वं वहती'त्यर्थे वह्धातोः ण्विप्रत्यये सर्वापहारिलोपे णित्वाद् आदिवृद्धौ वाह् इत्यनेन सह उपपदसमासे 'विश्ववाह्' इत्यस्य प्रातिपदिकसंज्ञायां प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे विश्ववाह् स् इत्यवस्थायां सकारस्यापृक्तसंज्ञायां लोपे 'हो ढः' इति सूत्रेण हस्य ढत्वे, तस्य जश्त्वे, चर्त्वे च 'विश्ववाट्, विश्ववाड्' इति रूपे निष्पन्ने ।

विश्ववाह्शब्दात् द्वितीयाविभक्तौ बहुवचने शस्प्रत्ययेऽनुबन्धलोपे 'विश्ववाह्+अस्' इत्यवस्थायां 'यचि भम्' इति सूत्रेण भसंज्ञायाम् आह-

## सम्प्रसारणसंज्ञाविधायकं सूत्रम्

**इग्यणः सम्प्रसारणम् १ ।१ ।४५ ॥**

**यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् ॥**

(यणः, इक्, सम्प्रसारणम्)

सरलार्थः- यणः स्थाने विधीयमानः इक् सम्प्रसारणसंज्ञको भवति ।

## ऊठादेशविधायकं विधिसूत्रम्

**वाह ऊठ् ६ ।४ ।१३२ ॥**

**भस्य वाहः संप्रसारणमूठ् ॥**

(भस्य, वाहः, सम्प्रसारणम्, ऊठ्)

सरलार्थः- भसंज्ञकस्य 'वाह्' इत्यस्य सम्प्रसारणसंज्ञकः 'ऊठ्' इत्यादेशो भवति । अत्र भाविसंज्ञामादाय ऊठि सम्प्रसारणत्वबुद्धिः । विश्ववाह्शब्दाद् द्वितीयाया बहुवचने शस्-प्रत्यये 'विश्ववाह्+अस्' इत्यवस्थायाम् 'इग्यणः सम्प्रसारणम्' इति सूत्रसहकारेण 'वाह ऊठ्' इति

सूत्रेण वकारस्य स्थाने सम्प्रसारणसंज्ञके ऊठादेशेऽनुबन्धलोपे 'विश्व ऊ आह् अस्' इति जाते -

### पूर्वरूपविधायकं विधिसूत्रम्

**सम्प्रसारणाच्च ६ ।१ ।१०८ ॥**

**सम्प्रसारणादचि पूर्वरूपमेकादेशः । एत्येधत्यूठ्स्विति वृद्धिः । विश्वौहः, इत्यादि ॥**

(सम्प्रसारणाद्, च, अचि, पूर्वपरयोः, एकः, पूर्वः)

सरलार्थः- सम्प्रसारणाद् अचि परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । 'विश्व ऊ आह् अस्' इत्यवस्थायाम् अनेन सूत्रेण पूर्वरूपे ऊकारस्य आकारस्य च स्थाने ऊकाररूपैकादेशे 'विश्व ऊह् अस्' इति जाते 'एत्येधत्यूठ्सु' इति सूत्रेण वृद्धौ, वर्णसम्मेलने 'विश्वौहस्' इति जाते सकारस्य रुत्वे, विसर्गे च 'विश्वौहः' इति रूपं सिद्ध्यति ।

### आम्-आगमविधायकं विधिसूत्रम्

**चतुरनडुहोरामुदात्तः ७ ।१ ।९८ ॥**

**अनयोराम् स्यात्सर्वनामस्थाने परे ॥**

(चतुर्-अनडुहोः, आम्, उदात्तः)

सरलार्थः- चतुर्-अनडुह्-शब्दयोः आम्-आगमो भवति, सर्वनास्थाने परे ।

अनडुह्शब्दात् प्रथमाविभक्तौ एकवचने सुप्रत्ययेऽनुबन्धलोपे 'अनडुह्+स्' इत्यवस्थायाम् 'मिदचोऽन्त्यात्परः' इति सूत्रसहकारेण 'चतुरनडुहोरामुदात्तः' इति सूत्रेण आमागमेऽनुबन्धलोपे 'अनडु आ ह् स्' इति जाते 'इको यणचि' इति सूत्रेण यणि 'अनड्वाह् स्' इति जाते -

### नुमागमविधायकं सूत्रम्

**सावनडुहः ७ ।१ ।८२ ॥**

**अस्य नुम् स्यात् सौ परे । अनड्वान् ॥**

(अनडुहः, नुम्, सौ)

सरलार्थः- सु-प्रत्यये परे अनडुह्शब्दस्य नुमागमो भवति ।

अनडुह्-शब्दात् सौ, 'अनड्वाह् स्' इत्यवस्थायाम् अनेन सूत्रेण नुमागमेऽनुबन्धलोपे मित्वाद् अन्त्यादचः परावयवत्वे 'अनड्वान्ह् स्' इति जाते, सकारस्य हल्ङ्यादिलोपे हकारस्य संयोगान्तलोपे 'अनड्वान्' इति रूपं सिद्ध्यति ।

## अम्-आगमविधायकं विधिसूत्रम्

**अम् सम्बुद्धौ ७ ।१ ।९९ ॥**

**हे अनड्वन् । हे अनड्वाहौ । हे अनड्वाहः । अनडुहः । अनडुहा ॥**

(चतुरनडुहोः, अङ्गस्य, सम्बुद्धौ, अम्)

सरलार्थः- चतुर्-शब्दस्य, अनडुह्-शब्दस्य च अमागमो भवति, सम्बद्धौ परतः

अनडुह्शब्दात् प्रथमाविभक्तौ सौ 'चतुरनडुहोरामुदात्तः' इति सूत्रेण आमि, यणि, नुमि च कृते आकारघटितम् 'अनड्वान्' इति रूपं पूर्वं निष्पादितम् । सम्बुद्धौ च आमागमं बाधित्वा अनेन सूत्रेण अमागमे कृते तयैव रीत्या अकारघटितं 'हे अनड्वन्' इति रूपं सिद्ध्यति ।

## दकारादेशविधायकं विधिसूत्रम्

**वसुस्रंसुध्वंस्वनडुहां दः ८ ।२ ।७२ ॥**

**सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते । अनडुद्भ्यामित्यादि ॥ सान्तेति किम् ? विद्वान् । पदान्ते किम् ? स्रस्तम् । ध्वस्तम् ॥**

(सः, वसु-स्रंसु-ध्वंसु-अनडुहाम्, पदस्य, दः)

सरलार्थः- सकारान्त-वसुप्रत्ययान्तस्य प्रातिपदिकस्य, स्रंस्-धातोः, ध्वंस्-धातोः अनडुह् शब्दस्य च स्थाने दकारादेशो भवति, पदान्ते ।

अनडुह्शब्दात् भ्यामि अनेन सूत्रेण हकारस्य स्थाने दकारादेशे 'अनडुद्भ्याम्' इति रूपं सिद्ध्यति ।

## मूर्धन्यादेशविधायकं विधिसूत्रम्

**सहेः साडः सः ८ ।३ ।५६ ॥**

**साड्रूपस्य सहेः सस्य मूर्धन्यादेशः । तुराषाट्, तुराषाड् । तुरासाहौ । तुरासाहः । तुराषाड्भ्यामित्यादि ॥**

(सहेः, साडः, अपदान्तस्य, सः, मूर्धन्यः)

सरलार्थः- साड्रूपं यत्र वर्तते तत्र विद्यमानस्य सह्धातोः अवयवस्य सकारस्य स्थाने मूर्धन्यादेशः (षकारादेशः) भवति ।

'तुरं सहते' इत्यर्थे तुरासाह्शब्दात् प्रथमाया एकवचने सुप्रत्ययेऽनुबन्धलोपे तस्य हल्ङ्यादिलोपे 'हो ढः' इति सूत्रेण ढत्वे, ढकारस्य जश्त्वेन डकारे 'तुरासाड्' इति जाते अनेन सूत्रेण 'साड्'

इत्यस्य सकारस्य मूर्धन्यादेशेन षकारे 'तुराषाड्' इति जाते विभाषया चर्त्वे, 'तुराषाट्' इति, चर्त्वाभावे 'तुराषाड्' इति च रूपे निष्पन्ने ।

### प्रयोगसिद्धिप्रकारः

**लिट्त्सु, लिट्सु**

लिह्शब्दस्य प्रातिपदिकसंज्ञायां तस्मात् सप्तमीविभक्तौ बहुवचने सुप्यनुबन्धलोपे 'लिह्+सु' इत्यवस्थायाम् 'स्वादिष्वसर्वनामस्थाने' इति सूत्रेण लिह्शब्दस्य पदसंज्ञायां 'हो ढः' इति सूत्रेण ढत्वे जश्त्वे च 'लिड् सु' इति जाते 'डः सि धुट्' इति सूत्रेण विभाषया धुडागमेऽनुबन्धलोपे 'लिड् ध् सु' इति जाते धकारडकारयोः चर्त्वे 'लिट्त्सु' इति, धुडागमाभावे 'लिड् सु' इति जाते डकारस्य चर्त्वे 'लिट्सु' इति च रूपद्वयं सिद्धम् ।

### शब्दरूपावलिः

| लिह्शब्दस्य रूपाणि | | |
|---|---|---|
| लिट्-ड् | लिहौ | लिहः |
| लिहम् | लिहौ | लिहः |
| लिहा | लिड्भ्याम् | लिड्भिः |
| लिहे | लिड्भ्याम् | लिड्भ्यः |
| लिहः | लिड्भ्याम् | लिड्भ्यः |
| लिहः | लिहोः | लिहाम् |
| लिहि | लिहोः | लिट्त्सु, लिट्सु |
| हे लिट्-ड् ! | हे लिहौ ! | हे लिहः ! |

| विश्ववाह्शब्दस्य रूपाणि | | |
|---|---|---|
| विश्ववाट्-ड् | विश्ववाहौ | विश्ववाहः |
| विश्ववाहम् | विश्ववाहौ | विश्वौहः |
| विश्वौहा | विश्ववाड्भ्याम् | विश्ववाड्भिः |
| विश्वौहे | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| विश्वौहः | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| विश्वौहः | विश्वौहोः | विश्वौहाम् |
| विश्वौहि | विश्वौहोः | विश्ववाट्त्सु, विश्ववाट्सु |
| हे विश्ववाट्-ड् ! | हे विश्ववाहौ ! | हे विश्ववाहः ! |

### वाक्येषु प्रयोगानुशीलनम्

१. धुक् सायं गां दोग्धि ।

२. ईश्वरः विश्ववाड् अस्तीति भक्ताः विश्वसन्ति ।

३. ध्रुड्भ्यः शत्रुभ्यः सर्वे जनाः बिभ्यति ।

४. मम स्निक् सखा रामः परीक्षायां प्रथमः भविष्यति ।

५. अनड्वान् स्वस्य बलेन शकटं वाहयति ।

## अभ्यासः

१. **परस्परं मेलयत**

| | |
|---|---|
| हकारस्य ढत्वम् | इग्यणः सम्प्रसारणम् |
| भष्भावः | वसुस्रंसुध्वंस्वनडुहां दः |
| सम्प्रसारणसंज्ञा | धात्वादेः षः सः |
| हकारस्य दत्वम् | हो ढः |
| धात्वादेः षस्य सत्वम् | एकाचो बशो भष् झषन्तस्य स्ध्वोः |

२. **एकवाक्येन उत्तरं लिखत**

(क) कस्यामवस्थायां हकारस्य ढकारादेशो भवति ?

(ख) भष्भावेन केषां वर्णानां स्थाने के आदिश्यन्ते ?

(ग) 'विश्वं वहति' इत्यर्थे कः शब्दो निष्पद्यते ?

(घ) कीदृशानां वर्णानां सम्प्रसारणसंज्ञा भवति ?

(ङ) कीदृग्रूपस्य सहेः सस्य मूर्धन्यादेशो भवति ?

३. **अधस्तनरूपाणि लिखत**

(क) लिह्शब्दस्य तृतीयाद्विवचने (ख) दुह्शब्दस्य सप्तमीबहुवचने

(ग) ष्णिह्शब्दस्य प्रथमैकवचने (घ) विश्ववाह्शब्दस्य षष्ठ्येकवचने

(ङ) तुरासाह्शब्दस्य पञ्चमीबहुवचने

४. **अधस्तनसूत्राणां सरलार्थं सोदाहरणं लिखत**

(क) दादेर्धातोर्घः (ख) एकाचो बशो भष् झषन्तस्य स्ध्वोः

(ग) वाह ऊठ् (घ) चतुरनडुहोरामुदात्तः

(ङ) सहेः साडः षः

५. **अधस्तनरूपाणां सूत्रादिप्रदर्शनपुरःसरं सिद्धिप्रक्रियां प्रदर्शयत**

(क) लिट् (ख) लिट्त्सु/लिट्सु (ग) धुक्षु (घ) ध्रुक्/ध्रुग्, ध्रुट्/ध्रुड्

(ङ) विश्वौहः (च) अनड्वान् (छ) हे अनड्वन् (ज) तुराषाट्-ड्

६. **पठितशब्दानां समुचितं प्रयोगं विधायानुच्छेदमेकं रचयत ।**

हलन्तपुँल्लिङ्गप्रकरणे

# सुदिवादिशब्दाः

## औकारादेशविधायकं विधिसूत्रम्

**दिव औत् ७ । १ । ८४ ॥**

**दिविति प्रातिपदिकस्यौत्स्यात्सौ । सुद्यौः । सुदिवौ ॥**

(दिवः, अङ्गस्य, औत्, सौ)

सरलार्थः- 'दिव्' इति प्रातिपदिकस्य स्थाने औकारादेशो भवति सुप्रत्यये परे । अलोऽन्त्यस्य इति अन्त्यस्य वकारस्य औकारादेशः ।

'सु-शोभना द्यौर्यस्य' इति विग्रहे निष्पन्नात् सुदिव्शब्दात् सौ प्रत्ययेऽनुबन्धलोपे 'सुदिव् स्' इत्यवस्थायाम् अनेन सूत्रेण वकारस्य स्थाने औकारादेशे 'सुदि औ स्' इति जाते 'इको यणचि' इति यणि 'सुद्यौस्' इति जाते सकारस्य रुत्वे, विसर्गे च 'सुद्यौः' इति रूपं सिद्ध्यति ।

## उकारादेशविधायकं विधिसूत्रम्

**दिव उत् ६ । १ । १३१ ॥**

**दिवोऽन्तादेश उकारः स्यात् पदान्ते । सुद्युभ्यामित्यादि ॥ चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः ॥**

(दिवः, पदान्तात्, उत्)

सरलार्थः- 'दिव्' इत्यस्य अन्त्यस्य वकारस्य स्थाने उकारादेशो भवति पदान्ते ।

सुदिव्शब्दाद् भ्यामि 'सुदिव् भ्याम्' इति स्थिते अनेन सूत्रेण वकारस्य स्थाने उकारादेशे, यणि, वर्णसम्मेलने 'सुद्युभ्याम्' इति रूपं सिद्ध्यति ।

## नुडागमविधायकं विधिसूत्रम्

**षट्चतुर्भ्यश्च ७ । १ । ५५ ॥**

**एभ्य आमो नुडागमः ॥**

(षट्चतुर्भ्यश्च, आमि, नुट्)

सरलार्थः- षट्संज्ञकशब्दात्, चतुर्-शब्दाच्च परस्य आम्-प्रत्ययस्य नुडागमो भवति ।

चतुर्-शब्दात् षष्ठीविभक्तौ बहुवचने आम्प्रत्यये 'चतुर् आम्' इत्यवस्थायां 'षट्चतुर्भ्यश्च' इति सूत्रेण आमो नुडागमेऽनुबन्धलोपे वर्णसम्मेलने 'चतुर्नाम्' इति जाते -

### णत्वविधायकं विधिसूत्रम्

**रषाभ्यां नो णः समानपदे ८ । ४ । १ ॥**

**स्पष्टम् । "अचो रहाभ्यां द्वे" । अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । चतुर्ण्णाम्, चतुर्णाम् ॥**

(रषाभ्याम्, नः, णः, समानपदे)

सरलार्थः- एकपदस्थाभ्यां रेफषकाराभ्याम् अव्यवहितोत्तरस्य नकारस्य स्थाने णकारादेशो भवति । चतुर्नाम् इत्यत्र रेफादुत्तरस्य नस्य स्थाने अनेन णकारादेशे चतुर्णाम् इति जाते रेफात्परस्य णकारस्य 'अचो रहाभ्यां द्वे' इति सूत्रेण द्वित्वादेशे 'चतुर्ण्णाम्' इति, णकारस्य द्वित्वाभावे 'चतुर्णाम्' इति च रूपे सिद्ध्यतः ।

### विसर्गादेशनियामकं नियमसूत्रम्

**रोः सुपि ८ । ३ । १६ ॥**

**रोरेव विसर्गः सुपि । षत्वम् । षस्य द्वित्वे प्राप्ते ॥**

(पदस्य, रोः, सुपि, विसर्जनीयः, संहितायाम्)

सरलार्थः- 'खरवसानयोर्विसर्जनीयः' इति सूत्रेणैव सिद्धे नियमार्थम् इदं सूत्रम् । सप्तम्या बहुवचने सुपि परे 'रु' इत्यस्य रेफस्य स्थाने एव विसर्गो भवति, साक्षाद् रेफो यत्र वर्तते तत्र न ।

चतुर्-शब्दात् सप्तम्या बहुवचने सुपि 'चतुर् सु' इति जाते पदसंज्ञायाम्, रेफस्य 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण विसर्गादेशे प्राप्ते अनेन सुपि परे रुस्थानिकस्य रेफस्य एव विसर्गो भवतीति नियमेन विसर्गाभावे, 'आदेशप्रत्यययोः' इति सूत्रेण सकारस्य मूर्धन्यादेशे षकारे 'चतुर्षु' इत्यवस्थायां रेफात्परस्य षकारस्य 'अचो रहाभ्यां द्वे' इति सूत्रेण द्वित्वे प्राप्ते आह-

### शरो द्वित्वनिषेधकं सूत्रम्

**शरोऽचि ८ । ४ । ४९ ॥**

**अचि परे शरो न द्वे स्तः । चतुर्षु ॥**

(शरः, अचि, द्वे, न)

सरलार्थः- शरः अचि परे द्वित्वं न भवति । तेन 'चतुर्षु' इत्यत्र अचो रहाभ्यां.. इति द्वित्वं न ।

## नकारादेशविधायकं सूत्रम्

**मो नो धातोः ८ । २ । ६४ ॥**

**धातोर्मस्य नः पदान्ते । प्रशान् ॥**

(मः, धातोः, नः, पदस्य, अन्ते)

सरलार्थः- पदान्तस्य धातोः अन्त्यस्य मकारस्य स्थाने नकारादेशो भवति ।

प्रशाम्शब्दात् प्रथमैकवचने सुप्रत्यये तस्य हल्ङ्यादिलोपे 'प्रशाम्' इति जाते अनेन सूत्रेण मकारस्य नकारादेशे 'प्रशान्' इति रूपं सिद्ध्यति ।

पदान्ते धातोर्मस्य नकारविधानाद् हलादिषु सर्वासु विभक्तिषु प्रशाम्-शब्दस्य मकारस्य अनेन नत्वं भवति, अजादिषु विभक्तिषु परतः तु केवलं योजनमात्रम् ।

## कादेशविधायकं विधिसूत्रम्

**किमः कः ७ । २ । १०३ ॥**

**किमः कः स्याद्विभक्तौ । कः । कौ । के इत्यादि । शेषं सर्ववत् ॥**

(किमः, कः, विभक्तौ)

सरलार्थः- किम्शब्दस्य स्थाने 'क' इत्यादेशो भवति, विभक्तौ परतः ।

किम्शब्दस्य प्रातिपदिकसंज्ञायां तस्मात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'किमः कः' इति सूत्रेण किम्शब्दस्य कादेशे 'क स्' इति जाते, सस्य रुत्वे, विसर्गे च 'कः' इति रूपं सिद्धम् ।

## मकारविधायकं विधिसूत्रम्

**इदमो मः ७ । २ । १०८ ॥**

**सौ । त्यदाद्यत्वापवादः ॥**

(इदमः, मः, सौ)

सरलार्थः- इदम्शब्दस्य मकारस्य स्थाने मकार एव भवति, न तु 'त्यदादीनामः' इति अत्वम् । इदम्-शब्दस्य प्रातिपदिकसंज्ञायां तस्मात् प्रथमैकवचने सुप्रत्यये, इदम्शब्दस्य त्यदादिगणे पाठात् 'त्यदादीनामः' इति सूत्रेण मकारस्य अत्वे प्राप्ते, अनेन सूत्रेण मकारस्य स्थाने मकारादेशे एव कृते 'इदम् स्' इति जाते -

### अयादेशविधायकं विधिसूत्रम्

**इदोऽय् पुंसि ७ । २ । १११ ॥**

**इदम इदोऽय् सौ पुंसि । अयम् । त्यदाद्यत्वे ॥**

(इदमः, इदः, अय्, सौ, पुंसि)

सरलार्थः- पुंस्त्ववाचकस्य इदम्-शब्दस्य इद्भागस्य स्थाने 'अय्' आदेशो भवति सु-प्रत्यये परे । 'इदम् स्' इत्यवस्थायाम् अनेन सूत्रेण 'इद्'भागस्य स्थाने अयादेशे वर्णसम्मेलने 'अयम्' इति रूपं सिद्धम् ।

इदम्-शब्दाद् औ-प्रत्यये 'इदम् औ' इति स्थिते 'त्यदादीनामः' इति सूत्रेण इदमो मकारस्य अकारादेशे इद अ औ इति जाते-

### पररूपविधायकं विधिसूत्रम्

**अतो गुणे ६ । १ । ९७ ॥**

**अपदान्तादतो गुणे पररूपमेकादेशः ।**

(अपदान्तात्, अतः, गुणे, पूर्वपरयोः, एकः, पररूपम्)

सरलार्थः- अपदान्ताद् अकाराद् गुणसंज्ञकेषु वर्णेषु परेषु पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । 'इद अ औ' इत्यवस्थायाम् 'इद अ' इत्यत्र प्राप्तं सवर्णदीर्घं बाधित्वा अनेन सूत्रेण पूर्वपरयोः स्थाने पररूपैकादेशे 'इद औ' इति जाते-

### मत्वविधायकं विधिसूत्रम्

**दश्च ७ । २ । १०९ ॥**

**इदमो दस्य मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः ॥**

(इदमः, दः, च, मः, विभक्तौ)

सरलार्थः- इदम्-शब्दस्य दकारस्य स्थाने मकारादेशो भवति, विभक्तौ परतः ।

अनेन सूत्रेण 'इद औ' इत्यवस्थायां दकारस्य मकारे 'वृद्धिरेचि' इति वृद्धौ 'इमौ' इति रूपं सिद्धयति ।

त्यद्-तद्-यद्-एतद्-इदम्-अदस्-एक-द्वि-युष्मद्-अस्मद्-भवत्-किम्-शब्दानां सम्बोधनं न भवति अनभिधानाद् ।

## अनादेशविधायकं विधिसूत्रम्

**अनाप्यकः ७ । २ । ११२ ॥**

**अककारस्येदम इदोऽनापि विभक्तौ । आबिति प्रत्याहारः । अनेन ॥**

(अकः, इदमः, इदः, अन्, आपि, विभक्तौ)

सरलार्थः- अकच्प्रत्ययेन रहितस्य इदम्-शब्दस्य इद्भागस्य स्थाने अन्-आदेशो भवति आप्-विभक्तौ परतः ।

इदम्शब्दात् तृतीयैकवचने टाप्रत्ययेऽनुबन्धलोपे 'त्यदादीनामः' इति अत्वे, पररूपे 'इद आ' इत्यवस्थायाम् अनेन सूत्रेण इद्भागस्य स्थाने अन्-आदेशे वर्णसम्मेलने 'अन आ' इति जाते 'टाङसिङसामिनात्स्याः' इति सूत्रेण 'आ' इत्यस्य इनादेशे, गुणे च कृते 'अनेन' इति रूपं सिद्ध्यति ।

## लोपविधायकं विधिसूत्रम्

**हलि लोपः ७ । २ । ११३ ॥**

**अककारस्येदम इदो लोप आपि हलादौ ।**

(अकः, इदमः, इदः, लोपः, आपि, हलि, विभक्तौ)

सरलार्थः- अकच्प्रत्ययरहितस्य इदम्-शब्दस्य इद्भागस्य लोपो भवति हलादौ आप्-विभक्तौ परतः ।

इदम्शब्दाद् भ्याम्-प्रत्यये 'त्यदादीनामः' इति अत्वे, 'अतो गुणे' इति पररूपे 'इद भ्याम्' इत्यवस्थायाम् अनेन सूत्रेण 'इदम्' इत्यस्य इद्भागस्य लोपे प्राप्ते 'अलोऽन्त्यस्य' इति सूत्रेण अन्त्यस्य दकारमात्रस्य लोपम् आशङ्क्य आह-

नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे (परिभाषा) ॥

सरलार्थः- अनर्थके शब्दस्वरूपे अभ्यासविकाररूपं कार्यं विहाय अन्यत्र 'अलोऽन्त्यस्य' इति सूत्रं न प्रवर्तते । 'इद भ्याम्' इति स्थितौ एतस्याः परिभाषायाः सहकारेण 'हलि लोपः' इति सूत्रेण इद्भागस्य लोपे 'अ भ्याम्' इति जाते, अकारस्य अकारान्तत्वाभावात् 'सुपि च' इत्यनेन अप्राप्तौ आह-

### आद्यन्तवद्भावविधायकम् अतिदेशसूत्रम्

**आद्यन्तवदेकस्मिन् १ ।१ ।२१ ॥**

**एकस्मिन्क्रियमाणं कार्यमादाविवान्त इव स्यात् । सुपि चेति दीर्घः । आभ्याम् ॥**

(एकस्मिन्, आद्यन्तवत्)

सरलार्थः- तदादितदन्तयोः क्रियमाणं कार्यं तदादौ तदन्ते इव एकस्मिन् अपि प्रवर्तते । यथा- एकाकी अकारः अकारान्तः, अकारादिश्च भवति । तेन 'अ भ्याम्' इत्यत्र अकारस्यापि अकारान्तत्वात् 'सुपि च' इति सूत्रेण दीर्घे कृते 'आभ्याम्' इति सिद्धम् । एवंरीत्या अन्यत्रापि बोध्यम् ।

### भिसः ऐसादेशनिषेधकं नियमसूत्रम्

**नेदमदसोरकोः ७ ।१ ।११ ॥**

**अककारयोरिदमदसोर्भिस ऐस् न । एभिः । अस्मै । एभ्यः । अस्मात् । अस्य । अनयोः । एषाम् । अस्मिन् । अनयोः । एषु ॥**

(अकोः, इदम्-अदसोः, भिसः, ऐस्, न)

सरलार्थः- अकच्-रहिताभ्याम् इदम्-अदस्-शब्दाभ्यां परस्य 'भिस्' इत्यस्य स्थाने ऐसादेशो न भवति ।

'अ भिस्' इत्यवस्थायाम् 'अतो भिस ऐस्' इति सूत्रेण भिसः स्थाने ऐसादेशे प्राप्ते अनेन सूत्रेण तन्निषेधे 'आद्यन्तवदेकस्मिन्' इति सूत्रसहकारेण 'बहुवचने झल्येत्' इति सूत्रेण अकारस्य स्थाने एकारादेशे 'एभिः' इति रूपं सिद्ध्यति ।

### इदम्-शब्दस्य एनादेशविधायकं विधिसूत्रम्

**द्वितीयाटौस्स्वेनः २ ।४ ।३४ ॥**

**इदमेतदोरन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । यथा - अनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति । अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति ॥ एनम् । एनौ । एनान् । एनेन । एनयोः । एनयोः ॥**

(अन्वादेशे, इदमः, एतदः, एनः, द्वितीया-टा-ओस्सु)

सरलार्थः- अन्वादेशे द्योत्ये अम्, औट्, शस्, टा, इत्येतासु विभक्तिषु परतः इदम्-शब्दस्य,

एतद्-शब्दस्य च स्थाने 'एन' इत्यादेशो भवति । अन्वादेशो नाम- एकत्र कार्ये प्रवृत्तस्य वस्तुनः कार्यान्तरं प्रवर्तनाय पुनः उपादानम् ।

'अनेन व्याकरणमधीतम् एनं छन्दोऽध्यापय' इत्युक्ते व्याकरणस्य अध्ययनाय प्रवृत्तस्य जनस्य छन्दोऽध्ययने पुनः उपादानं विधीयमानमस्ति । तथैव द्वितीये उदाहरणे अनयोः कुलस्य पवित्रतां प्रतिपाद्य पुनः सम्पन्नतापि प्रतिपाद्यमाना वर्तते, अतः अत्र अन्वादेशत्वम् । अत्र सम्पूर्णस्य इदम्-शब्दस्य अनेन सूत्रेण द्वितीयाटौस्सु परतः अन्वादेशः । तेन अन्वादेशपक्षे एनम्, एनौ, एनान्, एनेन, एनयोः इति रूपाणि ।

**प्रयोगसिद्धिप्रकारः**

**एभिः**

इदम्शब्दात् तृतीयाविभक्तौ बहुवचने भिस्प्रत्यये 'इदम् भिस्' इति स्थिते, अत्वे, पररूपे च 'इद भिस्' इति जाते 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' इति परिभाषासहयोगेन 'हलि लोपः' इति सूत्रेण इद्भागस्य लोपे 'अ भिस्' इति जाते 'आद्यन्तवदेकस्मिन्' इति सूत्रेण अकारस्य आद्यन्तवद्भावे 'अतो भिस ऐस्' इति सूत्रेण भिस ऐसादेशे प्राप्ते 'नेदमदसोरकोः' इति सूत्रेण निषेधे 'बहुवचने झल्येत्' इति अकारस्य एत्वे 'ए भिस्', पदसंज्ञायां सकारस्य रुत्वे, विसर्गे च 'एभिः' इति रूपं सिद्धम् ।

**शब्दरूपावलिः**

| सुदिव्शब्दस्य रूपाणि- | | |
|---|---|---|
| सुद्यौः | सुदिवौ | सुदिवः |
| सुदिवम् | सुदिवौ | सुदिवः |
| सुदिवा | सुद्युभ्याम् | सुद्युभिः |
| सुदिवे | सुद्युभ्याम् | सुद्युभ्यः |
| सुदिवः | सुद्युभ्याम् | सुद्युभ्यः |
| सुदिवः | सुदिवोः | सुदिवाम् |
| सुदिवि | सुदिवोः | सुद्युषु |
| हे सुद्यौः ! | हे सुदिवौ ! | हे सुदिवः ! |

| किम्शब्दस्य सर्वाणि रूपाणि- | | |
|---|---|---|
| कः | कौ | के |
| कम् | कौ | कान् |
| केन | काभ्याम् | कैः |
| कस्मै | काभ्याम् | केभ्यः |
| कस्मात् | काभ्याम् | केभ्यः |
| कस्य | कयोः | केषाम् |
| कस्मिन् | कयोः | केषु |
| त्यदादीनां सम्बोधनं नास्ति । | | |

## वाक्येषु प्रयोगानुशीलनम्

१. शरत्काले **सुदिवः** दिवसाः राजन्ते ।

२. दशरथस्य **चत्वारः** पुत्राः आसन् ।

३. यदि स्वदेशे एव धनार्जनं भवेत्, तर्हि **कः** विदेशं गच्छेत् ?

४. **अनेन** मया कृतेन कर्मणा सर्वेषाम् उपकारः स्यात् ।

५. **अनेन** काव्यानि अधीतानि, **एनम्** दर्शनम् अध्यापय ।

## अभ्यासः

### १. कोष्ठकात् समुचितं पदं विन्यस्य रिक्तस्थानं पूरयत

(क) दिव्शब्दस्य सौ परे ........... अन्तादेशो भवति । (उकारः, औकारः, अकारः)

(ख) ............. परस्य नस्य णकारादेशो भवति । (कखाभ्याम्, रषाभ्याम्, इण्कुभ्याम्)

(ग) इदम्शब्दस्य इद्भागस्य सौ विभक्तौ ......... भवति । (अत्वम्, लोपः, अयादेशः)

(घ) अककारस्येदम इद्भागस्य ........... लोपो भवति । (हलादौ, अजादौ, सर्वत्र)

(ङ) इदमदसोर्विहितस्य भिसः ............ न भवति । (लोपः, ऐसादेशः, अनुबन्धलोपः)

### २. परस्परं मेलयत

| | |
|---|---|
| चत्वारः | सप्तमीबहुवचनम् |
| केषाम् | तृतीयैकवचनम् |
| अनेन | षष्ठीबहुवचनम् |
| सुद्युषु | प्रथमाबहुवचनम् |

### ३. एकवाक्येन उत्तरयत

(क) 'चतुण्णार्म्' इत्यत्र द्वित्वं केन सूत्रेण भवति ?

(ख) कस्याम् अवस्थायां शरो द्वित्वं न भवति ?

(ग) विभक्तौ परतः किम्शब्दस्य स्थाने किम् आदिश्यते ?

(घ) अलोऽन्त्यविधिः कुत्र न प्रवर्तते ?

(ङ) 'आभ्याम्' इत्यत्र केन दीर्घः ?

४. **अन्वादेशः कः ? सोदाहरणं लिखत ।**

५. **ससूत्रं सिद्धिप्रक्रियां दर्शयत**

(क) सुद्यु+सु (ख) चतुर्+आम् (ग) किम्+जस्

(घ) इदम्+सु (ङ) इदम्+भिस् (च) इदम्+शस् (अन्वादेशः)

६. **अधस्तनसूत्राणां सरलार्थं लिखत**

(क) रषाभ्यां नो णः समानपदे (ख) अचोरहाभ्यां द्वे (ग) अनाप्यकः

(घ) आद्यन्तवदेकस्मिन् (ङ) द्वितीयाटौस्स्वेनः

७. **उदाहरणमनुसृत्य किम्-शब्देन प्रश्ननिर्माणं कुरुत**

मम पिता नगरं गच्छति ।

कस्य पिता नगरं गच्छति ?

कः नगरं गच्छति ?

(क) रामः दशरथस्य पुत्रो बभूव ।

(ख) गुरुः शिष्यान् उपदिशति ।

(ग) भगिनी सर्पं दण्डेन ताडयति ?

(घ) पिपासिताय जलं देहि ।

(ङ) दुर्जनानां विश्वासो नैव कर्तव्यः ।

अष्टाविंशः पाठः

हलन्तपुँल्लिङ्गप्रकरणे

# नकारान्तशब्दाः

नकारलोपनिषेधकं सूत्रम्

**न ङिसम्बुद्ध्योः ८ । २ । ८ ॥**

**नस्य लोपो न ङौ सम्बुद्धौ च । हे राजन् ।**

(नलोपः, न, ङि-सम्बुद्ध्योः)

सरलार्थः- ङि-प्रत्यये परे सम्बुद्धौ च परतः नकारस्य लोपो न भवति ।

राजन्शब्दात् सम्बुद्धौ, सस्य हल्ङ्यादिलोपे, 'राजन्' इत्यवस्थायां नकारस्य 'न लोपः प्रातिपदिकान्तस्य' इति सूत्रेण लोपे प्राप्ते अनेन सूत्रेण नलोपस्य निषेधे 'हे' शब्दस्य पूर्वप्रयोगे 'हे राजन्' इति रूपं सिद्ध्यति ।

**वा.२७ ङावुत्तरपदे प्रतिषेधो वक्तव्यः । ब्रह्मनिष्ठः । राजानौ । राजानः । राज्ञः ॥**

सरलार्थः- उत्तरपदपरके ङौ परे नकारस्य लोपो भवति । तेन 'ब्रह्मणि निष्ठा यस्य सः' इति विग्रहे 'ब्रह्मन् निष्ठा' इत्यत्र नकारस्य लोपः सिद्ध्यति ।

ननु राजन्शब्दाद् भ्यामि 'राजन् भ्याम्' इत्यवस्थायां 'न लोपः प्रातिपदिकान्तस्य' इति, सूत्रेण नकारस्य लोपे 'राज भ्याम्' इति जाते 'सुपि च' इति दीर्घः स्यात्, 'पूर्वत्रासिद्धम्' इति नलोपस्य असिद्धत्वे तु राजाश्वः इत्यादौ अपि दीर्घो न स्याद् इत्यतः आह-

नलोपासिद्धत्वनियामकं नियमसूत्रम्-

**नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ८ । २ । २ ॥**

**सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र - राजाश्व इत्यादौ । इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न । राजभ्याम् । राजभिः । राज्ञि, राजनि । राजसु ॥**

(सुप्-स्वर-संज्ञा-तुक्-विधिषु, कृति, नलोपः, पूर्वत्र, असिद्धम्)

सरलार्थः- सुब्विधौ, स्वरविधौ, संज्ञाविधौ, कृत्प्रत्ययसम्बन्धिनि तुग्विधौ च कर्तव्ये एव नलोपः

असिद्धो भवति, न तु अन्यत्र । एतेन 'राज भ्याम्' इत्यादिषु प्रयोगेषु सुब्बिधेः सत्त्वात् नलोपस्य असिद्धत्वमेव । 'राजाश्व' इत्यादौ दीर्घादौ कर्तव्ये तु नलोपः सिद्धः एव भवति ।

अत्र इदं ज्ञेयम् - सूत्राणां सिद्धासिद्धत्वव्यवस्था 'पूर्वत्रासिद्धम्' इति सूत्रेण विहिता । अनेन सूत्रेण पुनः एषु विधिषु कर्तव्येषु नलोपस्य असिद्धत्वविधानात् 'सिद्धे सति आरभ्यमाणो विधिर्नियमाय कल्पते' इति न्यायात्, अत्र नियमः- नलोपः असिद्धश्चेद् एषु विधिषु कर्तव्येषु एव नान्यत्र इति ।

**यज्वा । यज्वानौ । यज्वानः ॥**

## अल्लोपनिषेधकं सूत्रम्

**न संयोगाद्वमन्तात् ६ । ४ । १३७ ॥**

**वमन्तसंयोगादनोऽकारस्य लोपो न । यज्वनः । यज्वना । यज्वभ्याम् ॥ ब्रह्मणः । ब्रह्मणा ॥**

(वमन्तात्, संयोगात्, अनः, भस्य, अङ्गस्य, अत्, लोपः, न)

सरलार्थः- वकारान्ताद्, मकारान्ताच्च संयोगात् परो यः अन् तस्य अकारस्य लोपो न भवति ।

यज्वन्शब्दाद् द्वितीयाविभक्तौ बहुवचने शसि अनुबन्धलोपे 'यज्वन् अस्' इत्यवस्थायां 'अल्लोपोऽनः' इति सूत्रेण 'अन्' इत्यस्य अकारस्य लोपे प्राप्ते अनेन सूत्रेण निषेधे, वर्णसम्मेलने 'यज्वनः' इति । मकारान्तसंयोगस्य उदाहरणानि ब्रह्मणः इत्यादीनि ।

## नान्तोपधादीर्घनियामकं सूत्रम्

**इन्हन्पूषार्यम्णां शौ ६ । ४ । १२ ॥**

**एषां शावेवोपधाया दीर्घो नान्यत्र । इति निषेधे प्राप्ते-**

(इन्-हन्-पूषन्-अर्यम्णाम्, अङ्गस्य, उपधायाः, दीर्घः, असम्बुद्धौ, सर्वनामस्थाने, शौ)

सरलार्थः- इन्नन्तानां हन्नन्तानाञ्च शब्दानाम्, पूषन्-अर्यमन्-शब्दयोश्च उपधायाः शि-प्रत्ययेपरे एव दीर्घो भवति, नान्यत्र । 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण नान्तस्य उपधाया दीर्घस्य पूर्वतः एव सिद्धेः पुनः शौ परे एषां शब्दानां दीर्घविधानात् शौ एव परे एषां शब्दानां दीर्घो नान्यत्र इति नियमः सिद्धो भवति । तेन वृत्रहन्शब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'वृत्रहन् स्' इत्यवस्थायां 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण

नान्तोपधाया दीर्घे प्राप्ते अनेन सूत्रेण हन्नन्तशब्दस्य उपधायाः शौ परे एव दीर्घो भवतीति नियमाद् अत्र दीर्घस्य निषेधे-

### इन्नादीनामुपधाया दीर्घविधायकं सूत्रम्

**सौ च ६ । ४ ।१३**

**इन्नादीनामुपधाया दीर्घोऽसम्बुद्धौ सौ । वृत्रहा । हे वृत्रहन् ॥**

**(इन्-हन्-पूषन्-अर्यम्णाम्, अङ्गस्य, असम्बुद्धौ, सौ, सर्वनामस्थाने, च, उपधायाः, दीर्घः)**

सम्बुद्धिभिन्ने सु-प्रत्यये परे सति इन्नन्तानां हन्नन्तानां च शब्दानाम्, पूषन्-अर्यमन्-शब्दयोश्च उपधाया दीर्घो भवति । यथा- 'वृत्रहन्+सु' इत्यवस्थायां पूर्वसूत्रेण दीर्घनिषेधे प्राप्ते अनेन पुनः दीर्घः ।

### णत्वविधायकं सूत्रम्

**एकाजुत्तरपदे णः ८ । ४ ।१२ ॥**

**एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णः । वृत्रहणौ ॥**

(पूर्वपदात्, रषाभ्यां, प्रातिपदिकान्त-नुम्-विभक्तिषु, एकाजुत्तरपदे, नः, णः, अट्कुप्वाङ्नुम्व्यवाये, अपि)

सरलार्थः- एकः अच् यत्र सः एकाच्, एकाज् उत्तरपदं यस्य तस्मिन् समासे पूर्वस्थनिमित्ताभ्यां रेफषकाराभ्यां परस्य प्रातिपदिक-नुम्-विभक्तिषु विद्यमानस्य नकारस्य णकारादेशो भवति, अट्-कवर्ग-पवर्ग-आङ्-नुम् एतेषां व्यवधानेऽपि ।

'वृत्रहन् औ' इत्यत्र 'हन्' इति एकाजुत्तरपदं वर्तते, अतः 'वृत्र' इति पूर्वपदे विद्यमानाद् रेफादुत्तरस्य 'हन्' इत्यस्य नकारस्य अनेन णकारादेशे 'वृत्रहणौ' इति रूपं सिद्ध्यति ।

### कुत्व-विधायकं विधिसूत्रम्

**हो हन्तेर्ञ्णिन्नेषु ७ । ३ । ५४ ॥**

**ञिति णिति प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वम् । वृत्रघ्नः इत्यादि । एवं शाङ्र्गिन्, यशस्विन्, अर्यमन्, पुषन् ॥**

(हन्तेः, अङ्गस्य, हः, कुः, ञ्णित्-नेषु)

सरलार्थः- ञित्प्रत्यये, णित्प्रत्यये, नकारे च परे हन्धातोः अवयवस्य हकारस्य स्थाने कवर्गादेशो भवति ।

'वृत्रहन् शस्' इति स्थिते शसः अनुबन्धलोपे 'वृत्रहन् अस्' इत्यवस्थायां भसंज्ञायाम् 'अल्लोपोऽनः' इति सूत्रेण अकारस्य लोपे 'वृत्रह् न् अस्' इति जाते, नकारे परे हकारस्य अनेन सूत्रेण कुत्वेन घकारे वर्णसम्मेलने 'वृत्रघ्नः' इति रूपं सिद्धम् ।

### मघवन्शब्दस्य तृ इत्यन्तादेशविधायकं विधिसूत्रम्

**मघवा बहुलम् ६ । ४ । १२८ ॥**

**मघवन्शब्दस्य वा तृ इत्यन्तादेशः । ऋ इत् ॥**

(मघवा, तृ, बहुलम्)

सरलार्थः- मघवन्शब्दस्य 'तृ' इति अन्तादेशो विभाषया भवति । 'तृ' इत्यत्र ऋकारः इत्संज्ञकः ।

मघवन्शब्दात् प्रथमैकवचने सुप्रत्यये अनेन सूत्रेण मघवन्शब्दस्य नकारस्य स्थाने विभाषया 'तृ' इत्यादेशे अनुबन्धलोपे 'मघवत् स्' इति जाते आह-

### नुमागमविधायकं विधिसूत्रम्

**उगिदचां सर्वनामस्थानेऽधातोः ७ । १ । ७० ॥**

**अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम्स्यात्सर्वनामस्थाने परे । मघवान् । मघवन्तौ । मघवन्तः । हे मघवन् । मघवद्भ्याम् । तृत्वाभावे मघवा । सुटि राजवत् ॥**

(अधातोः, उगिदचाम्, अङ्गस्य, नुम्, सर्वनामस्थाने)

सरलार्थः- उक् इत् यस्य स उगित् । धातुभिन्नस्य उगितः, नलोपिनः अञ्च्धातोश्च नुमागमो भवति सर्वनामस्थाने परे ।

'मघवत् स्' इत्यवस्थायां 'तृ' इत्यादेशे ऋकारस्य इत्वाद् अनेन नुमागमे, मित्वाद् अन्त्यादचः परे कृते 'मघव न् त् स्' इति जाते, सकारस्य हल्ङ्यादिलोपे, तकारस्य संयोगान्तलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण दीर्घे 'मघवान्' इति रूपं सिद्ध्यति । अत्र हि 'मघवा बहुलम्' इति सूत्रे बहुलग्रहणाद् दीर्घे कर्तव्ये संयोगान्तलोपस्य न असिद्धत्वम् ।

त्रन्तादेशभावपक्षे मघवन्-शब्दस्य रूपाणि सर्वनामस्थाने, हलादौ प्रत्यये च राजन्-शब्दवद् भवन्ति । शस्-प्रत्यये तु-

## सम्प्रसारणविधायकं विधिसूत्रम्

**श्वयुवमघोनामतद्धिते ६ । ४ । १३३ ॥**

**अन्नन्तानां भानामेषामतद्धिते संप्रसारणम् । मघोनः । मघवभ्याम् । एवं श्वन्, युवन् ॥**

(अनः, श्वन्-युवन्-मघोनाम्, भस्य, अङ्गस्य, सम्प्रसारणम्, अतद्धिते)

सरलार्थः- अन्नन्तानां श्वन्-युवन्-मघवन्शब्दानां तद्धितभिन्ने प्रत्यये परे संप्रसारणं भवति । मघवन्शब्दात् शस्विभक्तौ अनुबन्ध लोपे 'मघवन् अस्' इति जाते अनेन सूत्रेण वकारस्य सम्प्रसारणे उकारादेशे 'मघ उ अन् अस्' इति जाते सम्प्रसारणाच्च इति पूर्वरूपे 'मघ उन् अस्' इति जाते 'आद् गुणः' इति सूत्रेण गुणे, सकारस्य रुत्वे, विसर्गे च कृते 'मघोनः' इति रूपं सिद्ध्यति ।

## सम्प्रसारणनिषेधकं सूत्रम्

**न सम्प्रसारणे सम्प्रसारणम् ६ । १ । ३७ ॥**

**सम्प्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात् । इति यकारस्य नेत्वम् । अत एव ज्ञापकादन्त्यस्य यणः पूर्वं संप्रसारणम् । यूनः । यूना । युवभ्याम् इत्यादि ॥**

(सम्प्रसारणे, सम्प्रसारणम्, न)

सरलार्थः- सम्प्रसारणे परे सति पूर्वस्य यणः स्थाने सम्प्रसारणादेशो न भवति ।

युवन्शब्दात् शस्प्रत्ययेऽनुबन्धलोपे 'युवन् अस्' इत्यवस्थायां 'यचि भम्' इति सूत्रेण भसंज्ञायाम् 'इग्यणः सम्प्रसारणम्' इति सूत्रसहकारेण 'श्वयुवमघोनामतद्धिते' इति सूत्रेण वकारस्य सम्प्रसारणे 'यु उ अन् अस्' इति जाते 'सम्प्रसारणाच्च' इति सूत्रेण पूर्वरूपैकादेशे 'यु उन् अस्' इत्यवस्थायां पुनः यकारस्यापि सम्प्रसारणे प्राप्ते, उकाररूपे सम्प्रसारणे परे पूर्वस्य यकारस्य अनेन सूत्रेण सम्प्रसारणनिषेधे, सवर्णदीर्घे, वर्णसम्मेलने 'यूनस्' इति जाते सकारस्य रुत्वे, विसर्गे च 'यूनः' इति रूपं सिद्ध्यति ।

**अर्वा । हे अर्वन् ॥**

## अर्वन्शब्दस्य 'तृ' इत्यन्तादेशविधायकं विधिसूत्रम्

**अर्वणस्त्रसावनञः ६ । ४ । १२७ ॥**

**नञा रहितस्यार्वन्नित्यस्याङ्गस्य 'तृ' इत्यन्तादेशो न तु सौ । अर्वन्तौ । अर्वन्तः ।**

**अर्वद्भ्यामित्यादि ॥**

(अनञः, अर्वणः, अङ्गस्य, तृ, असौ)

सरलार्थः- अर्वन्शब्दस्य स्थाने 'तृ' इत्यन्तादेशो भवति सुभिन्ने प्रत्यये परे न तु नञ्समासे ।

'अर्वन् औ' इति स्थिते अनेन सूत्रेण नकारस्य स्थाने 'तृ' इत्यन्तादेशेऽनुबन्धलोपे 'अर्वत् औ' इत्यवस्थायाम् उगिदचां सर्वनामस्थानेऽधातोः इति सूत्रेण नुमागमेऽनुबन्धलोपे वर्णसम्मेलने 'अर्वन्तौ' इति रूपं सिद्ध्यति ।

## आकारान्तादेशविधायकं विधिसूत्रम्

**पथिमथ्यृभुक्षामात् ७ ।१ ।८५ ॥**

**एषामाकारोऽन्तादेशः स्यात् सौ परे ॥**

(पथिन्-मथिन्-ऋभुक्षाम्, आत्, सौ)

सरलार्थः- पथिन्-मथिन्-ऋभुक्षिन्-शब्दानां अन्त्यवर्णस्य स्थाने आकारादेशो भवति सौ परे ।

पथिन्शब्दात् सौ, अनुबन्धलोपे 'पथिन् स्' इति स्थिते अनेन नकारस्य स्थाने आकारादेशे 'पथि आ स्' इति जाते-

## अकारादेशविधायकं विधिसूत्रम्

**इतोऽत् सर्वनामस्थाने ७ ।१ ।८६ ॥**

**पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे ॥**

(पथिन्-मथिन्-ऋभुक्षाम्, इतः, अत्, सर्वनामस्थाने)

सरलार्थः- पथिन्-मथिन्-ऋभुक्षिन्-शब्दानाम् इकारस्य स्थाने अकारादेशो भवति सर्वनामस्थाने परे ।

'पथि आ स्' इत्यवस्थायाम् अनेन पथिन्शब्दस्य इकारस्य अकारे 'पथ् अ आ स्' इति जाते आह -

## न्थादेशविधायकं विधिसूत्रम्

**थो न्थः ७ ।१ ।८७ ॥**

**पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने । पन्थाः । पन्थानौ । पन्थानः ॥**

(पथिमथोः, थः, न्थः, सर्वनामस्थाने)

**सरलार्थः**- पथिन् मथिन् इत्यनयोः शब्दयोः थकारस्य 'न्थ्' इत्यादेशो भवति, सर्वनामस्थाने परे । 'पथ् अ आ स्' इत्यवस्थायाम् अनेन सूत्रेण थकारस्य स्थाने न्थादेशे 'पन्थ् अ आ स्' इति जाते, सवर्णदीर्घे 'पन्थास्' इति जाते, सकारस्य रुत्वे, विसर्गे च 'पन्थाः' इति रूपं सिद्धयति ।

### पथ्यादेः टेर्लोपविधायकं विधिसूत्रम्

**भस्य टेर्लोपः ७ ।१ ।८८ ॥**

**भस्य पथ्यादेष्टेर्लोपः । पथः । पथा । पथिभ्याम् ॥ एवं मथिन्, ऋभुक्षिन् ॥**

(पथि-मथि-ऋभुक्षाम्, भस्य, टेः, लोपः)

**सरलार्थः**- भसंज्ञकानां पथिन्-मथिन्-ऋभुक्षिन्शब्दानां टिभागस्य लोपो भवति । पथिन्शब्दात् तृतीयाविभक्तौ एकवचने टाप्रत्ययेऽनुबन्धलोपे, भसंज्ञायाम् 'अचोऽन्त्यादि टि' इति सूत्रेण 'इन्' भागस्य टिसंज्ञायाम् अनेन सूत्रेण टिभागस्य लोपे, वर्णसम्मेलने 'पथा' इति रूपं सिद्धयति ।

### षट्संज्ञाविधायकं सूत्रम्

**ष्णान्ता षट् १ ।१ ।२४ ॥**

**षान्ता नान्ता च सङ्ख्या षट्संज्ञा स्यात् । पञ्चन्शब्दो नित्यं बहुवचनान्तः । पञ्च । पञ्च । पञ्चभिः । पञ्चभ्यः । पञ्चभ्यः । नुट् ॥**

(ष्णान्ता, सङ्ख्या, षट्)

**सरलार्थः**- षकारान्ता नकारान्ताश्च सङ्ख्यावाचकाः शब्दाः षट्संज्ञका भवन्ति ।

पञ्चन्-शब्दस्य प्रातिपदिकसंज्ञायां तस्मात् जस्-प्रत्ययेऽनुबन्धलोपे पञ्चन्शब्दस्य अनेन सूत्रेण षट्संज्ञायां 'षड्भ्यो लुक्' इति सूत्रेण जसो लुकि 'पञ्चन्' इति जाते नकारस्य 'न लोपः प्रातिपदिकान्तस्य' इति लोपे 'पञ्च' इति रूपं सिद्धयति ।

### नान्तस्य उपधाया दीर्घविधायकं सूत्रम्

**नोपधायाः ६ ।४ ।७ ॥**

**नान्तस्योपधाया दीर्घो नामि । पञ्चानाम् । पञ्चसु ॥**

(नः, उपधायाः, दीर्घः, नामि)

सरलार्थः- नामि परे नान्तस्य उपधायाः स्थाने दीर्घादेशो भवति ।

पञ्चन्शब्दात् षष्ठीविभक्तौ बहुवचने आम्-प्रत्यये 'पञ्चन् आम्' इत्यवस्थायां पञ्चन्शब्दस्य 'ष्णान्ता षट्' इति सूत्रेण षट्संज्ञायां तस्मात्परस्य आमः 'षट्चतुर्भ्यश्च' इति सूत्रेण नुडागमेऽनुबन्धलोपे, वर्णसम्मेलने च 'पञ्चन् नाम्' इति जाते उपधासंज्ञायाम् अनेन सूत्रेण नान्तस्य उपधाया दीर्घे 'पञ्चान् नाम्' इति जाते, पदसंज्ञायाम्, नकारस्य लोपे 'पञ्चानाम्' इति ।

## अष्टन्शब्दस्य आकारान्तादेशविधायकं विधिसूत्रम्

**अष्टन आ विभक्तौ ७ । २ । ८४ ॥**

**हलादौ वा स्यात् ॥**

(अष्टनः, आ, हलि, विभक्तौ)

सरलार्थः- अष्टन्शब्दस्य अन्त्यवर्णस्य स्थाने विभाषया आकारादेशो भवति हलादिषु विभक्तिषु परतः ।

## औशादेशविधायकं विधिसूत्रम्

**अष्टाभ्य औश् ७ ।१ ।२१ ॥**

**कृताकारादष्टनो जश्शसोरौश् । अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति । अष्टौ । अष्टौ । अष्टाभिः । अष्टाभ्यः । अष्टाभ्यः । अष्टानाम् । अष्टासु । आत्वाभावे अष्ट, पञ्चवत् ॥**

(अष्टाभ्यः, जश्शसोः, औश्)

सरलार्थः- कृतोऽस्ति आकारः यस्मिन् अष्टन्शब्दे तादृशाद् अष्टन्शब्दात् परयोः जश्शसोः स्थाने 'औश्' आदेशो भवति । शकारस्य इत्संज्ञायां लोपे 'औ' इति अवशिष्यते ।

अष्टन्शब्दस्य प्रातिपदिकसञ्ज्ञायां तस्माद् जस्प्रत्यये 'अष्टन् अस्' इत्यवस्थायाम् 'अष्टाभ्य औश्' इति सूत्रेण जसः स्थाने 'औश्' आदेशेऽनुबन्धलोपे, शित्वात् सर्वादेशे 'अष्टन् औ' इति जाते 'अष्टाभ्य औश्' इति सूत्रे 'अष्टभ्यः' इति वक्तव्ये 'अष्टाभ्यः' इति निर्देशाद् जसि परेऽपि अनेन सूत्रेण आत्वे 'अष्ट आ औ' इति जाते सवर्णदीर्घे 'वृद्धिरेचि' इति वृद्धौ 'अष्टौ' इति रूपं सिद्ध्यति ।

## प्रयोगसिद्धिप्रकारः

**यूनः**

युवन्शब्दाद् द्वितीयाविभक्तौ बहुवचने शस् प्रत्ययेऽनुबन्धलोपे 'युवन् अस्' इति जाते अङ्गसंज्ञायाम्, भसंज्ञायां च सञ्जातायां 'श्वयुवमघोनामतद्धिते' इति सूत्रेण युवन्शब्दस्य यकार वकारयोः सम्प्रसारणे प्राप्ते 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रनियमेन पूर्वं वकारस्य सम्प्रसारणे उकारादेशे 'यु उ अन् अस्' इति जाते 'सम्प्रसारणाच्च' इति पूर्वरूपे 'यु उन् अस्' इति जाते, सवर्णदीर्घे 'यून् अस्' इति जाते यकारस्य सम्प्रसारणनिषेधे, वर्णयोगे, पदकार्ये 'यूनः' इति रूपं सिद्धम् ।

## शब्दरूपावलिः

| मघवन्शब्दस्य 'तृ'इत्यन्तादेशाभावपक्षे रूपाणि- | | |
|---|---|---|
| मघवा | मघवानौ | मघवानः |
| मघवानम् | मघवानौ | मघोनः |
| मघोना | मघवभ्याम् | मघवभिः |
| मघोने | मघवभ्याम् | मघवभ्यः |
| मघोनः | मघवभ्याम् | मघवभ्यः |
| मघोनः | मघोनोः | मघोनाम् |
| मघोनि | मघोनोः | मघवसु |
| हे मघवन् ! | हे मघवानौ ! | हे मघवानः ! |

| पथिन्शब्दस्य रूपाणि- | | |
|---|---|---|
| पन्थाः | पन्थानौ | पन्थानः |
| पन्थानम् | पन्थानौ | पथः |
| पथा | पथिभ्याम् | पथिभिः |
| पथे | पथिभ्याम् | पथिभ्यः |
| पथः | पथिभ्याम् | पथिभ्यः |
| पथः | पथोः | पथाम् |
| पथि | पथोः | पथिसु |
| हे पन्थाः ! | हे पन्थानौ ! | हे पन्थानः ! |

### वाक्येषु प्रयोगानुशीलनम्

१. स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।

२. यज्वानः यज्ञं कुर्वन्ति ।

३. वृत्रघ्नः देवराजस्य पत्नी शची अस्ति ।

४. हे मघवन् ! स्वकीयवज्रेण राक्षसान् जहि ।

५. सर्वकारः यूनां कृते समुचितशिक्षायाः व्यवस्थां करोति ।

६. साधवः येन पथा गच्छन्ति, तेनैव पथा अस्माभिः गन्तव्यम् ।

७. पञ्चामृते पञ्चानाम् अमृतानां सम्मिश्रणं भवति ।

८. अद्य विद्यालये अष्टौ छात्राः अनुपस्थिताः सन्ति ।

## अभ्यासः

**१. प्रदत्तविकल्पेभ्यः समुचितमुत्तरं समादाय प्रश्नानामुत्तरं लिखत**

(क) ङौ उत्तरपदे किं भवति ? (नलोपस्य निषेधः, नलोपः)

(ख) इन्हन्पूषार्यम्णां शब्दानां कुत्र दीर्घो भवति ? (असम्बुद्धौ सौ, सर्वनामस्थाने)

(ग) पथ्यादेरिकारस्य सर्वनामस्थाने परे किं भवति ? (लोपः, अकारादेशः)

(घ) 'एकाजुत्तरपदे णः' इति सूत्रं किं करोति ? (णत्वम्, उपधालोपम्)

**२. निम्नाङ्कितप्रश्नानामुत्तराणि लिखत**

(क) नलोपः कुत्र असिद्धः, कुत्र च सिद्धः ?

(ख) केषां शब्दानां शौ एव उपधाया दीर्घः ?

(ग) युवन्शब्दे यकारस्य सम्प्रसारणं किमर्थं न भवति ?

(घ) षट्संज्ञा केषां भवति ? ससूत्रं लिखत ।

(ङ) अष्टाभ्य इत्यत्र कृतात्वनिर्देशः किं ज्ञापयति ?

**३. अधस्तनसूत्राणां सरलार्थं लिखत**

(क) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति

(ख) हो हन्तेर्ञ्णिन्नेषु

(ग) उगिदचां सर्वनामस्थानेऽधातोः

(घ) न सम्प्रसारणे सम्प्रसारणम्

४. समुचितपदविन्यासेन रिक्तस्थानानि पूरयत

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अर्वा | ......... | .......... |
| .......... | अर्वन्तौ | .......... |
| .......... | .......... | अर्वद्भिः |
| अर्वते | ...... | अर्वद्भ्यः |
| .......... | अर्वद्भ्याम् | .......... |
| अर्वतः | .......... | ......... |
| ........... | .......... | अर्वत्सु |
| .......... | हे अर्वन्तौ ! | .......... |

५. अधस्तनरूपाणि ससूत्रं साधयत

(क) राज्ञाम् (ख) यज्वनः

(ग) वृत्रहा (घ) मघवान्

(ङ) पन्थाः (च) पञ्चानाम्

(छ) अष्टौ

हलन्तपुँल्लिङ्गप्रकरणे

# ऋत्विगादिशब्दाः

### क्विन्प्रत्ययविधायकं विधिसूत्रम्

**ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ३ । २ । ५९ ॥**

**एभ्यः क्विन्, अञ्चेः सुप्युपपदे, युजिक्रुञ्चोः केवलयोः, क्रुञ्चेर्नलोपाभावश्च निपात्यते । कनावितौ ॥**

(ऋत्विक्-दधृक्-स्रक्-दिक्-उष्णिक्-अञ्चु-युजि-क्रुञ्चाम्, च, धातोः, क्विन्)

सरलार्थः- ऋतुपूर्वकाद् यज्धातोः, ञिधृषा प्रागल्भ्ये इति धातोः, दिश अतिसर्जने इत्यस्माद्धातोः, सृज विसर्गे इति धातोः, उत्पूर्वकात् ष्णिह्धातोः, अञ्चु गतिपूजनयोः इति धातोः, युजिर् योगे इति धातोः, क्रुञ्च कौटिल्याल्पीभावयोः इति धातोश्च क्विन् प्रत्ययो भवति । तत्र अञ्चेः सुप्युपदेः एव क्विन्, युजिक्रुञ्चिभ्यां केवलाभ्यां क्विन्, क्रुञ्चेः नलोपाभावश्च निपात्यते । क्विन्-प्रत्ययस्य ककार-नकारौ इत्संज्ञकौ वर्तेते ।

ऋतुपूर्वकाद् यज्धातोः 'ऋत्विग्दधृक्स्रग्दि......' इत्यादिना सूत्रेण क्विन्-प्रत्यये अनुबन्धलोपे 'ऋतु यज् व्' इति जाते-

### कृत्संज्ञाविधायकं सूत्रम्

**कृदतिङ् ३ । १ । ९३ ॥**

**अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् ॥**

(धातोः, अतिङ्, प्रत्ययः, कृत्)

सरलार्थः- 'धातोः' इति सूत्रस्य अधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञको भवति । अत्र 'ऋतु यज् व्' इत्यवस्थायां वकारस्य कृत्संज्ञायाम् 'अपृक्त एकाल् प्रत्ययः' इति सूत्रेण वकारस्य अपृक्तसंज्ञायाञ्च आह-

### वलोप-विधायकं विधिसूत्रम्

**वेरपृक्तस्य ६ । १ । ६७ ॥**

**अपृक्तस्य वस्य लोपः ॥**

(अपृक्तस्य, वेः, लोपः)

सरलार्थः- अपृक्तसंज्ञकस्य वकारस्य लोपो भवति । अनेन वकारस्य लोपे 'ऋतु यज्' इत्यवस्थायां लुप्तस्य क्विन्प्रययस्य कित्वात् 'वचिस्वपियजादीनां किति' इति यकारस्य सम्प्रसारणे, पूर्वरूपे 'ऋतु इज्' इति जाते यणि, वर्णयोगे निष्पन्नस्य ऋत्विज्-शब्दस्य प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे, सकारस्य हल्ङ्यादिलोपे 'ऋत्विज्' इति जाते-

## कुत्व-विधायकं विधिसूत्रम्

**क्विन्प्रत्ययस्य कुः ८ । २ । ६२ ॥**

**क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः पदान्ते । अस्यासिद्धत्वाच्चोः कुरिति कुत्वम् । ऋत्विक्, ऋत्विग् । ऋत्विजौ । ऋत्विग्भ्याम् ॥**

(क्विन्प्रत्ययस्य, पदस्य, अन्ते, कुः)

सरलार्थः- क्विन्प्रत्ययः यस्माद्धातोः विहितः तादृशस्य धातोः स्थाने कवर्गान्तादेशो भवति, पदान्ते ।

'ऋत्विज्' इत्यवस्थायां जकारस्य अनेन सूत्रेण कुत्वे प्राप्ते, अस्य 'पूर्वत्रासिद्धम्' इति असिद्धत्वात् 'चोः कुः' इति कुत्वेन गकारे 'ऋत्विग्' इति जाते गकारस्य विभाषया चर्त्वेन ककारे 'ऋत्विक्' इति, चर्त्वाभावे 'ऋत्विग्' इति च रूपे सिद्ध्यतः ।

## नुमागमविधायकं विधिसूत्रम्

**युजेरसमासे ७ । १ । ७१ ॥**

**युजेः सर्वनामस्थाने नुम् स्यादसमासे । सुलोपः । संयोगान्तलोपः । कुत्वेन नस्य ङः । युङ् । अनुस्वारपरसवर्णौ । युञ्जः । युग्भ्याम् ॥**

(युजेः, नुम्, सर्वनामस्थाने, असमासे)

सरलार्थः- युज्धातोः नुमागमो भवति, सर्वनामस्थाने परे, असमासे ।

युज्धातोः 'ऋत्विदधृ...' इत्यादिना क्विन्प्रत्यये कृदन्तत्वात्प्रातिपदिकसंज्ञायां तस्मात् सौ अनुबन्धलोपे 'युज् स्' इति जाते अनेन सूत्रेण नुमागमेऽनुबन्धलोपे 'युन्ज् स्' इत्यवस्थायां

सकारस्य हल्ङ्यादिलोपे, जकारस्य 'संयोगान्तस्य लोपः' इति सूत्रेण लोपे 'युन्' इति जाते नकारस्य 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण कुत्वेन ङकारे 'युङ्' इति रूपं सिद्ध्यति ।

### कुत्वविधायकं विधिसूत्रम्

**चोः कुः ८ । २ । ३० ॥**

**चवर्गस्य कवर्गः स्याज्झलि पदान्ते च । सुयुक्, सुयुग् । सुयुजौ । सुयुग्भ्याम् ॥ खन् । खञ्जौ । खन्भ्याम् ॥**

(चोः, कुः, झलि, पदस्य, अन्ते)

सरलार्थः- चवर्गस्य स्थाने कवर्गादेशो भवति, झलि परे, पदान्ते च ।

सुयुज्शब्दात् सु-प्रत्ययेऽनुबन्धलोपे सकारस्य हल्ङ्यादिलोपे 'सुयुज्' इत्यस्य पदत्वात् 'चो कुः' इति सूत्रेण कुत्वेन गकारे, तस्य विभाषया चर्त्वेन ककारे 'सुयुक्' इति, चर्त्वाभावे 'सुयुग्' इति च रूपे सिद्ध्यतः ।

### षकारादेशविधायकं विधिसूत्रम्

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८ । २ । ३६ ॥**

**झलि पदान्ते च । जश्त्वचर्त्वे । राट्, राड् । राजौ । राजः । राड्भ्याम् ॥ एवं विभ्राट्, देवेट्, विश्वसृट् ॥**

(व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-छ-शाम्, षः, झलि, पदस्य, अन्ते)

सरलार्थः- व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज् एतेषां धातूनाम्, छकारान्तानां शब्दानाम्, शकारान्तानां शब्दानाञ्च अन्त्यस्य वर्णस्य स्थाने षकारादेशो भवति, झलि परे, पदान्ते च ।

'राजते=प्रकाशते' इत्यर्थे वर्तमानाद् राज्शब्दात् प्रथमाविभक्तौ एकवचने सुप्रत्ययेऽनुबन्धलोपे, सकारस्य हल्ङ्यादिलोपे 'राज्' इत्यस्य पदसंज्ञायाम् अनेन सूत्रेण जकारस्य षकारादेशे 'झलां जशोऽन्ते' इति जश्त्वेन डकारे, तस्य विभाषया चर्त्वेन टकारे च कृते 'राट्' इति, चर्त्वाभावे 'राड्' इति च रूपे सिद्ध्यतः ।

**परौ व्रजेः षः पदान्ते (वा. ...) । परावुपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदान्ते षत्वमपि । परिव्राट् । परिव्राजौ ॥**

सरलार्थः- परि-शब्दे उपपदे सति व्रज्-धातोः क्विप्-प्रत्ययो भवति, धातोः उपधाया दीर्घश्च भवति, पदान्ते अन्त्यवर्णस्य स्थाने षकारादेशोऽपि भवति ।

परिपूर्वकाद् व्रज्धातोः अनेन वार्तिकेन क्विप्प्रत्यये सर्वापहारिलोपे, अनेनैव व्रज्धातोः उपधायाः दीर्घे, अनेनैव जकारस्य षकारादेशे च कृते 'परिव्राष्' इत्यवस्थायां षकारस्य जश्त्वेन डकारे, तस्य विभाषया चर्त्वेन टकारे 'परिव्राट्' इति, चर्त्वाभावे 'परिव्राड्' इति च रूपे सिद्ध्यतः ।

## विश्वशब्दस्य दीर्घान्तादेशविधायकं विधिसूत्रम्

**विश्वस्य वसुराटोः ६ । ३ । १२८ ॥**

**विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ राट्शब्दे च परे । विश्वाराट्, विश्वाराड् । विश्वराजौ । विश्वाराड्भ्याम् ॥**

(विश्वस्य, दीर्घः, वसुराटोः)

सरलार्थः- विश्वशब्दस्य अन्त्यवर्णस्य स्थाने दीर्घादेशो भवति, वसुशब्दे राट्शब्दे च परे ।

'विश्वस्मिन् राजते' इत्यर्थे 'विश्वराज्' इत्यस्य प्रातिपदिकसंज्ञायां तस्मात् सौ, अनुबन्धलोपे, सकारस्य हल्ङ्यादिलोपे, जकारस्य 'व्रश्चभ्रस्ज...' इत्यादिना षत्वे, तस्य जश्त्वेन डकारे 'विश्वराड्' इत्यवस्थायाम् अनेन सूत्रेण विश्वशब्दस्य अन्त्यस्य अकारस्य दीर्घे 'विश्वाराड्' इति जाते डकारस्य विभाषया चर्त्वेन टकारे 'विश्वाराट्' इति, चर्त्वाभावे 'विश्वाराड्' इति च ।

## संयोगाद्योः सकारककारयोर्लोपविधायकं विधिसूत्रम्

**स्कोः संयोगाद्योरन्ते च ८ । २ । २९ ॥**

**पदान्ते झलि च यः संयोगस्तदाद्योः स्कोर्लोपः । भृट् । सस्य श्चुत्वेन शः । झलां जश् झशि इति शस्य जः । भृज्जौ । भृड्भ्याम् ॥ त्यदाद्यत्वं पररूपत्वं च ॥**

(संयोगाद्योः, स्कोः, लोपः, झलि, पदस्य, अन्ते)

सरलार्थः- संयोगाद्योः सकारककारयोर्लोपो भवति, झलि परे, पदान्ते च ।

भृस्ज्शब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'भृस्ज् स्' इत्यवस्थायां हल्ङ्यादिलोपे 'भृस्ज्' इत्यस्य पदसंज्ञायाम् अनेन सूत्रेण संयोगादेः सकारस्य लोपे 'भृज्' इति जाते 'व्रश्चभ्रस्जसृजमृज.....' इत्यादिना जस्य षत्वे 'झलां जशोऽन्ते' इति षस्य जश्त्वेन डकारे, तस्य विभाषया चर्त्वेन टकारे 'भृट्' इति, चर्त्वाभावे 'भृड्' इति च रूपे सिद्ध्यतः ।

भृज्जौ इत्यत्र च भृस्ज्शब्दाद् औप्रत्यये 'भृस्ज् औ' इति जाते, सकारस्य श्चुत्वेन शकारे, तस्य 'झलां जश् झशि' इति जश्त्वेन जकारे 'भृज्जौ' इति रूपं सिद्ध्यति ।

## सत्व-विधायकं विधिसूत्रम्

**तदोः सः सावनन्त्ययोः ७ । २ । १०६ ॥**

**त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ । स्यः । त्यौ । त्ये ॥ सः । तौ । ते ॥ यः । यौ । ये ॥ एषः । एतौ । एते ॥**

(अनन्त्ययोः, तदोः, सः, सौ) अनन्त्ययोः = अन्ते भवः अन्त्यः, न अन्त्यः अनन्त्यः, तयोः ।

सरलार्थः- त्यदादीनां शब्दानां अनन्ते विद्यमानयोः तकार दकारयोः स्थाने सकारादेशो भवति, सुप्रत्यये परे ।

त्यद्-शब्दस्य प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'त्यद् स्' इत्यवस्थायां 'त्यदादीनामः' इति सूत्रेण दकारस्य अत्वे 'अतो गुणे' इति पररूपे च कृते 'त्य स्' इति जाते अनेन सूत्रेण तकारस्य स्थाने सकारादेशे 'स्यस्' इति जाते, सकारस्य रुत्वे, विसर्गे च 'स्यः' इति रूपं सिद्धम् ।

शेषविभक्तिषु अत्व-पररूपाभ्यां त्य-शब्दे जाते सर्ववत्प्रक्रियया त्यौ, त्ये इत्यादि । तद्-शब्दात् सुप्रत्यये, अत्वे, पररूपे 'त स्' इति जाते सकारस्य रूत्वे, विसर्गे च 'तः' इत्यवस्थायाम् अनेन सूत्रेण तकारस्य सत्वे 'सः' इति । तद् औ - त औ - तौ (वृद्धिरेचि) ।

यद् सु - यद् स् - य स् (अत्वे, पररूपे)- यर् - यः ।

एतद् - सु - एतद् स् - एतस् - एतस् - एतर् - एतः - एसः (तदोः सः...) - एषः (आदेशप्रत्यययोः) ।

### ऋत्विक्-ऋत्विग्

'ऋतौ यजते' इति विग्रहे ऋतूपपदाद् यज्धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति सूत्रेण क्विन्प्रत्यये, सर्वापहारिलोपे 'ऋतु यज्' इति जाते 'वचिस्वपियजादीनां किति' इति सूत्रेण यकारस्य सम्प्रसारणे पूर्वरूपे 'ऋतु इज्' इति जाते यणि 'ऋत्विज्' इत्यस्य 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां सुप्रत्यये, हल्ङ्याब्भ्यो इति सलोपे च सति पदसंज्ञायां 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण जकारस्य कुत्वेन गकारे 'वाऽवसाने' इति वैकल्पिके चर्त्वे 'ऋत्विक्', चर्त्वाभावे 'ऋत्विग्' इति रूपे सिद्ध्यतः ।

## शब्दरूपावलिः

### ऋत्विज्-शब्दस्य रूपाणि

| | | |
|---|---|---|
| ऋत्विक्-ग् | ऋत्विजौ | ऋत्विजः |
| ऋत्विजम् | ऋत्विजौ | ऋत्विजः |
| ऋत्विजा | ऋत्विग्भ्याम् | ऋत्विग्भिः |
| ऋत्विजे | ऋत्विग्भ्याम् | ऋत्विग्भ्यः |
| ऋत्विजः | ऋत्विग्भ्याम् | ऋत्विग्भ्यः |
| ऋत्विजः | ऋत्विजोः | ऋत्विजाम् |
| ऋत्विजि | ऋत्विजोः | ऋत्विक्षु |
| हे ऋत्विक्-ग् ! | हे ऋत्विजौ ! | हे ऋत्विजः ! |

### विश्वराज्-शब्दस्य रूपाणि

| | | |
|---|---|---|
| विश्वराट्-ड् | विश्वराजौ | विश्वराजः |
| विश्वराजम् | विश्वराजौ | विश्वराजः |
| विश्वराजा | विश्वाराड्भ्याम् | विश्वाराड्भिः |
| विश्वराजे | विश्वाराड्भ्याम् | विश्वाराड्भ्यः |
| विश्वराजः | विश्वाराड्भ्याम् | विश्वाराड्भ्यः |
| विश्वराजः | विश्वराजोः | विश्वराजाम् |
| विश्वराजि | विश्वराजोः | विश्वाराट्त्सु, विश्वराट्सु |
| हे विश्वराट्-ड् ! | हे विश्वराजौ ! | हे विश्वराजः ! |

### वाक्येषु प्रयोगानुशीलनम्

१. ऋत्विग् ऋतुयागं कुरुते ।

२. सुयुजौ भक्तौ भगवन्तं ध्यायन्तौ स्तः ।

३. अस्माभिः खञ्जाम् उपहासो न विधेयः ।

४. ईश्वरः विश्वसृड् वर्तते ।

५. योगयुक्तः परिव्राट् संसारात् पारं गमिष्यति ।

६. यः सम्यक् कार्याणि करोति, सः साफल्यं लभते ।

## अभ्यासः

१. **परस्परं मेलयत**

| | |
|---|---|
| क्विन्प्रत्ययस्य कुः | दीर्घः |
| व्रश्चभ्रस्ज... | सत्वम् |
| विश्वस्य वसुराटोः | कुत्वम् |
| तदोः सः सावनन्त्ययोः | षत्वम् |

२. **अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) 'कृदतिङ्' इति सूत्रं किं करोति ?

(ख) युजेः कस्यामवस्थायां नुमागमो भवति ? ससूत्रं लिखत ।

(ग) 'परौ व्रजेः षः पदान्ते' इति वार्तिकेन कुत्र किं निपात्यते ?

(घ) कीदृशयोः सकार-ककारयोर्लोपः भवति ?

(ङ) त्यदादिषु केषां सकारादेशो जायते ?

३. **सूत्रवृत्तिं सरलार्थं च लिखत**

(क) ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च

(ख) व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः

(ग) स्कोः संयोगाद्योरन्ते च

४. **प्रातिपदिक-विभक्ति-वचनानि निर्दिशत**

(क) सुयुजौ (ख) खञ्जः (ग) विभ्राट् (घ) भृड्भ्याम् (ङ) त्ये

५. **ससूत्रं रूपसिद्धिप्रक्रियां प्रदर्शयत**

(क) ऋत्विग्भ्याम् (ख) खन्भ्याम् (ग) परिव्राट् (घ) भृज्जौ (ङ) स्ते

त्रिंशः पाठः

हलन्तपुँल्लिङ्गप्रकरणे

# युष्मदस्मच्छब्दौ

## अमादेशविधायकं विधिसूत्रम्

**ङे प्रथमयोरम् ७ । १ । २८ ॥**

**युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः ॥**

(युष्मद्-अस्मद्भ्याम्, ङे, प्रथमयोः, अम्)

सरलार्थः- युष्मद्-अस्मद्-शब्दाभ्याम् उत्तरस्य ङेप्रत्ययस्य स्थाने, प्रथमाद्वितीयाविभक्त्योः स्थाने च अमादेशो भवति ।

युष्मदस्मद्भ्यां शब्दाभ्यां प्रथमैकवचने सुप्रत्यये, तस्य अनेन सूत्रेण अमादेशे 'युष्मद् अम्', 'अस्मद् अम्' इति जाते-

## त्व-अह-विधायकं विधिसूत्रम्

**त्वाहौ सौ ७ । २ । ९४ ॥**

**अनयोर्मपर्यन्तस्य त्वाहौ आदेशौ स्तः ॥**

(युष्मदस्मदोः, मपर्यन्तस्य, त्व-अहौ, सौ)

सरलार्थः- युष्मद्-शब्दस्य, अस्मद्-शब्दस्य च मपर्यन्तभागस्य स्थाने क्रमेण 'त्व, अह' इत्येतौ आदेशौ भवतः, सु-प्रत्यये परे । अनेन 'युष्म्' इत्यस्य 'त्व', 'अस्म्' इत्यस्य 'अह' इत्यादेशे 'त्व अद् अम्', 'अह अद् अम्' इति जाते 'अतो गुणे' इति सूत्रेण पररूपैकादेशे 'त्वद् अम्', 'अहद् अम्' इति जाते-

## टिलोपविधायकं विधिसूत्रम्

**शेषे लोपः ७ । २ । ९० ॥**

**एतयोष्टिलोपः । त्वम् । अहम् ॥**

(युष्मदस्मदोः, शेषे, विभक्तौ, अङ्गस्य, लोपः)

सरलार्थः- आत्वस्य, यत्वस्य च निमित्ताद् भिन्नविभक्तौ परतः सत्यां युष्मद्-शब्दस्य, अस्मद्-शब्दस्य च टिभागस्य लोपो भवति ।

'त्वद् अम्', 'अहद् अम्' इत्यवस्थायाम् अनेन टेर्लोपे, वर्णसम्मेलने च कृते 'त्वम्, अहम्' चेति रूपे सिद्ध्यतः ।

### युव-आव-विधायकं विधिसूत्रम्

**युवावौ द्विवचने ७ । २ । ९२ ॥**

**द्वयोरुक्तावनयोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ ॥**

(युष्मदस्मदोः, मपर्यन्तस्य, युव-आवौ, द्विवचने, विभक्तौ)

सरलार्थः- द्वित्ववाचिनोः युष्मदस्मदोः मपर्यन्तस्य स्थाने क्रमेण 'युव, आव' इत्यादेशौ भवतः विभक्तौ परतः ।

'युष्मद् औ', 'अस्मद् औ' इत्यवस्थायाम् 'ङे प्रथमयोरम्' इति सूत्रेण औकारस्य अमादेशे, अनेन सूत्रेण मपर्यन्तस्य भागस्य क्रमेण युव, आव इत्यादेशे 'अतो गुणे' इति सूत्रेण पररूपे च कृते 'युवद् अम्', 'आवद् अम्' इति जाते-

### आत्वविधायकं विधिसूत्रम्

**प्रथमायाश्च द्विवचने भाषायाम् ७ । २ । ८८ ॥**

**औङ्येतयोरात्वं लोके । युवाम् । आवाम् ॥**

(युष्मदस्मदोः, आः, प्रथमायाः, च, द्विवचने, विभक्तौ, भाषायाम्)

सरलार्थः- औप्रत्यये परे युष्मदस्मदोः अन्त्यस्य वर्णस्य स्थाने आकारादेशो भवति, लौकिकभाषायाम् । 'युवद् अम्', 'आवद् अम्' इत्यवस्थायाम् अनेन आकारान्तादेशे, 'युवा अम्, आवा अम्' इति जाते 'अमि पूर्वः' इति पूर्वरूपे 'युवाम्, आवाम्' इति रूपे सिद्ध्यतः ।

### यूय-वय-विधायकं विधिसूत्रम्

**यूयवयौ जसि ७ । २ । ९३ ॥**

**अनयोर्मपर्यन्तस्य । यूयम् । वयम् ॥**

(युष्मदस्मदोः, मपर्यन्तस्य, यूय-वयौ, जसि)

सरलार्थः- युष्मदस्मदोः मपर्यन्तस्य स्थाने क्रमेण 'यूय, वय' आदेशौ भवतः, जसि परे ।

'युष्मद् जस्', 'अस्मद् जस्' इत्यवस्थायां 'ङे प्रथमयोरम्' इति सूत्रेण जसः स्थाने अमादेशे, अनेन सूत्रेण मपर्यन्तस्य भागस्य क्रमेण 'यूय, वय' इत्यादेशे 'अतो गुणे' इति सूत्रेण पररूपे च कृते 'यूयद् अम्', 'वयद् अम्' इति जाते 'शेषे लोपः' इति टेर्लोपे, वर्णसम्मेलने यूयम्, वयम् इति रूपे सिष्पद्येते ।

## त्व-म-विधायकं विधिसूत्रम्

**त्वमावेकवचने ७ । २ । ९७ ॥**

**एकस्योक्तावनयोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ ॥**

(युष्मदस्मदोः, मपर्यन्तस्य, त्व-मौ, एकवचने, विभक्तौ)

सरलार्थः- एकत्ववाचिनोः युष्मदस्मदोः मपर्यन्तस्य स्थाने क्रमेण 'त्व, म' इत्यादेशौ भवतः, विभक्तौ परतः ।

युष्मद्-अस्मद्-शब्दाभ्यां द्वितीयाविभक्तौ एकवचने अम्प्रत्यये तस्य 'ङे प्रथमयोरम्' इति अमादेशे अनेन सूत्रेण मपर्यन्तस्य स्थाने क्रमेण 'त्व, म' इत्यादेशयोः कृतयोः 'त्व अद् अम्', 'म अद् अम्' इति जाते 'अतो गुणे' इति पररूपे 'त्वद् अम्', 'मद् अम्' इति जाते-

## आत्वविधायकं विधिसूत्रम्

**द्वितीयायां च ७ । २ । ८७ ॥**

**अनयोरात्स्यात् । त्वाम् । माम् ॥**

(युष्मदस्मदोः, आः, द्वितीयायाम्, विभक्तौ, च)

सरलार्थः- युष्मदस्मदोः स्थाने आकारान्तादेशो भवति, द्वितीयायां विभक्तौ परतः ।

'त्वद् अम्', 'मद् अम्' इति स्थिते अनेन उभयत्र दकारस्य स्थाने आकारादेशे, सवर्णदीर्घे 'अमि पूर्वः' इति सूत्रेण पूर्वरूपे 'त्वाम्', 'माम्' इति रूपे सिद्ध्यतः ।

## नकारादेशविधायकं विधिसूत्रम्

**शसो न ७ । १ । २९ ॥**

**आभ्यां शसो नः स्यात् । अमोऽपवादः । आदेः परस्य । संयोगान्तलोपः । युष्मान् । अस्मान् ॥**

(युष्मदस्मद्भ्याम्, शसः, न)

सरलार्थः- युष्मदस्मद्भ्यां परस्य शस्-प्रत्ययस्य स्थाने नकारादेशो भवति । अनेन सूत्रेण 'आदेः परस्य' इति सूत्रसहकारेण शसः आदेः अकारस्य नकारादेशो भवति । अन्त्यस्य सकारस्य च 'संयोगान्तस्य लोपः' इति लोपः ।

'युष्मद् शस्', 'अस्मद् शस्' इति स्थिते शसः अनुबन्धलोपे, असः अकारस्य अनेन सूत्रेण नकारे, सकारस्य संयागान्तलोपे 'द्वितीयां च' इति युष्मदस्मदोः आकारान्तादेशे, सवर्णदीर्घे 'युष्मान्, अस्मान्' इति रूपे सिद्ध्यतः ।

## यकारादेशविधायकं विधिसूत्रम्

**योऽचि ७ । २ । ८९ ॥**

**अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः । त्वया । मया ॥**

(युष्मदस्मदोः, अङ्गस्य, यः, अनादेशे, अचि, विभक्तौ)

सरलार्थः- युष्मदस्मदोः शब्दयोः स्थाने यकारादेशो भवति, आदेशरहितासु अजादिषु विभक्तिषु परासु । अलोऽन्त्यपरिभाषया अन्त्यवर्णस्य यत्वं भवति ।

'युष्मद् टा', 'अस्मद् टा' इति स्थितेऽनुबन्धलोपे 'युष्मद् आ', 'अस्मद् आ' इत्यवस्थायां 'त्वमावेकवचने' इति सूत्रेण युष्मदस्मदोः मपर्यन्तस्य 'त्व/म' इत्यादेशे 'त्व अद् आ, म अद् आ' इत्यवस्थायाम् 'अतो गुणे' इति पररूपे 'त्वद् आ, मद् आ' इत्यवस्थायाम् अनेन सूत्रेण उभयत्र दकारस्य स्थाने यकारादेशे, वर्णसम्मेलने 'त्वया, मया' इति रूपे सिद्ध्यतः ।

## आकारादेशविधायकं विधिसूत्रम्

**युष्मदस्मदोरनादेशे ७ । २ । ८६ ॥**

**अनयोरात्स्यादनादेशे हलादौ विभक्तौ । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ॥**

(युष्मदस्मदोः, आः, अनादेशे, हलादौ, विभक्तौ)

सरलार्थः- युष्मदस्मदोः स्थाने आकारान्तादेशो भवति, आदेशरहितासु हलादिषु विभक्तिषु परासु ।

युष्मदस्मदोः तृतीयाविभक्तौ द्विवचने भ्यामि 'युष्मद् भ्याम्', 'अस्मद् भ्याम्' इति जाते

मपर्यन्तस्य स्थाने 'युवावौ द्विवचने' इति सूत्रेण क्रमेण 'युव, आव' इत्यादेशे 'अतो गुणे' इति पररूपे च कृते 'युवद् भ्याम्', 'आवद् भ्याम्' इति जाते, अनेन सूत्रेण आकारान्तादेशे, सवर्णदीर्घे 'युवाभ्याम्, आवाभ्याम्' इति रूपे सिद्ध्यतः ।

### तुभ्यमह्यादेशविधायकं विधिसूत्रम्

**तुभ्यमह्यौ ङयि ७ । २ । ९५ ॥**

**अनयोर्मपर्यन्तस्य । टिलोपः । तुभ्यम् । मह्यम् ॥**

(युष्मदस्मदोः, मपर्यन्तस्य, तुभ्य-मह्यौ, ङयि)

सरलार्थः- युष्मदस्मद्शब्दयोः मपर्यन्तस्य भागस्य स्थाने क्रमेण 'तुभ्य, मह्य' इत्यादेशौ भवतः, ङेविभक्तौ परतः ।

'युष्मद् ङे', 'अस्मद् ङे' इत्यवस्थायां 'ङे प्रथमयोरम्' इति सूत्रेण 'ङे' इत्यस्य स्थाने अमादेशे अनेन सूत्रेण युष्मदस्मदोः मपर्यन्तस्य स्थाने क्रमेण 'तुभ्य, मह्य' इत्यादेशयोः कृतयोः 'अतो गुणे' इति पररूपे 'शेषे लोपः' इति टेर्लोपे, वर्णसम्मेलने 'तुभ्यम्, मह्यम्' इति रूपे सिद्ध्यतः ।

### भ्यमादेशविधायकं विधिसूत्रम्

**भ्यसोऽभ्यम् ७ ।१ ।३० ॥**

**आभ्यां परस्य । युष्मभ्यम् । अस्मभ्यम् ॥**

(युष्मदस्मद्भ्याम्, भ्यसः, अभ्यम्)

सरलार्थः- युष्मदस्मद्भ्यां परस्य भ्यसः स्थाने अभ्यमादेशो भवति ।

युष्मदस्मद्भ्यां चतुर्थीविभक्तौ बहुवचने भ्यसि 'युष्मद् भ्यस्', 'अस्मद् भ्यस्' इति जाते अनेन सूत्रेण भ्यसः स्थाने अभ्यमादेशे 'शेषे लोपः' इति टेर्लोपे, वर्णसम्मेलने च 'युष्मभ्यम्, अस्मभ्यम्' इति रूपे सिद्ध्यतः ।

### अत्-आदेशविधायकं विधिसूत्रम्

**एकवचनस्य च ७ ।१ ।३२ ॥**

**आभ्यां ङसेरत् । त्वत् । मत् ॥**

(युष्मदस्मद्भ्याम्, पञ्चम्याः, एकवचनस्य, च, अत्)

सरलार्थः- युष्मदस्मद्भ्यां परस्य ङसिप्रत्ययस्य स्थाने 'अत्' आदेशो भवति ।

युष्मदस्मद्भ्यां शब्दाभ्यां पञ्चमीविभक्तौ ङसिप्रत्यये अनुबन्धलोपे 'युष्मद् अस्', 'अस्मद् अस्' इति जाते असः स्थाने अनेन सूत्रेण अत्-आदेशे मपर्यन्तस्य 'त्वमावेकवचने' इति क्रमेण त्व, म इति आदेशयोः कृतयोः 'अतो गुणे' इति पररूपे 'त्वद् अत्', 'मद् अत्' इति जाते 'शेषे लोपः' इति टेर्लोपे 'त्वत्', 'मत्' इति रूपे सिद्ध्यतः ।

## अत्-आदेशविधायकं विधिसूत्रम्

**पञ्चम्या अत् ७ । १ । ३१ ॥**

**आभ्यां पञ्चम्या भ्यसोऽत्स्यात् । युष्मत् । अस्मत् ॥**

(युष्मदस्मद्भ्याम्, पञ्चम्याः, भ्यसः, अत्)

सरलार्थः- युष्मदस्मद्भ्यां परस्य पञ्चम्या विभक्तेः बहुवचनस्य भ्यसः स्थाने अत्-आदेशो भवति ।

युष्मदस्मद्भ्यां पञ्चमीविभक्तौ बहुवचने 'युष्मद् भ्यस्', 'अस्मद् भ्यस्' इति जाते अनेन सूत्रेण भ्यसः स्थाने अदादेशे 'शेषे लोपः' इति सूत्रेण टेर्लोपे वर्णसम्मेलने 'युष्मत्', 'अस्मत्' इति रूपे सिद्ध्यतः ।

## तव-मम-विधायकं विधिसूत्रम्

**तवममौ ङसि ७ । २ । ९६ ॥**

**अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि ॥**

(युष्मदस्मदोः, मपर्यन्तस्य, तव-ममौ, ङसि)

सरलार्थः- युष्मदस्मदोः मपर्यन्तस्य स्थाने 'तव, मम' इत्यादेशौ भवतः, ङस्प्रत्यये परे ।

युष्मदस्मद्भ्यां षष्ठीविभक्तौ एकवचने ङस्प्रत्ययेऽनुबन्धलोपे 'युष्मद् अस्', 'अस्मद् अस्' इति जाते मपर्यन्तस्य स्थाने अनेन सूत्रेण तव/मम इत्यादेशे 'तव अद् अस्', मम अद् अस् इति जाते पररूपे 'तवद् अस्', 'ममद् अस्' इति जाते-

## अशादेशविधायकं विधिसूत्रम्

**युष्मदस्मद्भ्यां ङसोऽश् ७ । १ । २७ ॥**

**तव । मम । युवयोः । आवयोः ॥**

(युष्मदस्मद्भ्याम्, ङसः, अश्)

सरलार्थः- युष्मदस्मद्भ्यां शब्दाभ्यां विहितस्य ङसः स्थाने 'अश्' इत्यादेशो भवति ।

अनेन ङसः स्थाने अशादेशे अनुबन्धलोपे, शित्वात् सर्वादेशे 'शेषे लोपः' इति टेर्लोपे, वर्णसम्मेलने 'तव', 'मम' इति रूपे सिद्ध्यतः ।

### आकमादेशविधायकं विधिसूत्रम्

**साम आकम् ७ ।१ ।३३ ॥**

**आभ्यां परस्य साम आकम् स्यात् । युष्माकम् । अस्माकम् । त्वयि । मयि । युवयोः । आवयोः । युष्मासु । अस्मासु ॥**

(युष्मदस्मद्भ्याम्, सामः, आकम्) सामः= भाविनः सुट्सहितस्य आमः ।

सरलार्थः- युष्मदस्मद्भ्यां शब्दाभ्यां परस्य 'साम्' इत्यस्य स्थाने 'आकम्' इति आदेशो भवति ।

युष्मदस्मद्भ्यां षष्ठीविभक्तौ बहुवचने आमि तस्य स्थाने अनेन सूत्रेण आकमादेशे 'शेषे लोपः' इति टेर्लोपे वर्णसम्मेलने च 'युष्माकम्', 'अस्माकम्' इति रूपे सिद्ध्यतः ।

### वाम्-नौ-आदेशविधायकं विधिसूत्रम्

**युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ८ ।१ ।२० ॥**

**पदात्परयोरपादादौ स्थितयोः षष्ठ्यादिविशिष्टयोर्वां नौ इत्यादेशौ स्तः ॥**

(पदात्, युष्मदस्मदोः, अपादादौ, षष्ठी-चतुर्थी-दितीयास्थयोः, पदस्य, वाम्-नावौ)

सरलार्थः- पदात् परयोः अपादादौ स्थितयोः षष्ठीचतुर्थीद्वितीयाविभक्त्यन्तयोः युष्मदस्मदोः स्थाने क्रमेण वाम्, नौ इत्यादेशौ भवतः ।

### वस्-नस् इत्यादेशविधायकं विधिसूत्रम्

**बहुवचनस्य वस्नसौ ८ ।१ ।२१ ॥**

**उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः ॥**

(पदात्, युष्मदस्मदोः, अपदादौ, षष्ठी-चतुर्थी-द्वितीयास्थयोः, बहुवचनस्य, पदस्य, वस्-नसौ)

सरलार्थः- पदात् परयोः अपादादौ स्थितयोः षष्ठीचतुर्थीद्वितीयाविभक्तीनां बहुवचनान्तयोः युष्मदस्मदोः स्थाने क्रमेण 'वस्, नस्' इत्यादेशौ भवतः ।

### ते-मे इत्यादेशविधायकं विधिसूत्रम्

**तेमयावेकवचनस्य ८ ।१ ।२२ ॥**

**उक्तविधयोरनयोष्षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः ॥**

(पदात्, युष्मदस्मदोः, अपादादौ, षष्ठी-चतुर्थी-द्वितीयास्थयोः, एकवचनस्य, पदस्य, तेमौ)

सरलार्थः- पदात् परयोः अपादादौ स्थितयोः षष्ठीचतुर्थीविभक्त्योः एकवचनान्तयोः युष्मदस्मदोः स्थाने क्रमेण 'ते, मे' इत्यादेशौ भवतः ।

### 'त्वा, मा' इत्यादेशविधायकं विधिसूत्रम्

**त्वामौ द्वितीयायाः ८ ।१ ।२३ ॥**

**द्वितीयैकवचनान्तयोस्त्वा मा इत्यादेशौ स्तः ॥**

(पदात्, युष्मदस्मदोः, अपदादौ, द्वितीयायाः, एकवचनस्य, पदस्य, त्वामौ)

सरलार्थः- पदात् परयोः अपादादौ स्थितयोः द्वितीयाविभक्तेः एकवचनान्तयोः युष्मदस्मदोः स्थाने क्रमेण 'त्वा, मा' इत्यादेशौ भवतः ।

**श्रीशस्त्वाऽवतु मापीह दत्तात्ते मेऽपि शर्म सः ।**
**स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥**
**सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।**
**सोऽव्याद्वो नः शिवं वो नो दद्यात् सेव्योऽत्र वः स नः ॥**

इह = अस्मिन् लोके, त्वा = त्वाम्, मापि = मामपि, श्रीशः = लक्ष्मीपतिः भगवान् विष्णुः, पातु = अवतु ।

सः = विष्णुः, ते = तुभ्यम्, मेऽपि = मह्यमपि, शमम् = कल्याणम्, दत्तात् = ददातु ।

सः हरिः = सः विष्णुः, ते = तव, मेऽपि = ममापि, स्वामी = रक्षकोऽस्ति ।

विभुः = व्यापको विष्णुः, वाम् = युवाम्, नौ अपि = आवामपि, पातु = रक्षतु ।

ईशः = भगवान् विष्णुः, वाम् = युवाभ्याम्, नौ = आवाभ्याम्, सुखं ददातु = आनन्दं यच्छतु ।

हरिः = विष्णुः, वाम् = युवयोः, नौ अपि = आवयोः अपि, पतिः = रक्षकः वर्तते ।

सः = तादृशः विष्णुः, वः = युष्मान्, नः = अस्मान्, अव्यात् = पायात् ।

सः विष्णु, वः = युष्मभ्यम्, नः =अस्मभ्यम्, शिवम् = कल्याणम्, दद्यात् = ददातु ।

सः = हरिः, वः = युष्माकम्, नः अपि = अस्माकमपि, अत्र = इह जगतितले, सेव्यः =

सेवनीयोऽस्ति ।

**एकवाक्ये युष्मदस्मदादेशा वक्तव्याः** (वा. ...) । एकतिङ् वाक्यम् । ओदनं पच तव भविष्यति ।

**एते वान्नावादयोऽनन्वादेशे वा वक्तव्याः** (वा. ...) । अन्वादेशे तु नित्यं स्युः । धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्ति वा । तस्मै ते नम् इत्येव ॥

### प्रयोगसिद्धिप्रकारः

**अहम्**

अस्मद्-शब्दस्य प्रातिपदिकसंज्ञायां प्रथमाविभक्तौ एकवचने सुप्रत्ययेऽनुबन्धलोपे **'अस्मद् स्'** इति स्थिते **'ङे प्रथमयोरम्'** इति सूत्रेण सोरमादेशे **'अस्मद् अम्'** इति जाते **'मपर्यन्तस्य'** इति सूत्रसहकारेण **'त्वाहौ सौ'** इति सूत्रेण मपर्यन्तस्य **'अस्म्'** इत्यस्य **'अह'** इत्यादेशे **'अह अद् अम्'** इति जाते **'अतो गुणे'** इति पररूपे **'अहद् अम्'** इति जाते **'शेषे लोपः'** इति सूत्रेण टिलोपे **'अह् अम्'** इति जाते वर्णयोगे **'अहम्'** इति रूपं सिद्धम् ।

### शब्दरूपावलिः

| युष्मद्-शब्दस्य रूपाणि | | |
|---|---|---|
| त्वम् | युवाम् | यूयम् |
| त्वाम् | युवाम् | युष्मान् |
| त्वया | युवाभ्याम् | युष्माभिः |
| तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| त्वत् | युवाभ्याम् | युष्मत् |
| तव | युवयोः | युष्माकम् |
| त्वयि | युवयोः | युष्मासु |

| अस्मद्-शब्दस्य रूपाणि | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम् | आवाम् | अस्मान् |
| मया | आवाभ्याम् | अस्माभिः |
| मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| मत् | आवाभ्याम् | अस्मत् |
| मम | आवयोः | अस्माकम् |
| मयि | आवयोः | अस्मासु |

**वाक्येषु प्रयोगानुशीलनम्**

१. अहं नेपालमातुः पुत्रः अस्मि ।

२. शिक्षिका युष्मान् सम्यक् पाठयति ।

३. मम अनुजः मया सह निवसति ।

४. हिमालयाः अस्मभ्यम् अतीव रोचन्ते ।

५. पितरौ मां कथयतः, 'आवयोः सहायः त्वमेवासि ।'

६. अस्मासु कश्चन एकः कुशलः वक्ता भवति ।

७. ईश्वरः ते रक्षां विधास्यति, चिन्तां मा कुरु ।

८. भक्त्या नताः स्म विदधातु शुभानि सा नः ।

## अभ्यासः

**१. परस्परं मेलयत**

| 'क' खण्डः | 'ख' खण्डः |
|---|---|
| आवाम् | मे |
| त्वाम् | नौ |
| मह्यम् | त्वा |
| युष्माकम् | नः |

**२. रिक्तस्थानं पूरयत**

(क) 'त्वा+अम्' इत्यत्र ........... इति सूत्रेण सन्धिर्भवति ।

(अतो गुणे, अमि पूर्वः, अकः सवर्णे दीर्घः)

(ख) 'अस्मान्' इत्यत्र ........... इति सूत्रेण सकारलोपो भवति ।

(संयोगान्तस्य लोपः, स्कोः संयोगाद्योरन्ते च)

(ग) 'द्वितीयायां च' इति सूत्रेण ........... इत्यत्र आकारादेशो भवति ।

(यूयम्, तव, माम्)

(घ) युष्मदस्मद्भ्याम् परस्य ङसः स्थाने ........... आदेशो भवति ।

(अश्, अम्, आकारः)

**३. सूत्रैः विधीयमानं विधिं निर्दिशत**

(क) शशो न

(अ) नकारादेशः (आ) दकारलोपः (ग) शकारादेशः

(ख) प्रथमायाश्च द्विवचने भाषायाम्

(अ) युवादेशः (आ) आत्वम् (इ) विभक्तिलोपः

(ग) तुभ्यमह्यौ ङयि

(अ) ङेर्लोपः (आ) दीर्घः (इ) तुभ्यमह्यादेशः

(घ) द्वितीयायां च

(क) विभक्तिलोपः (ख) आत्वम् (ग) अमादेशः

**४. अधो निर्दिष्टानां प्रश्नानामुत्तराणि लिखत**

(क) युष्मदस्मद्-शब्दयोः कासां विभक्तीनां अमादेशो भवति ?

(ख) कासु विभक्तिषु युष्मदस्मदोः दकारस्य आकारदेशः भवति ?

(ग) युष्मदस्मदोः ङे-विभक्तेः स्थाने किम् आदिश्यते ?

(घ) युष्मदस्मदोः परस्य आमः सुडागमः कथं न भवति ?

**५. अधस्तनसूत्राणां सरलार्थं लिखत**

(क) शेषे लोपः (ख) शसो न (ग) तवममौ ङसि

(घ) योऽचि (ङ) बहुवचनस्य वस्नसौ

**६. अधस्तनरूपाणां सूत्रादिप्रदर्शनपूर्वकं सिद्धिप्रक्रियां दर्शयत**

(क) वयम् (ख) युष्मान् (ग) आवाभ्याम् (घ) तुभ्यम्

(ङ) मत् (च) युष्माकम् (छ) मयि (ज) त्वा

**७. युष्मदस्मद्-शब्दयोः समुचितं प्रयोगं विधाय लघुसंवादमेकं रचयत ।**

**८. 'श्रीशस्त्वावतु मापि' इत्यत्र त्वादीनाम् आदेशात् पूर्वं के वाक्ये भवतः ? लिखत ।**

हलन्तपुँल्लिङ्गप्रकरणे

# सुपादादिशब्दाः

सु 'शोभनौ पादौ यस्य' इत्यर्थे सुपात्, सुपाद् ॥ सुपादौ ॥

## पदादेशविधायकं विधिसूत्रम्

**पादः पत् ६ । ४ । १३० ॥**

**पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः ॥ सुपदः । सुपदा । सुपाद्भ्याम् ॥ अग्निमत्, अग्निमद् । अग्निमथौ । अग्निमथः ॥**

(भस्य, अङ्गस्य, पादः, पत्)

सरलार्थः- पाद्-शब्दः अन्ते यस्य तादृशं यद् भसंज्ञकं अङ्गम्, तदवयवस्य पाद्-शब्दस्य स्थाने पदादेशो भवति ।

सुपाद्-शब्दाद् द्वितीयाविभक्तौ बहुवचने शसि, अनुबन्धलोपे 'सुपाद् अस्' इत्यस्य भसंज्ञायाम् अङ्गसंज्ञायां च, अनेन सूत्रेण 'पाद्' इत्यस्य स्थाने पदादेशे वर्णसम्मेलने, रुत्वे, विसर्गे च 'सुपदः' इति रूपं निष्पद्यते ।

## नकारस्य लोपविधायकं विधिसूत्रम्

**अनिदितां हल उपधायाः क्ङिति ६ । ४ । २४ ॥**

**हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः किति ङिति । नुम् । संयोगान्तस्य लोपः । नस्य कुत्वेन ङः । प्राङ् । प्राञ्चौ । प्राञ्चः ॥**

(अनिदिताम्, हलः, अङ्गस्य, उपधायाः, नलोपः, क्ङिति)

सरलार्थः- इत् इत् यस्य स इदित्, न इदित् अनिदित् । अनिदितां हलन्तानाम् अङ्गानाम् उपधाया नस्य लोपो भवति, किति ङिति च परे ।

प्र-अञ्चति इत्यर्थे अञ्चु गतिपूजनयोः इत्यस्माद्धातोः क्विन्प्रत्यये, सर्वापहारिलोपे, अनेन सूत्रेण चकारात् पूर्वस्य नकारस्य लोपे 'प्र अच्' इत्यत्र सवर्णदीर्घे 'प्राच्' इत्यस्य कृदन्तत्वात् प्रातिपदिकसंज्ञायां तस्मात्सौ अनुबन्धलोपे 'प्राच् स्' इत्यवस्थायाम् 'उगिदचां

सर्वनामस्थानेऽधातोः इति नुमि 'प्रान्च् स्' इति जाते, सकारस्य हल्ङ्यादिलोपे, चकारस्य संयोगान्तलोपे, नकारस्य 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण कुत्वे 'प्राङ्' इति रूपं सिद्ध्यति । शेषेषु सर्वनामस्थानविभक्तिषु नुमि, नकारस्य अनुस्वारे परसवर्णे च कृते उक्तरूपाणि सिद्ध्यन्ति ।

शसादौ अचि 'प्र अच् अस्' इति स्थिते-

## अकारस्य लोपविधायकं विधिसूत्रम्

**अचः ६ । ४ । १३८ ॥**

**लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः ॥**

(अचः, भस्य, अङ्गस्य, अल्लोपः)

सरलार्थः- नकारस्य लोपो यत्र भवति तादृशस्य अञ्च्धातोः भस्य अकारस्य लोपो भवति । अनेन अचोऽकारस्य लोपे 'प्र च् अस्' इति जाते-

## अणः दीर्घविधायकं विधिसूत्रम्

**चौ ६ । ३ । १३८ ॥**

**लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः । प्राचः । प्राचा । प्राग्भ्याम् ॥ प्रत्यङ् । प्रत्यञ्चौ । प्रतीचः । प्रत्यग्भ्याम् ॥ उदङ् । उदञ्चौ ॥**

(चौ, पूर्वस्य, अणः, दीर्घः)

सरलार्थः- अकारस्य नकारस्य च लोपो यत्र तादृशे अञ्च्धातौ परे पूर्वस्य अणः स्थाने दीर्घादेशो भवति ।

'प्र च् अस्' इत्यवस्थायाम् अनेन चकारे परे पूर्वस्य प्रशब्दावयवस्य अकारस्य दीर्घे, वर्णसम्मेलने, सस्य रुत्वे, विसर्गे च 'प्राचः' इति रूपं निष्पद्यते ।

प्रति-अञ्चति इत्यर्थे प्रत्यङ्, उद्-अञ्चतीत्यर्थे 'उदङ्' इति च रूपे भवतः । तत्र शसि 'उद् अच् अस्' इत्यवस्थायाम् 'अचः' इति अकारस्य लोपे प्राप्ते-

## ईकारादेशविधायकं विधिसूत्रम्

**उद ईत् ६ । ३ । १३९ ॥**

**उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत् । उदीचः । उदीचा । उदग्भ्याम् ॥**

(उदः, अचः, भस्य, ईत्)

सरलार्थः- उद्शब्दाद् उत्तरस्य नकारलोपवतः अञ्च्धातोः भस्य अकारस्य स्थाने 'ईत्' इत्यादेशो भवति ।

'उद् अच् अस्' इत्यवस्थायाम् 'उद ईत्' इति सूत्रेण अचः अकारस्य ईत्-आदेशेऽनुबन्धलोपे, वर्णसम्मेलने, रुत्वे, विसर्गे च 'उदीचः' इति रूपं निष्पन्नम् ।

## समि-आदेशविधायकं विधिसूत्रम्

**समः समि ६ । ३ । ९३ ॥**

**अप्रत्ययान्तेऽञ्चतौ । सम्यङ् । सम्यञ्चौ । समीचः । सम्यग्भ्याम् ॥**

(अप्रत्यये, अञ्चतौ, उत्तरपदे, समः, समि)

सरलार्थः- अप्रत्ययान्ते अञ्च्धातौ परे सम्शब्दस्य स्थाने 'समि' इत्यादेशो भवति ।

सम्-अञ्चतीत्यर्थे क्विन्प्रत्यये सर्वापहारिलोपे नकारस्य 'अनिदिताम्' इत्यादिना लोपे, कृदन्तत्वात् प्रातिपदिकसंज्ञायां सौ 'सम् अच् स्' इति जाते 'समः समि' इति सूत्रेण समः 'समि' इत्यादेशे, यणि 'सम्यच् स्' इत्यवस्थायाम् उगिदचामिति नुमि, सकारस्य चकारस्य च लोपे, नकारस्य कुत्वेन ङकारे 'सम्यङ्' इति रूपं सिद्ध्यति ।

## सध्रि-आदेशविधायकं विधिसूत्रम्

**सहस्य सध्रिः ६ । ३ । ९५ ॥**

**तथा । सध्र्यङ् ॥**

(अप्रत्यये, अञ्चतौ, उत्तरपदे, सहस्य, सध्रिः)

सरलार्थः- अप्रत्ययान्ते अञ्च्धातौ परे सहस्य 'सध्रि' इत्यादेशो भवति ।

सम्पूर्वकाद् अञ्च्धातो 'सम्यङ्' इति रूपं पूर्वं निष्पादितम् । सहपूर्वकाद् अञ्च्धातोः सहस्य स्थाने अनेन सूत्रेण 'सध्रि' इत्यादेशे 'सध्र्यङ्' इति रूपं पूर्ववद् ज्ञेयम् ।

## तिर्यादेशविधायकं विधिसूत्रम्

**तिरसस्तिर्यलोपे ६ । ३ । ९४ ॥**

**अलुप्ताकारेऽञ्चतौ अप्रत्ययान्ते तिरसस्तिर्यादेशः । तिर्यङ् । तिर्यञ्चौ । तिरश्चः । तिर्यग्भ्याम् ॥**

(अप्रत्यये, अलोपे, अञ्चतौ, उत्तरपदे, तिरसः, तिरि)

सरलार्थः- अलुप्ताकारवति अप्रत्ययान्ते अञ्चतौ परे तिरसः 'तिरि' इत्यादेशो भवति ।

सम्पूर्वकाद् अञ्च्धातो 'सम्यङ्' इति रूपं पूर्वं निष्पादितम् । तिरस्पूर्वकाद् अञ्च्धातोः तिरसः स्थाने अनेन सूत्रेण 'तिरि' इत्यादेशे, यणि, शेषं पूर्ववत् कृत्वा 'तिर्यङ्' इति रूपं ज्ञेयम् । अलुप्ताकारवति इति विशेषणात् शसादौ न तिर्यादेशः, 'तिरश्च' इति ।

## नलोपस्य निषेधविधायकं सूत्रम्

**नाञ्चेः पूजायाम् ६ । ४ । ३० ॥**

**पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न । प्राङ् । प्राञ्चौ । नलोपाभावादलोपो न । प्राञ्चः । प्राङ्भ्याम् । प्राङ्क्षु ॥ एवं पूजार्थे प्रत्यङ्ङादयः ॥ क्रुङ् । क्रुञ्चौ । क्रुङ्भ्याम् ॥ पयोमुक्, पयोमुग् । पयोमुचौ । पयोमुग्भ्याम् ॥ उगित्त्वान्नुमि-**

(पूजायाम्, अञ्चेः, अङ्गस्य, उपधायाः, नलोपः, न, क्ङिति)

सरलार्थः- पूजार्थकस्य अञ्चतेर्धातोः उपधायां स्थितस्य नकारस्य लोपो न भवति । नकारलोपाऽभावस्य स्फुटतरं दर्शनं शसादौ । तथा हि- प्र-अञ्च्-शब्दाद् द्वितीयाविभक्तौ बहुवचने शसि 'प्र अञ्च् अस्' इत्यवस्थायां 'प्र अञ्च्' इत्यत्र सवर्णदीर्घे वर्णसम्मेलने सकारस्य रुत्वे, विसर्गे च 'प्राञ्चः' इति रूपं जायते ।

## नान्तोपधायाः दीर्घविधायकं विधिसूत्रम्

**सान्तमहतः संयोगस्य ६ । ४ । १० ॥**

**सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने । महान् । महान्तौ । महान्तः । हे महन् । महद्भ्याम् ॥**

(सान्तमहतः, संयोगस्य, उपधायाः, नः, दीर्घः, असम्बुद्धौ, सर्वनामस्थाने, च)

सरलार्थः- सकारान्तसंयोगस्य उपधायाः, महत्-शब्दस्य उपधायाश्च यो नकारः, तस्य उपधाया दीर्घादेशो भवति, असम्बुद्धौ सर्वनामस्थाने परे ।

'मह्यते = पूज्यते' इत्यर्थे कर्मणि महधातो अतिप्रत्ययेऽनुबन्धलोपे वर्णसम्मेलने महत्शब्दस्य कृदन्तत्वात् प्रातिपदिकसंज्ञायां तस्मात् सौ 'उगिदचामिति' नुमि 'महन्त् स्' इत्यवस्थायाम् अनेन सूत्रेण नकारस्य उपधाया, दीर्घे 'महान्त् स्' इति जाते सकारस्य हल्ङ्यादिलोपे,

तकारस्य संयोगान्तलोपे 'महान्' इति रूपं सिद्ध्यति । अत्र संयोगान्तलोपस्य असिद्धत्वात् नलोपो न ।

## उपधाया दीर्घविधायकं विधिसूत्रम्

**अत्वसन्तस्य चाधातोः ६ । ४ । १४ ॥**

**अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे । उगित्त्वान्नुम् । धीमान् । धीमन्तौ । धीमन्तः । हे धीमन् । शसादौ महद्वत् ॥ भातेर्डवतुः । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । भवान् । भवन्तौ । भवन्तः । शत्रन्तस्य भवन् ॥**

(अधातोः, असन्तस्य, अतु, अङ्गस्य, उपधायाः, दीर्घः, असम्बुद्धौ, सौ)

सरलार्थः- अत्वन्तस्य अङ्गस्य, धातुभिन्नस्य असन्तस्य च उपधायाः स्थाने दीर्घादेशो भवति, असम्बुद्धौ सौ परे ।

धीः अस्यास्तीत्यर्थे धीमत्शब्दात् प्रथमैकवचने सौ 'धीमत् स्' इत्यवस्थायाम् अनेन सूत्रेण उपधाया दीर्घे, उगिदचामिति नुमि 'धीमान्त् स्' इत्यवस्थायां हल्ङ्यादिलोपे, तकारस्य संयोगान्तलोपे 'धीमान्' इति रूपं सिद्ध्यति ।

**प्रयोगसिद्धिप्रकारः**

**प्राङ्**

प्र-उपसर्गपूर्वकाद् अञ्चुधातोः 'ऋत्विग्दधृग्...' इत्यादिसूत्रेण क्विन्प्रत्यये सर्वापहारिलोपे च सति 'प्र अञ्च्' इति जाते 'अनिदितां हल उपधायाः क्ङिति' इति सूत्रेण नकारस्य (ञकारस्य) लोपे, सवर्णदीर्घे 'प्राच्' इत्यवस्थायां प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'प्राच् स्' इति स्थिते 'सुडनपुंसकस्य' इति सूत्रेण सर्वनामस्थानसंज्ञायाम् 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्रेण नुमागमेऽनुबन्धलोपे, मित्वादन्त्यादचः परे 'प्रान् च् स्' इति जाते अपृक्तसंज्ञायाम्, सोर्लोपे, चकारस्य संयोगान्तलोपे 'प्रान्' इति जाते 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण नकारस्य कुत्वेन ङकारादेशे 'प्राङ्' इति रूपं सिद्धम् ।

## शब्दरूपावलिः

| सुपाद्शब्दस्य रूपाणि | | |
|---|---|---|
| सुपात्-द् | सुपादौ | सुपादः |
| सुपादम् | सुपादौ | सुपदः |
| सुपदा | सुपाद्भ्याम् | सुपाद्भिः |
| सुपदे | सुपाद्भ्याम् | सुपाद्भ्यः |
| सुपदः | सुपाद्भ्याम् | सुपाद्भ्यः |
| सुपदः | सुपदोः | सुपदाम् |
| सुपदि | सुपदोः | सुपात्सु |
| हे सुपात्-द् ! | हे सुपादौ ! | हे सुपादः ! |

| प्राच्-शब्दस्य (गत्यर्थे) रूपाणि | | |
|---|---|---|
| प्राङ् | प्राञ्चौ | प्राञ्चः |
| प्राञ्चम् | प्राञ्चौ | प्राचः |
| प्राचा | प्राग्भ्याम् | प्राग्भिः |
| प्राचे | प्राग्भ्याम् | प्राग्भ्यः |
| प्राचः | प्राग्भ्याम् | प्राग्भ्यः |
| प्राचः | प्राचोः | प्राचाम् |
| प्राचि | प्राचोः | प्राक्षु |
| हे प्राङ् ! | हे प्राञ्चौ ! | हे प्राञ्चः ! |

### वाक्येषु प्रयोगानुशीलनम्

१. सुपदा जनेन शोभने उपानहौ धारितौ स्तः ।

२. अग्निमथः यजमानाः अरणिमन्थनेन अग्निं ज्वालयन्ति ।

३. तिरश्चां मध्ये कोकिलः मधुरं भाषते ।

४. सरोवरस्य निकटे बहवः क्रुञ्चः सन्ति ।

५. साधुभिः मानवानां महान् उपकारः विहितः ।

६. कदाचन भवान् मद्गृहे अपि आगच्छतु ।

### अभ्यासः

**१. कोष्ठकात् समुचितं पदमादाय रिक्तस्थानं पूरयत**

(क) पाद्-शब्दान्तस्य ........... अङ्गस्य 'पाद्' इत्यस्य पदादेशः ।

(भसंज्ञकस्य, पदसंज्ञकस्य)

(ख) उत्-शब्दात्परस्य लुप्तनकारस्य अञ्चतेः भस्याकारस्य ....... आदिश्यते ।

(ऊत्, ईत्)

(ग) सम्-उपसर्गपूर्वकाद् अञ्चुधातोः क्विन्-प्रत्यये समः स्थाने....... आदेशो भवति ।

(समि, सध्रि)

(घ) अञ्चुधातोः ........... नकारलोपो न भवति ।

(गत्यर्थे, पूजार्थे)

(ङ) सम्मानबोधको भवत्-शब्दः ........... प्रत्ययान्तो वर्तते ।

(डवतु, शतृ)

२. **सम्यच्-धीमत्शब्दयोः सर्वाणि रूपाणि लिखत ।**

३. **अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) 'चौ' इति सूत्रं कस्यामवस्थायां दीर्घं करोति ?

(ख) 'प्राङ्' इत्यत्र नकारस्य कुत्वविधानं केन सूत्रेण भवति ?

(ग) तिरसः स्थाने तिर्यादेशः कस्याम् अवस्थायां भवति ?

(घ) अञ्चुधातोः गतिपूजार्थयोः को विशेषो विधिः ?

(ङ) 'धीमान्' इत्यत्र धीमत्-शब्दस्य नुमागमः कथं सिद्ध्यति ?

४. **अधस्तनसूत्राणां सरलार्थं लिखित्वा एकैकमुदाहरणं च लिखत**

(क) पादः पत्  (ख) अनिदितां हल उपधायाः क्ङिति  (ग) सान्तमहतः संयोगस्य

५. **सूत्रार्थसङ्घटनपुरःसरम् अधस्तनरूपाणां सिद्धिप्रक्रियां दर्शयत**

| | | | |
|---|---|---|---|
| (क) सुपदः | (ख) प्राचः | (ग) उदीचा | (घ) तिर्यञ्चः |
| (ङ) प्राङ्क्षु | (च) महान्तौ | (छ) धीमान् | (ज) भवन्तः |

हलन्तपुँल्लिङ्गप्रकरणे

# दददादिशब्दाः

## अभ्यस्तसंज्ञाविधायकं सूत्रम्

**उभे अभ्यस्तम् ६ ।१ ।५ ॥**

**षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः ॥**

(द्वे, उभे, अभ्यस्तम्)

सरलार्थः- षष्ठाध्याये द्वित्वविधायकानि यानि सूत्राणि सन्ति, तैः यत्र द्वित्वं विधीयते, तत्र द्विरुक्तः समुदायः अभ्यस्तसंज्ञको भवति । अनेन सूत्रेण ददत्शब्दस्य अभ्यस्तसंज्ञायाम्-

## नुमागमनिषेधकं सूत्रम्

**नाभ्यस्ताच्छतुः ७ ।१ ।७८ ॥**

**अभ्यस्तात्परस्य शतुर्नुम् न । ददत्, ददद् । ददतौ । ददतः ॥**

(अभ्यस्तात्, शतुः, नुम्, न)

सरलार्थः- अभ्यस्तसंज्ञकात् परस्य शतृप्रत्ययस्य नुमागमो न भवति ।

दाधातोः शतृप्रत्यये, शपि, तस्य श्लौ, दा इत्यस्य 'श्लौ' इत्यनेन द्वित्वे, अभ्यासस्य ह्रस्वे, आकारस्य लोपे, वर्णसम्मेलने 'ददत्' इति जाते तस्य कृदन्तत्वात् प्रातिपदिकसंज्ञायां सौ 'ददत् स्' इति जाते 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्रेण नुमि प्राप्ते 'ददत्' इत्यस्य 'उभे अभ्यस्तम्' इति सूत्रेण अभ्यस्तसंज्ञायाम् अनेन सूत्रेण नुमो निषेधे, हल्ङ्यादिलोपे, तकारस्य जश्त्वे, वैकल्पिके चर्त्वे च 'ददत्/ददद्' इति ।

## अभ्यस्तसंज्ञाविधायकं सूत्रम्

**जक्षित्यादयः षट् ६ ।१ ।६ ॥**

**षड्धातवोऽन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः । जक्षत्, जक्षद् । जक्षतौ । जक्षतः ॥ एवं जाग्रत् । दरिद्रत् । शासत् । चकासत् ॥ गुप्, गुब् । गुपौ । गुपः । गुब्भ्याम् ॥**

(जक्षित्यादयः, षट्, अभ्यस्तम्)

सरलार्थः- जक्षि, जागृ, दरिद्रा, शास्, दीधीङ्, वेवीङ्, चकास् ऐते सप्त धातव अभ्यस्तसंज्ञका भवन्ति ।

'जक्षत् स्' इत्यवस्थायाम् 'उगिदचां...' इति नुमि प्राप्ते 'जक्षित्यादयः षट्' इति सूत्रेण अभ्यस्तसंज्ञायां नुमभावे, सस्य लोपे 'जक्षत्' इति रूपं जायते ।

## कञ्प्रत्ययविधायकं विधिसूत्रम्

**त्यदादिषु दृशोऽनालोचने कञ् च ३ । २ । ६० ॥**

**त्यदादिषूपपदेष्वज्ञानार्थाद् दृशेः कञ् स्यात् । चात् क्विन् ॥**

(त्यदादिषु, दृशः, अनालोचने, कञ्, क्विन्, च)

सरलार्थः- त्यदादिषु शब्देषु उपपदेषु अज्ञानार्थकाद् दृश्धातोः कञ्प्रत्ययो भवति, चात् क्विन्प्रत्ययश्च भवति ।

तद्-शब्दे उपपदे दृश्धातोः क्विनि, सर्वापहारिलोपे, उपपदसमासे, सुब्लुकि 'तद् दृश्' इति जाते-

## आकारान्तादेशविधायकं विधिसूत्रम्

**आ सर्वनाम्नः ६ । ३ । ९१ ॥**

**सर्वनाम्न आकारोऽन्तादेशः स्याद्दृग्दृशवतुषु । तादृक्, तादृग् । तादृशौ । तादृशः । तादृग्भ्याम् ॥ व्रश्चेति षः । जश्त्वचर्त्वे । विट्, विड् । विशौ । विशः । विड्भ्याम् ॥**

(सर्वनाम्नः, आ, दृग्दृशवतुषु)

सरलार्थः- सर्वनामसंज्ञकशब्दानाम् आकारः अन्तादेशो भवति दृक्-दृश्-वतुषु परेषु ।

'तद् दृश' इत्यवस्थायां तद्शब्दस्य दकारस्य स्थाने अनेन सूत्रेण आकारादेशे, सवर्णदीर्घे तादृश्शब्दस्य प्रातिपदिकसंज्ञायां प्रथमैकवचने सौ, सस्य लोपे च कृते 'तादृश्' इति जाते शस्य 'व्रश्चभ्रस्ज्...' इत्यादिना षत्वे, षकारस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे, तस्य कुत्वेन गकारे, तस्य विभाषया चर्त्वे 'तादृक्' इति, चर्त्वाभावे 'तादृग्' इति च रूपे सिद्ध्यतः । क्विन्प्रत्ययाभावे कञ्प्रत्ययेऽनुबन्धलोपे, वर्णसम्मेलने तादृशः, तादृशौ, तादृशाः इत्यादीनि रूपाणि अदन्तरामवद् ज्ञेयानि ।

## नशेः कवर्गान्तादेशविधायकं विधिसूत्रम्

**नशेर्वा ८ । २ । ६३ ॥**

**नशेः कवर्गोऽन्तादेशो वा पदान्ते । नक्, नग्, नट्, नड् । नशौ । नशः । नग्भ्याम्, नड्भ्याम् ॥**

(नशेः, वा, कुः, पदस्य, अन्ते)

सरलार्थः- नश्धातोः विभाषया कवर्गान्तादेशो भवति पदान्ते ।

नश्-इत्यस्य प्रातिपदिकसंज्ञायां सौ, हल्ङ्यादिलोपे 'नश्' इति जाते शस्य 'व्रश्चभ्रस्ज्...' इत्यादिना षत्वे, षस्य जश्त्वेन डकारे, डकारस्य अनेन सूत्रेण विभाषया कुत्वेन गकारे, गकारस्य विभाषया चर्त्वेन ककारे 'नक्' इति, चर्त्वाभावे 'नग्' इति च रूपे सिद्ध्यतः । कुत्वाभावे षत्वे, जश्त्वे, विभाषया चर्त्वे, 'नट्', चर्त्वाभावे 'नड्' इति च रूपे सिद्ध्यतः ।

## क्विन्-प्रत्ययविधायकं विधिसूत्रम्

**स्पृशोऽनुदके क्विन् ३ । २ । ५८ ॥**

**अनुदके सुप्युपपदे स्पृशेः क्विन् । घृतस्पृक्, घृतस्पृग् । घृतस्पृशौ । घृतस्पृशः ॥ दधृक्, दधृग् । दधृषौ । दधृग्भ्याम् ॥ रत्नमुषौ । रत्नमुड्भ्याम् ॥ षट्, षड् । षड्भिः । षड्भ्यः । षण्णाम् । षट्सु ॥ रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषो रुरिति रुत्वम् ॥**

(अनुदके, सुपि, स्पृशः, क्विन्)

सरलार्थः- उदकभिन्ने सुबन्ते उपपदे स्पृश्धातोः क्विन्-प्रत्ययो भवति ।

घृतं स्पृशतीत्यर्थे स्पृश्धातोः क्विन्प्रत्यये घृतस्पृश्-शब्दात् प्रथमाया एकवचने 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन 'घृतस्पृक्, घृतस्पृग्' इति च रूपे सिद्ध्यतः ।

## दीर्घादेशविधायकं विधिसूत्रम्

**र्वोरुपधाया दीर्घ इकः ८ । २ । ७६ ॥**

**रेफवान्तयोर्धात्वोरुपधाया इको दीर्घः पदान्ते । पिपठीः । पिपठिषौ । पिपठीर्भ्याम् ॥**

(र्-वोः, धातोः, उपधायाः, इकः, दीर्घः, पदस्य, अन्ते)

सरलार्थः- रेफान्तस्य, वकारान्तस्य च धातोः उपधाया दीर्घो भवति, पदान्ते ।

पिपठिष् इत्यस्य प्रातिपदिकसंज्ञायां सौ 'पिपठिष् स्' इति जाते, सकारस्य

हल्ङ्यादिलोपे, 'पिपठिष्' इत्यवस्थायां षत्वस्य असिद्धत्वात् 'ससजुषो रुः' इति रुत्वेऽनुबन्धलोपे 'पिपठिर् स्' इति जाते, उपधाया इकारस्य अनेन सूत्रेण दीर्घे, रेफस्य विसर्गे 'पिपठीः' इति रूपं सिद्ध्यति ।

### मूर्धन्यादेशविधायकं विधिसूत्रम्

**नुम्विसर्जनीयशर्व्यवायेऽपि ८ । ३ । ५८ ॥**

**एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः । ष्टुत्वेन पूर्वस्य षः । पिपठीष्षु, पिपठीःषु ॥ चिकीः । चिकीर्षौ । चिकीर्भ्याम् । चिकीर्षु ॥**

(इण्कोः, सः, मूर्धन्यः, नुम्-विसर्जनीय-शर्-व्यवाये, अपि)

सरलार्थः- इण्कुभ्यां परस्य सकारस्य मूर्धन्यादेशो भवति, नुमः, विसर्गस्य, शरश्च व्यवधानेऽपि ।

पिपठिष्शब्दात् सप्तमीविभक्तौ सुपि 'पिपठिष् सु' इति जाते षत्वस्य असिद्धत्वात् 'ससजुषो रुः' इति रुत्वेऽनुबन्धलोपे 'र्वोरुपधाया: दीर्घ इकः' इति उपधाया दीर्घे 'रोः सुपि' इति रोर्विसर्गे तस्य 'वा शरि' इत्यनेन पाक्षिके विसर्गे 'पिपठीःसु', इत्यवस्थायाम् अनेन सकारस्य षत्वे 'पिपठीःषु' इति । सकारपक्षे पूर्वस्य सकारस्य 'ष्टुना ष्टुः' इति ष्टुत्वेन षकारे 'पिपठीष्षु' इति च सिद्ध्यति ।

**प्रयोगसिद्धिप्रकारः**

**तादृक्**

'तदिव दृश्यते' इति विग्रहे तद्-उपपदपूर्वकाद् दृश्धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' इति सूत्रेण क्विन्प्रत्यये सर्वापहारिलोपे च सञ्जाते 'तद् दृश्' इति स्थिते 'आ सर्वनाम्नः' इति सूत्रेण तद्शब्दस्य दकारस्य स्थाने आकारादेशे, सवर्णदीर्घे 'तादृश्' इति जाते प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे, अपृक्तसंज्ञायां सोर्लोपे 'तादृश्' इति जाते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण शकारस्य षत्वे, जश्त्वे 'तादृड्' इति जाते 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण डकारस्य कुत्वेन गकारादेशे 'तादृग्' इति जाते अवसाने विकल्पेन चर्त्वे 'तादृक्', चर्त्वाभावे 'तादृग्' इति रूपे सिद्ध्यतः ।

## शब्दरूपावलिः

| भवत्शब्दस्य रूपाणि | | |
|---|---|---|
| भवान् | भवन्तौ | भवन्तः |
| भवन्तम् | भवन्तौ | भवतः |
| भवता | भवद्भ्याम् | भवद्भिः |
| भवते | भवद्भ्याम् | भवद्भ्यः |
| भवतः | भवद्भ्याम् | भवद्भ्यः |
| भवतः | भवतोः | भवताम् |
| भवति | भवतोः | भवत्सु |
| | | |

| ददत्शब्दस्य रूपाणि | | |
|---|---|---|
| ददत् | ददतौ | ददतः |
| ददतम् | ददतौ | ददतः |
| ददता | ददद्भ्याम् | ददद्भिः |
| ददते | ददद्भ्याम् | ददद्भ्यः |
| ददतः | ददद्भ्याम् | ददद्भ्यः |
| ददतः | ददतोः | ददताम् |
| ददति | ददतोः | ददत्सु |
| हे ददत् ! | हे ददतौ ! | हे ददतः ! |

### वाक्येषु प्रयोगानुशीलनम्

१. पिता भगिन्यै मिष्टान्नं ददत् अस्ति ।

२. जाग्रतः युवानः देशविकासाय यतन्ते ।

३. मया तादृग् जनः इतः पूर्वं कदापि न दृष्टः ।

४. अस्माकं देहः नग् अस्ति ।

५. रत्नमुषौ चौरौ दृष्ट्वा बालकः बिभेति ।

६. पिपठिषौ छात्रौ संस्कृतव्याकरणं पठतः ।

### अभ्यासः

१. **उपयुक्तेषु वाक्येषु (√) अनुपयुक्तवाक्येषु (×) इति चिह्नेन सङ्केतयत**

(क) 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण कदाचित् क्विप्प्रत्ययान्तस्यापि कुत्वं भवति ।

(ख) 'नाभ्यस्ताच्छतुः' इति सूत्रेण नुमागमस्य निषेधो न भवति ।

(ग) 'नशेर्वा' इति सूत्रेण नित्यं कुत्वं भवति ।

(घ) 'पिपठीः' इत्यत्र षत्वस्यासिद्धत्वेन रुत्वं भवति ।

२. रत्नमुष्शब्दस्य सर्वाणि रूपाणि लिखत ।

३. निम्नाङ्कितसूत्राणां अर्थं लिखत

(क) अत्वसन्तस्य चाधातोः

(ख) उभे अभ्यस्तम्

(ग) जक्षित्यादयः षट्

(घ) त्यदादिषु दृशोऽनालोचने कञ्च

(ङ) नुम्विसर्जनीयशर्व्यवायेऽपि

४. अधो लिखितप्रश्नानामुत्तराणि लिखत

(क) 'उभे अभ्यस्तम्' इति सूत्रेण केषामभ्यस्तसंज्ञा भवति ?

(ख) जक्षित्यादयो धातवः के ?

(ग) विश्शब्दस्य शकारस्य षत्वविधायकं सूत्रं किम् ?

(घ) स्पृश्धातोः कस्यामवस्थायां क्विन्प्रत्ययो भवति ?

(ङ) 'र्वोरुपधायाः दीर्घ इकः' इति सूत्रं किं विदधाति ?

(च) केषां व्यवधानेऽपि सस्य मूर्धन्यादेशो भवति ?

५. अधस्तनरूपाणां सिद्धिप्रक्रियां दर्शयत

(क) ददतः (ख) दरिद्रत् (ग) तादृक्-ग् (घ) नक्, नग्

(ङ) घृतस्पृक् (च) षण्णाम् (छ) पिपठीर्भ्याम् (ज) चिकीर्षु

६. प्रातिपदिक-विभक्ति-वचनानि निर्दिशत

गुब्भ्याम्, विशः, दधृषौ, चिकीर्भ्याम्

हलन्तपुँल्लिङ्गप्रकरणे

# विद्वसादिशब्दाः

विद्वान् । विद्वांसौ । हे विद्वन् ॥

सम्प्रसारणादेशविधायकं विधिसूत्रम्

**वसोः सम्प्रसारणम् ६ । ४ । १३१ ॥**

**वस्वन्तस्य भस्य सम्प्रसारणं स्यात् । विदुषः । वसुस्रंस्विति दः । विद्वद्भ्याम् ॥**

(वसोः, भस्य, सम्प्रसारणम्)

सरलार्थः- वसुप्रत्ययान्तस्य भसंज्ञकस्याङ्गस्य सम्प्रसारणादेशो भवति ।

विद्वस्शब्दात् द्वितीयाविभक्तौ बहुवचने शसि 'विद्वस् अस्' इति जाते, भसंज्ञायाम् अनेन सूत्रेण वकारस्य सम्प्रसारणे उकारादेशे 'सम्प्रसारणाच्च' इति पूर्वरूपे च कृते 'विदुस् अस्' इति जाते प्रत्ययावयवस्य सस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे, वर्णसम्मेलने, सस्य रुत्वे, विसर्गे च 'विदुषः' इति रूपं सिद्ध्यति ।

असुङादेशविधायकं विधिसूत्रम्

**पुंसोऽसुङ् ७ । १ । ८९ ॥**

**सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात् । पुमान् । हे पुमन् । पुमांसौ । पुंसः । पुम्भ्याम् । पुंसु ॥ ऋदुशनेत्यनङ् । उशना । उशनसौ । अस्य संबुद्धौ वानङ्, नलोपश्च वा वाच्यः (वा. ...) । हे उशन, हे उशनन्, हे उशनः । हे उशनसौ । उशनोभ्याम् । उशनस्सु ॥ अनेहा । अनेहसौ । हे अनेहः ॥ वेधाः । वेधसौ । हे वेधः । वेधोभ्याम् ।**

(पुंसः, असुङ्, सर्वनास्थाने)

सरलार्थः- पुंस्शब्दस्य स्थाने असुङादेशो भवति, सर्वनामस्थाने विवक्षिते ।

पुंस्शब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'पुंस् स्' इति जाते अनेन सूत्रेण पुंसः सकारस्य असुङादेशेऽनुबन्धलोपे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति अनुस्वारस्य मकारे वर्णसम्मेलने 'पुमस् स्' इति जाते उगित्वान्नुमि 'पुमन्स् स्' इति जाते 'सान्तमहतः संयोगस्य' इति दीर्घे

'पुमान्स् स्' इति जाते परस्य सकारस्य हल्ङ्यादिलोपे, पूर्वस्य सकारस्य संयोगान्तलोपे 'पुमान्' इति रूपं सिद्ध्यति ।

### औकारान्तादेशविधायकं विधिसूत्रम्

**अदस औ सुलोपश्च ७ । २ । १०७ ॥**

**अदस औकारोऽन्तादेशः स्यात्सौ परे सुलोपश्च । तदोरिति सः । असौ । त्यदाद्यत्वम् । वृद्धिः ॥**

(अदसः, औ, सुलोपः, च)

सरलार्थः- अदस्शब्दस्य स्थाने औकारान्तादेशो भवति, सुप्रत्यये परे, सुप्रत्ययस्य लोपश्च ।

अदस्शब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'अदस् स्' इति जाते अत्वं बाधित्वा अनेन सूत्रेण अदसः सकारस्य औकारादेशे सोर्लोपे च कृते 'अद औ' इति जाते 'वृद्धिरेचि' इति वृद्धौ 'अदौ' इत्यवस्थायां 'तदोः सः सावनन्त्ययोः' इति सूत्रेण दस्य सकारादेशे 'असौ' इति रूपं सिद्ध्यति ।

### उत्वमत्वविधायकं विधिसूत्रम्

**अदसोऽसेर्दादु दो मः ८ । २ । ८० ॥**

**अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च । आन्तरतम्याद्ध्रस्वस्य उः, दीर्घस्य ऊः । अमू । जसः शी । गुणः ॥**

(असे, अदस, दाद्, उ, दः, मः)

सरलार्थः- सान्तभिन्नस्य अदस्शब्दस्य दकाराद् उत्तरस्य वर्णस्य स्थाने उकारादेशः, दकारस्य स्थाने मकारादेशश्च भवतः । प्रमाणकृतेन आन्तर्येण ह्रस्वस्य उत्वम्, दीर्घस्य च ऊत्वं बोध्यम् ।

अदस् शब्दात् प्रथमाविभक्तौ द्विवचने औप्रत्यये 'अदस् औ' इति जाते 'त्यदादीनामः' इति सूत्रेण अत्वे, पररूपे च 'अद औ' इत्यवस्थायां 'वृद्धिरेचि' इति वृद्धौ 'अदौ' इत्यवस्थायाम् 'अदसोऽसेर्दादुदो मः' इति सूत्रेण दकारात्परस्य औकारस्य आन्तरतम्याद् ऊकारे, दस्य च मकारादेशे 'अमू' इति रूपं सिद्ध्यति ।

### ईत्वमत्वविधायकं विधिसूत्रम्

**एत ईद्बहुवचने ८ । २ । ८१ ॥**

**अदसो दात्परस्यैत ईद्दस्य च मो बह्वर्थोक्तौ । अमी । पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे । अमुम् । अमू । अमून् । मुत्वे कृते घिसंज्ञायां नाभावः ॥**

(अदसः, दात्, एतः, ईत्, दः, मः, बहुवचने)

सरलार्थः- अदस्शब्दावयवाद् दकारात् परस्य ईकारस्य स्थाने एकारः, दकारस्य स्थाने मकारश्च भवतः ।

अदस्शब्दात् प्रथमाया बहुवचने जसि 'त्यदादीनामः' इति अत्वे 'अतो गुणे' इति पररूपे 'जसः शी' इति 'शी' इत्यादेशे अनुबन्धलोपे 'आद् गुणः' इति सूत्रेण गुणे 'अदे' इति जाते अनेन सूत्रेण एकारस्य स्थाने ईकारादेशे, दकारस्य मकारे च 'अमी' इति रूपं सिद्ध्यति ।

## मुभावस्य असिद्धत्वनिषेधकं सूत्रम्

**न मु ने ८ ।२ ।३ ॥**

**नाभावे कर्तव्ये कृते च मुभावो नासिद्धः । अमुना । अमूभ्याम् अमूभ्याम् अमूभ्याम् । अमीभिः । अमुष्मै । अमीभ्यः अमीभ्यः । अमुष्मात् । अमुष्य । अमुयोः अमुयोः । अमीषाम् । अमुष्मिन् । अमीषु ॥**

(मु, ने, पूर्वत्र, असिद्धम्, न)

सरलार्थः- नाभावस्य कर्तव्यतायाम्, नाभावे कृते च उत्वमत्वे असिद्धे न भवतः ।

अदस्शब्दात् तृतीयैकवचने टा-प्रत्ययेऽनुबन्धलोपे 'त्यदादीनामः' इति अत्वे 'अतो गुणे' इति पररूपे 'अद आ' इति जाते 'अदसोऽसेर्दादु दो मः' इति सूत्रेण उत्वमत्वे 'अमु आ' इति जाते अस्य सूत्रस्य सहकारेण आकारस्य स्थाने 'आङो नाऽस्त्रियाम्' इति सूत्रेण 'ना' इत्यादेशे 'अमुना' इति रूपं सिद्ध्यति ।

## प्रयोगसिद्धिप्रकारः

**पुमान्**

पुंस्शब्दस्य प्रातिपदिकसंज्ञायां प्रथमाविभक्तौ बहुवचने सुप्रत्ययेऽनुबन्धलोपे 'पुंस् स्' इति स्थिते सुविभक्तेः सर्वनामस्थानसंज्ञायां 'ङिच्च' इति सूत्रस्य नियमेन अन्त्यस्य सकारस्य स्थाने 'पुंसोऽसुङ्' इति सूत्रेण असुङादेशे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति नियमेन अनुस्वारत्वनिवृत्तौ 'पुम् अस् स्' इति जाते वर्णयोगे 'पुमस् स्' इति जाते 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्रेण नुमागमेऽनुबन्धलोपे मित्त्वादन्त्यादचः परे 'पुमन्स् स्' इति जाते 'सान्तमहतः संयोगस्य' इति नकारस्योपधाया दीर्घे 'पुमान्स् स्' इति जाते, सकारस्यापृक्तसंज्ञायां लोपे, अन्यस्य सकारस्य च संयोगान्तलोपे 'पुमान्' इति रूपं सिद्धम् ।

### शब्दरूपावलिः

| विद्वस्शब्दस्य रूपाणि | | |
|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः |
| विद्वांसम् | विद्वांसौ | विदुषः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विदुषोः | विदुषाम् |
| विदुषि | विदुषोः | विद्वत्सु |
| हे विद्वन् ! | हे विद्वांसौ ! | हे विद्वांसः ! |

| पुंस्शब्दस्य रूपाणि | | |
|---|---|---|
| पुमान् | पुमांसौ | पुमांसः |
| पुमांसम् | पुमांसौ | पुंसः |
| पुंसा | पुम्भ्याम् | पुम्भिः |
| पुंसे | पुम्भ्याम् | पुम्भ्यः |
| पुंसः | पुम्भ्याम् | पुम्भ्यः |
| पुंसः | पुंसोः | पुंसाम् |
| पुंसि | पुंसोः | पुंसु |
| हे पुमन् ! | हे पुमांसौ ! | हे पुमांसः |

### वाक्येषु प्रयोगानुशीलनम्

१. विदुषां सङ्गतिः फलदायिनी भवति ।

२. पराक्रमी पुमान् ऐश्वर्यं लभते ।

३. वेधाः विश्वस्य स्रष्टा अस्ति ।

४. असौ शत्रुः मह्यं क्रुध्यति ।

५. अमी तव शत्रवः वीराः सन्ति ।

## अभ्यासः

१. **अधस्तनप्रश्नानाम् उत्तराणि लिखत**

(क) 'विद्वान्' इत्यत्र दीर्घविधायकं सूत्रं किम् ?

(ख) 'पुंसोऽसुङ्' इति सूत्रेण पुंस्शब्दस्य कासु विभक्तिषु असुङादेशः ?

(ग) 'हे उशन !' इत्यत्र केन सूत्रेण विकल्पेन नलोपः ?

(घ) अदस्शब्दस्य उत्वमत्वविधायकं सूत्रं किम् ?

(ङ) कस्मिन् विधौ कर्तव्ये मुभावोऽसिद्धो न भवति ?

(च) अदसो दात्परस्य एत बह्वर्थोक्तौ किम् आदिश्यते ?

२. **परस्परं मेलयत**

| 'क' खण्डः | 'ख' खण्डः |
|---|---|
| पुंसोऽसुङ् | अमीभिः |
| अदस औ सुलोपश्च | अमुना |
| एत ईद् बहुवचने | पुमांसौ |
| न मु ने | असौ |

३. **अनेहस्शब्दस्य सर्वाणि रूपाणि लिखत ।**

४. **अधस्तनरूपाणां सिद्धिप्रक्रियां दर्शयत**

(क) हे उशन, हे उशनन् ! (ख) असौ (ग) वेधाः (घ) अमुना (ङ) अमी

५. **पाठे साधितानि रूपाणि प्रयुज्य पञ्च वाक्यानि रचयत ।**

**इति हलन्तपुँल्लिङ्गाः**

चतुस्त्रिंशः पाठः

# हलन्तस्त्रीलिङ्गप्रकरणम्

## धकारादेशविधायकं विधिसूत्रम्

**नहो धः ८ । २ । ३४ ॥**

**नहो हस्य धः स्याज्झलि पदान्ते च ।**

(नहः, हः, धः, झलि, अन्ते, धातोः)

सरलार्थः- नह्धातोः अन्त्यस्य हकारस्य धकारादेशो भवति, झल्-वर्णे परे, पदान्ते च । विधिरयं ढत्वस्यापवादः

## दीर्घविधायकं विधिसूत्रम्

**नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ ६ । ३ । ११६ ॥**

**क्विबन्तेषु पूर्वपदस्य दीर्घः । उपानत्, उपानद् । उपानहौ । उपानत्सु ।**

(नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु, क्वौ, दीर्घः)

सरलार्थः- नह्, वृत्, वृष्, व्यध्, रुच्, सह्, तन् इत्येतेषु क्विप्प्रत्ययान्तेषु उत्तरपदेषु सत्सु पूर्वपदस्य दीर्घो भवति, एतेन सूत्रेण 'उप' इत्यस्याकारस्य दीर्घे 'उपानह्' शब्दः निष्पद्यते ।

उपानह् सु- उपानह् स् - उपानह् - उपानध् (नहो धः) - उपानद् - उपानत्/उपानद् ।

**क्विन्नन्तत्वात् कुत्वेन घः । उष्णिक्, उष्णिग् । उष्णिहौ । उष्णिग्भ्याम् । द्यौः । दिवौ । दिवः । द्युभ्याम् । गीः । गिरौ । गिरः । एवं पूः । चतस्रः । चतसृणाम् । का । के । काः । सर्वावत् ।**

उद्-उपसर्गपूर्वकात् ष्णिह्धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति सूत्रेण क्विन्प्रत्ययो जायते । क्विन्प्रत्ययान्तत्वाद् हकारस्य ढत्वं प्रबाध्य 'क्विन्प्रत्ययस्य कुः' इति कवर्गादेशो भवति, तेन उष्णिक्/उष्णिग् इति रूपद्वयं सिद्ध्यति । दिव्शब्दे च सौ 'दिव औत्' इति सूत्रेण औत्वम्, भ्यामादौ च दिव उदिति उत्वम् । गिर्शब्दस्य पदान्ते 'र्वोरुपधाया दीर्घ इकः' इति उपधादीर्घः । चतुर्शब्दस्य स्त्रीलिङ्गे 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति चतस्रादेशः । नामि 'न तिसृचतसृ' इति दीर्घनिषेधः । किम्शब्दस्य च त्यदाद्यत्वे टापि

सर्वाशब्दवदेव रूपाणि ज्ञेयानि ।

### यकारादेशविधायकं विधिसूत्रम्

**यः सौ ७ । २ ।११० ॥**

**इदमो दस्य यः । इयम् ।**

(इदमः, यः, सौ, विभक्तौ)

सरलार्थः- प्रथमैकवचनस्य सुप्रत्यये (विभक्तिसंज्ञके) परे इदम्-शब्दस्य दकारस्य स्थाने यकारादेशो भवति ।

इदम् सु - इदम् स् - इदम् स् (इदमो मः) - इयम् स् (यः सौ) - इयम् ।

त्यदाद्यत्वम् । पररूपत्वम् । टाप् । दश्चेति मः । इमे । इमाः । इमाम् । अनया । हलि लोपः । आभ्याम् । आभिः । अस्यै । अस्याः । अनयोः । आसाम् । अस्याम् । आसु । त्यदाद्यत्वम् । टाप् । स्या । त्ये । त्याः । एवं तद्, एतद् । वाक्, वाग् । वाचौ । वाग्भ्याम् । वाक्षु । अप्शब्दो नित्यं बहुवचनान्तः । अप्तृन्निति दीर्घः । आपः । अपः ॥

अप् जस् - अप् अस् - आप् अस् (अप्तृन्तृच्...) - आपस् - आपर् - आपः ।

अप् शस् - अप् अस् - अपस् - अपर् - अपः ।

### तकारादेशविधायकं विधिसूत्रम्

**अपो भि ७ । ४ । ४८ ॥**

**अपस्तकारो भादौ प्रत्यये । अद्भिः, अद्भ्यः ।**

(अपः, भि, तः)

सरलार्थः- भकारादौ प्रत्यये परे 'अप्' इत्येतस्याङ्गस्य तकारः अन्तादेशो भवति ।

अप् भिस् - अत् भिस् (अपो भि) - अद् भिस् (झलां जशोऽन्ते) - अद्भिस् - अद्भिर् - अद्भिः । एवम् अद्भ्यः ।

**अपाम् । अप्सु । दिक्, दिग् । दिशौ । दिशः । दिग्भ्याम् । त्यदादिष्विति दृशेः क्विन्विधानादन्यत्रापि कुत्वम् । दृक्, दृग् । दृशौ । दृग्भ्याम् । त्विट्, त्विड् । त्विषौ । त्विड्भ्याम् । ससजुषो रुरिति रुत्वम् । सजूः । सजुषौ । सजूर्भ्याम् । आशीः । आशिषौ । आशीर्भ्याम् ॥ असौ । उत्वमत्वे । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमूभ्यः २ । अमुष्याः । अमुयोः २ । अमूषाम् । अमुष्याम् । अमूषु ।**

दिश् स् - दिश् स् - दिश् - दिष् (व्रश्चभ्रश्ज ...) - दिड् (झलां जशोऽन्ते) - दिग् (क्विन्प्रत्ययस्य कुः) - दिक्/दिग् ।

त्यदादिषु 'दृशोऽनालोचने कञ्च' इति सूत्रेण दृश्धातोः क्विन्प्रत्ययो विधीयते । 'क्विन्प्रत्ययस्य कुः' इति सूत्रे क्विन्प्रत्ययस्येति पदस्य 'क्विन् प्रत्ययो यस्मात्' इत्यर्थे विहिते क्विप्प्रत्ययान्तस्यापि दृश्शब्दस्य कुत्वं भवति, तेन दृगिति रूपं सिद्ध्यति । अजादौ विभक्तौ तु वर्णयोगः, पदकार्यञ्च । 'ससजुषो रुः' इति सूत्रे सजुष्शब्दस्य निर्देशाद् मूर्धन्यस्यापि सकारस्य रुत्वे सजूः । असौ, अमू पुंवत् ।

अदस् जस् - अदस् अस् - अद अस् (अत्वे पररूपे) - अदा अस् (अजाद्यतष्टाप्) - अदास् - अदार् - अदाः - अमू (अदसोऽसेर्दादु दो मः)

**प्रयोगसिद्धिप्रकारः**

**उपानत्-द्**

उप-उपपदाद् णहधातोः 'सम्पदादिभ्यः क्विप्' इति सूत्रेण क्विपि, सर्वापहारिलोपे 'उप नह्' इति जाते 'उपपदमतिङ्' इति समासे 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' इति सूत्रेण पूर्वपदस्य दीर्घे 'उपानह्' इति जाते तस्य 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे, प्रकृतेरङ्गसंज्ञायाम्, प्रत्ययस्य अपृक्तसंज्ञायां हल्ङ्यादिलोपे 'उपानह्' इति जाते पदसंज्ञायां 'हो ढः' इति हकारस्य ढत्वे प्राप्ते तत्प्रबाध्य 'नहो धः' इति सूत्रेण हकारस्य धत्वे 'उपानध्' इत्यवस्थायां 'झलां जशोऽन्ते' इति जश्त्वे, अवसानसंज्ञायां 'वाऽवसाने' इति विकल्पेन चर्त्वे 'उपानत्', चर्त्वाभावे च 'उपानद्' इति रूपद्वयं सिद्धम् ।

**शब्दरूपावलिः**

| उपानह्शब्दस्य रूपाणि | | |
|---|---|---|
| उपानत्-द् | उपानहौ | उपानहः |
| उपानहम् | उपानहौ | उपानहः |
| उपानहा | उपानद्भ्याम् | उपानद्भिः |
| उपानहे | उपानद्भ्याम् | उपानद्भ्यः |
| उपानहः | उपानद्भ्याम् | उपानद्भ्यः |
| उपानहः | उपानहोः | उपानहाम् |

| इदम्शब्दस्य रूपाणि | | |
|---|---|---|
| इयम् | इमे | इमाः |
| इमाम् | इमे | इमाः |
| अनया | आभ्याम् | आभिः |
| अस्यै | आभ्याम् | आभ्यः |
| अस्याः | आभ्याम् | आभ्यः |
| अस्याः | अनयोः | आसाम् |

| | | |
|---|---|---|
| उपानहि | उपानहोः | उपानत्सु |
| हे उपानत्-द् ! | हे उपानहौ ! | हे उपानहः ! |

| | | |
|---|---|---|
| अस्याम् | अनयोः | आसु |
| त्यदादीनां सम्बोधनं नास्तीत्युत्सर्गः। | | |

## वाक्येषु प्रयोगानुशीलनम्

१. मम पिता शोभने उपानहौ धारयति ।

२. पुण्यकर्मणा द्यौः लभ्यते इति शास्त्रेषु वर्णितं विद्यते ।

३. मधुरया गिरा साधवः सुशोभिताः भवन्ति ।

४. शास्त्रेषु चतसृणां विद्यानां वर्णनं लभ्यते ।

५. यस्य वाग् मधुरा अस्ति, सः सर्वेभ्यो रोचते ।

६. आपः शीतस्पर्शवत्यः भवति ।

७. अमुष्यै बालिकायै दश रूप्यकाणि देहि ।

## अभ्यासः

**१. समुचितपदविन्यासेन वाक्यानि पूरयत**

(क) मम भगिनी ............ धारयति । (उपानहम्, उपानहौ)

(ख) ........... महिला जलम् आहरन्त्यः सन्ति । (चतस्रः, चत्वारः)

(ग) सज्जनानां ........... माधुर्यं निहितं भवति । (वाग्भ्याम्, वाक्षु)

(घ) शरत्काले सर्वाः ............ निर्मला दृश्यन्ते । (दिक्, दिशः)

(ङ) ......... छात्राया अक्षराणि सुन्दराणि सन्ति । (अमुष्याः, अमुया)

**२. सत्यासत्ये विवेचयत**

(क) उष्णिहशब्दस्य पदान्ते कुत्वं न भवति ।

(ख) 'इमे' इत्यत्र 'दश्च' इति सूत्रेण दस्य मकारादेशो भवति ।

(ग) अप्शब्दः सर्वदा एकवचने प्रयुज्यते ।

(घ) 'त्यदादिषु...' इति सूत्रेण दृश्धातोः क्विन्प्रत्ययो भवति ।

(ङ) अदस्शब्दस्य स्त्रीलिङ्गे उत्वमत्वे न भवतः ।

**३. अधस्तनप्रश्नानाम् एकवाक्येन उत्तराणि लिखत**

(क) 'नहो धः' इति कस्य सूत्रस्यापवादः ?

(ख) 'उष्णिक्' इत्यत्र कुत्वविधायकं सूत्रं किम् ?

(ग) 'इयम्' इत्यत्र त्यदाद्यत्वं केन सूत्रेण बाध्यते ?

(ङ) 'आभ्याम्' इत्यत्र इदम इद्भागस्य लोपः केन भवति ?

(च) त्यदादीनामत्वे सति कः स्त्रीप्रत्ययः ?

(छ) 'आपः' इत्यत्र केन उपधादीर्घः ?

(ज) सजूष्-शब्दस्य षकारस्य केन रुत्वम् ?

(झ) दृक्-ग् इत्यत्र कुत्वं कथं सिद्ध्यति ?

**४. अधस्तनसूत्राणां सरलार्थं लिखत**

(क) नहो धः

(ख) नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ

(ग) अपो भि

**५. अधस्तनशब्दानां सूत्रादिप्रदर्शनपुरःसरं रूपसिद्धिप्रक्रियां प्रदर्शयत**

(क) उपानद्भ्याम् (ख) उपानत्सु (ग) चतसृणाम्

(घ) इमाः (ङ) वाक् (च) अद्भिः

(छ) अमुया

**६. किम्शब्दस्य अदस्शब्दस्य च स्त्रीलिङ्गे जायमानानि सर्वाणि रूपाणि लिखत ।**

**॥ इति हलन्तस्त्रीलिङ्गाः ॥**

पञ्चत्रिंशः पाठः

# हलन्तनपुंसकलिङ्गप्रकरणम्

हलन्तनपुंसकशब्देभ्यो विहितयोः सु-अम्प्रत्यययोः 'स्वमोर्नपुंसकात्' इति लुग् भवति । तथैव प्रथमाद्वितीययोः द्विवचने औ-औटोः नपुंसकाच्चेति शीः । जश्शसोः स्थाने 'जश्शसोः शिः' इति श्यादेशे सर्वनामस्थानसंज्ञायां च यथोचितं नुमागमः, उपदादीर्घश्च । त्यदादिशब्देभ्यश्च स्वमौ विहायान्यत्र त्यदाद्यत्वे पररूपे च सर्वशब्दवदेव रूपाणि भवन्ति ।

**स्वमोर्नपुंसकात् । दत्वम् । स्वनडुत्, स्वनडुद् । स्वनडुही । चतुरनडुहोरित्याम् । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् । वाः । वारी । वारि । वार्भ्याम् । चत्वारि । किम् । के । कानि । इदम् । इमे । इमानि । अन्वादेशे नपुंसके वा एनद्वक्तव्यः (वा. ...) । एनत् । एने । एनानि । एनेन । एनयोः । अहः । विभाषा ङिश्योः । अह्नी, अहनी । अहानि ।**

अन्वादेशे - अन्वादेशेऽर्थे नपुंसकस्य द्वितीयायां विभक्तौ, टा, ओस् एतयोश्च विभक्त्योः परयोः इदमेतदोः स्थाने 'एनद्' इत्यादेशः विकल्पेन भवतीति वार्तिकार्थः ।

### रुत्वविधायकं विधिसूत्रम्

**अहन् ८ । २ । ६८ ॥**

**अहन्नित्यस्य रुः पदान्ते । अहोभ्याम् ।**

(अहन्, रूः, पदस्य, अन्ते)

सरलार्थः- 'अहन्' इत्यस्य नकारस्य स्थाने 'रु' इत्यादेशो भवति, पदान्ते ।

दण्डि । दण्डिनी । दण्डीनि । दण्डिना । दण्डिभ्याम् । सुपथि । टेर्लोपः । सुपथी । सुपन्थानि । ऊर्क्, ऊर्ग् । ऊर्जी । ऊर्न्जि । नरजानां संयोगः । तत् । ते । तानि । यत् । ये । यानि । एतत् । एते । एतानि । गवाक्, गवाग् ॥ गोची । गवाञ्चि । पुनस्तद्वत् । गोचा । गवाग्भ्याम् । शकृत् । शकृती । शकृन्ति । ददत् ।

### नुमागमविधायकं विधिसूत्रम्

**वा नपुंसकस्य ७ । १ । ७९**

**अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य वा नुम् सर्वनामस्थाने ।**

**ददन्ति, ददति । तुदत् ।**

(अभ्यस्तात्, शतुः, नुम्, वा, नपुंसकस्य)

सरलार्थः- अभ्यस्तसंज्ञकाद् धातोः परो यः शतृप्रत्ययः तदन्तस्य नपुंसकशब्दस्य सर्वनामस्थाने परे विकल्पेन नुमागमो भवति ।

दा-धातोः 'शौ' इति द्वित्वे 'उभे अभ्यस्तम्' इति अभ्यस्तसंज्ञायां ततः शतृप्रत्यये नपुंसके जश्शसोः श्यादेशे, सर्वनामस्थानसंज्ञायाम् उगिदचामिति नुमागमे प्राप्ते नाभ्यस्ताच्छतुरिति निषेधे च प्राप्ते अनेन सूत्रेण नुमागमविकल्पः ।

### नुमागमविधायकं विधिसूत्रम्

**आच्छीनद्योर्नुम् ७ ।१ ।८० ॥**

**अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्य नुम् वा शीनद्योः । तुदन्ती, तुदती । तुदन्ति ।**

(आत्, शतुः, नुम्, वा, शीनद्योः)

सरलार्थः- अवर्णान्ताद् अङ्गाद् उत्तरे स्थितो यः शतृ-प्रत्ययस्य अवयवः तदन्तस्य शब्दस्य 'नुम्' इत्यागमो विकल्पेन भवति ।

### नुमागमविधायकं विधिसूत्रम्

**शप्श्यनोर्नित्यम् ७ ।१ ।८१ ॥**

**शप्श्यनोरात्परो यः शतुरवयवस्तस्य नित्यं नुम् शीनद्योः । पचन्ती ।**

(शप्श्यनोः, आत्, शतुः, नित्यम्, नुम्)

सरलार्थः- शप्श्यनोर्विकरणप्रत्यययोः योऽकारः, तस्मात्परः यः शतृप्रत्ययावयवः, तदन्तस्य शीनद्योः नित्यं नुमागमो भवति ।

पचन्ति । दीव्यत् । दीव्यन्ती । दीव्यन्ति । धनुः । धनुषी । सान्तेति दीर्घः । नुम्विसर्जनीयेति षः । धनूंषि । धनुषा । धनुर्भ्याम् । एवं चक्षुर्हविरादयः ॥ पयः पयसी । पयांसि । पयसा । पयोभ्याम् । सुपुम् । सुपुंसी । सुपुमांसि । अदः । विभक्तिकार्यम् । उत्वमत्वे । अमू । अमूनि । शेषं पुंवत् ॥

## प्रयोगसिद्धिप्रकारः

**स्वनड्वांहि**

स्वनडुह्शब्दाद् जस्प्रत्यये ऽनुबन्धलोपे **'जश्शसोः शिः'** इति सूत्रेण जसः स्थाने श्यादेशे ऽनुबन्धलोपे **'स्वनडुह् इ'** इति जाते **'शि सर्वनामस्थानम्'** इति सूत्रेण सर्वनामस्थानसंज्ञायां **'चतुरनडुहोरामुदात्तः'** इति सूत्रेण आमागमे ऽनुबन्धलोपे मित्वाद् अन्त्यादचः उकारात्परे स्थापिते, यणादेशे **'स्वनड्वाह् इ'** इति जाते **'नपुंसकस्य झलचः'** इति सूत्रेण नुमागमे **'स्वनड्वान्ह् इ'** इति जाते **'नश्चापदान्तस्य झलि'** इति सूत्रेण अनुस्वारे, वर्णयोगे च **'स्वनड्वांहि'** इति रूपम् ।

## शब्दरूपावलिः

**स्वनडुह्शब्दस्य रूपाणि**

| | | |
|---|---|---|
| स्वनडुत्-द् | स्वनडुही | स्वनड्वांहि |
| स्वनडुत्-द् | स्वनडुही | स्वनड्वांहि |
| स्वनडुहा | स्वनडुद्भ्याम् | स्वनडुद्भिः |
| स्वनडुहे | स्वनडुद्भ्याम् | स्वनडुद्भ्यः |
| स्वनडुहः | स्वनडुद्भ्याम् | स्वनडुद्भ्यः |
| स्वनडुहः | स्वनडुहोः | स्वनडुहाम् |
| स्वनडुहि | स्वनडुहोः | स्वनडुत्सु |
| हे स्वनडुत्-द् ! | हे स्वनडुही ! | हे स्वनड्वांहि ! |

### वाक्येषु प्रयोगानुशीलनम्

१. कृषकाणां स्वनड्वांहि कुलानि सन्ति ।

२. आयुः, विद्या, यशोः, बलम् चेति चत्वारि मनुष्यजीवने आवश्यकानि भवन्ति ।

३. मम मित्राणि सखिभ्यः उपहारान् ददन्ति/ददति सन्ति ।

४. महाभारतस्य युद्धे बहूनि धनूंषि खण्डितानि अभवन् ।

५. अहं चक्षुर्भ्याम् सुन्दरं दृश्यं पश्यामि ।

## अभ्यासः

१. **प्रदत्तेभ्यो विकल्पेभ्यः समुचितम् उत्तरमन्विष्य लिखत**

(क) स्वनडुह्शब्दस्य क्लीबे जसि किं रूपं भवति ?

(अ) स्वनडुही (आ) स्वनडुहः (इ) स्वनड्वांहि

(ख) इदम्शब्दस्य नपुंसकलिङ्गे अन्वादेशपक्षे किम् आदिश्यते ?

(अ) अनत् (आ) एनद् (इ) एतद्

(ग) ऊर्ज्शब्दस्य जश्शसोः केषां संयोगो भवति ?

(अ) नरजानाम् (आ) रनजानाम् (इ) जनराणाम्

(घ) ददत्शब्दस्य नपुंसकलिङ्गे सर्वनामस्थाने को विशेषः ?

(अ) नुमागमनिषेधः (आ) नुमागमविकल्पः (इ) नित्यं नुमागमः

२. **अधस्तनप्रश्नानाम् उत्तराणि लिखत**

(क) जश्शसोः स्थाने आदिष्टस्य 'शि' इत्यस्य केन सर्वनामस्थानसंज्ञा ?

(ख) 'वा नपुंसकस्य' इति किं विधीयते ?

(ग) 'सुपन्थानि' इत्यस्य प्रातिपदिक-विभक्ति-वचनानि निर्दिशत ।

(घ) तुदन्ती/तुदती इत्यत्र केन नुम्विकल्पः ?

(ङ) चक्षुष्शब्दस्य भ्यामि किं रूपम् ?

३. **अधस्तनसूत्राणां सरलार्थं स्वीयशैल्या लिखत**

(क) अहन् (ख) आच्छीनद्योर्नुम् (ग) शप्श्यनोर्नित्यम्

४. **सूत्रवार्त्तिकादिप्रदर्शनपुरःसरं अधस्तनरूपाणां सिद्धिप्रक्रियां दर्शयत**

(क) चत्वारि (ख) एनयोः (ग) सुपन्थानि

(घ) गवाग्भ्याम् (ङ) ददन्ति, ददति । (च) दीव्यन्ती

(छ) सुपुमांसि

५. **अहन्शब्दस्य सर्वाणि रूपाणि लिखत ।**

६. **चक्षुष्शब्दस्य सर्वाणि रूपाणि लिखत ।**

षट्त्रिंशः पाठः

# अव्ययप्रकरणम्

## अव्ययसंज्ञाविधायकं सूत्रम्

स्वरादिनिपातमव्ययम् १ ।१ ।३७ ॥

स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः । स्वर् । अन्तर् । प्रातर् । पुनर् । सनुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् । ऋते । युगपत् । आरात् । पृथक् । ह्यस् । श्वस् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । अवस् । समया । निकषा । स्वयम् । वृथा । नक्तम् । नञ् । हेतौ । इद्धा । अद्धा । सामि । वत् । ब्राह्मणवत् । क्षत्रियवत् । सना । सनत् । सनात् । उपधा । तिरस् । अन्तरा । अन्तरेण । ज्योक् । कम् । शम् । सहसा । विना । नाना । स्वस्ति । स्वधा । अलम् । वषट् । श्रौषट् । वौषट् । अन्यत् । अस्ति । उपांशु । क्षमा । विहायसा । दोषा । मृषा । मिथ्या । मुधा । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रवाहुकम् । प्रवाहिका । आर्यहलम् । अभीक्ष्णम् । साकम् । सार्धम् । नमस् । हिरुक् । धिक् । अथ । अम् । आम् । प्रताम् । प्रशान् । प्रतान् । मा । माङ् । आकृतिगणोऽयम् । च । वा । ह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । भूयस् । कूपत् । कुवित् । नेत् । चेत् । चण् कच्चित् । यत्र । नह । हन्त । माकिः । माकिम् । नकिः । नकिम् । माङ् । नञ् । यावत् । तावत् । त्वै । द्वै । न्वै । रै । श्रौषट् । वौषट् । स्वाहा । स्वधा । वषट् । तुम् । तथाहि । खलु । किल । अथो । अथ । सुष्ठु । स्म । आदह । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च (गणसूत्रम्) । अवदत्तम् । अहंयुः । अस्तिक्षीरा । अ । आ । इ । ई । उ । ऊ । ए । ऐ । ओ । औ । पशु । शुकम् । यथाकथाच । पाट् । प्याट् । अङ्ग । है । हे । भोः । अये । द्य । विषु । एकपदे । युत् । आतः । चादिरप्याकृतिगणः ।

(स्वरादि-निपातम्, अव्ययम्)

सरलार्थः- स्वरादिगणपठिताः शब्दाः, निपाताश्च अव्ययसंज्ञका भवन्ति ।

## अव्ययसंज्ञाविायकं सूत्रम्

तद्धितश्चासर्वविभक्तिः १ ।१ ।३८ ॥

यस्मात्सर्वा विभकितर्नोत्पद्यते, स तद्धितान्तोऽव्ययंस्यात् । परिगणनं कर्तव्यम् ।

(असर्वविभक्तिः, तद्धितः, च, अव्ययम्)

सरलार्थः- यस्मात् तद्धितप्रत्ययान्तशब्दात् सर्वे विभक्ति-प्रत्यया न विधीयन्ते, तस्य अव्ययसंज्ञा भवति ।

**तसिलादयः प्राक् पाशपः । शस्प्रभृतयः प्राक् समासान्तेभ्यः । अम् । आम् । कृत्वोर्थाः । तसिवती । नानाञौ । एतदन्तमप्यव्ययम् ॥**

## अव्ययसंज्ञाविधायकं सूत्रम्

**कृन्मेजन्तः १ ।१ ।३९ ॥**

**कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात् । स्मारं स्मारम् । जीवसे । पिबध्यै ।**

(कृद्-म-एजन्तः, अव्ययम्)

सरलार्थः- यः कृत्प्रत्ययः मकारान्तः एच्प्रत्याहारान्तश्च अस्ति, तदन्तः शब्दः अव्ययसंज्ञको भवति । यथा णमुल्प्रत्ययस्य अनुबन्धलोपे अम् इति मान्तः प्रत्ययोऽवशिष्यते । अतः तदन्तम् स्मारम् स्मारम् इति शब्दः अव्ययसंज्ञको भवति । तथैव असे, कध्यै इति प्रत्ययद्वयम् एजन्तम् अस्ति । तस्मात् जीवसे, पिबध्यै इत्यनयोः अव्ययसंज्ञा भवति ।

## अव्ययसंज्ञाविधायकं सूत्रम्

**क्त्वातोसुन्कसुनः १ ।१ ।४०**

**एतदन्तमव्ययम् । कृत्वा । उदेतोः । विसृपः ।**

(क्त्वा-तोसुन्-कसुनः, अव्ययम्)

सरलार्थः- क्त्वा-तोसुन्-कसुन्प्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति । क्त्वाप्रत्ययान्तस्य उदाहरणम्, कृत्वा । उदेतोः इति तोसुन्प्रत्ययान्तस्य उदाहरणम् । विसृपः इति कसुन्प्रत्ययान्तस्योदाहरणम् ।

## अव्ययसंज्ञाविधायकं सूत्रम्

**अव्ययीभावश्च १ ।१ ।४१ ॥**

**अधिहरि ।**

(अव्ययीभावः, अव्ययम्)

सरलार्थः- अव्ययीभावः समासः अव्ययसंज्ञको भवति, यथा - अधिहरि ।

## सुपः लुग्विधायकं सूत्रम्

**अव्ययादाप्सुपः २ ।४ ।८२ ॥**

**अव्ययाद्विहितस्यापः सुपश्च लुक् । तत्र शालायाम् ॥**

(अव्ययाद्, आप्, सुपः)

सरालर्थः अव्ययसमासाद् शब्दाद् विहितानाम् आप्प्रत्ययानां (डाप्, टाप्, चाप्) सुपश्च लुक् भवति ।

> **सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**
> **वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥**
> **वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।**
> **आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥**
> **वगाहः, अवगाहः । पिधानम्, अपिधानम् ॥**

यः शब्दः त्रिषु लिङ्गेषु, सर्वासु (सप्तसु) विभक्तिषु, सर्वेषु च वचनेषु समरूपो भवति स शब्दः अव्ययसंज्ञको भवति इत्यर्थः । अव्ययसंज्ञकेभ्यः शब्देभ्यः विहितस्य आपः सुपश्च अव्ययादाप्सुपः इति सूत्रेण लोपो भवति । तस्माद् अव्ययसंज्ञकः शब्दः प्रकृतिवद् भवति । अव्ययसंज्ञकस्य शब्दस्य सर्वत्र एकमेव रूपं भवतीति फलितार्थः । भागुरिनामकः आचार्यः अव, अपि इत्येतयोः उपसर्गयोः अकारस्य लोपं कर्तुं वाञ्छति । तथैव हलन्तात् च शब्दानाम् स्त्रीत्वे आप्-प्रत्ययं कर्तुं वाञ्छति ।

यथा - वगाहः, अवगाहः, पिधानम्, अपिधानम् इति अव-अप्युपसर्गयोः भागुरिमते अल्लोपस्य उदाहरणे वर्तेते । वाचा, निशा, दिशा इत्येतानि क्रमेण वाच्, निश्, दिश् इति हलन्तशब्दाद् आप्-प्रत्ययेन निष्पन्नानि रूपाणि सन्ति ।

स्वर् = स्वर्गे परलोके च ।
अन्तर् = मध्ये ।
प्रातर् = प्रत्यूषे ।
पुनर् = अप्रथमे विशेषे च ।
सनुतर् = अन्तर्धाने ।
उच्चैस् = महति ।
नीचैस् = अल्पे ।
शनैस् = क्रियामान्द्ये ।
ऋधक् = सत्ये ।
ऋते = वर्जने ।
युगपत् = एककाले ।
आरात् = दूरसमीपयोः ।
पृथक् = भिन्ने ।
ह्यस् = अतीतेऽह्नि ।

श्वस् = अनागतेऽह्नि ।
दिवा = दिवसे ।
रात्रौ = निशि ।
सायम् = निशामुखे ।
चिरम् = बहुकाले ।
मनाक् = अल्पे ।
ईषत् = अल्पे ।
जोषम् = सुखे, मौने च ।
तूष्णीम् = मौने ।
बहिस् = बाह्ये ।
अवस् = बाह्ये ।
समया = समीपे मध्ये च ।
निकषा = समीपे ।
स्वयम् = आत्मनेत्यर्थे ।
वृथा = व्यर्थे ।
नक्तम् = रात्रौ ।
नञ् = निषेधे ।
हेतौ = निमित्ते ।
इद्धा = प्रकाश्ये ।
अद्धा = स्फुटावधारणयोः ।
सामि = अर्धजुगुप्सितयोः ।
वत् = तेन तुल्यमित्यादिभिर्विहितो यो वतिप्रत्ययः स इह गृह्यते । ब्राह्मणवत् । क्षत्रियवत् ।
सना = नित्ये ।
सनत् = नित्ये ।
सनात् = नित्ये ।
उपधा = भेदे ।
तिरस् = अन्तर्धौ, तिर्यगर्थे, परिभवे च ।
अन्तरा = मध्ये विनार्थे च ।
अन्तरेण = वर्जने ।
ज्योक् = कालभूयस्त्वे प्रश्ने शीघ्रार्थे सम्प्रत्यर्थे च ।
कम् = वारिमूर्धनिन्दासुखेषु ।
शम् = सुखे ।
सहसा = आकस्मिकाविमर्शयोः ।
विना = वर्जने ।
नाना = अनेकविनार्थयोः ।
स्वस्ति = मङ्गले ।
स्वधा = पितृदाने ।
अलम् = भूषणपर्याप्तिशक्तिवारणनिषेधेषु ।
वषट् = हविर्दाने ।
श्रौषट् = हविर्दाने ॥
वौषट् = हविर्दाने ।
अन्यत् = अन्यार्थे ।
अस्ति = सत्तायाम् ।
उपांशु = अप्रकाशोच्चारणरहस्ययोः ।
क्षमा = क्षान्तौ ।
विहायसा = वियदर्थे ।
दोषा = रात्रौ ।
मृषा = व्यर्थे ।
मिथ्या = व्यर्थे ।
मुधा = व्यर्थे ।
पुरा = अविरते चिरातीते भविष्यदासन्ने च ।

मिथो = सहार्थे ।

मिथस् = सहार्थे ।

प्रायस् = बाहुल्ये ।

मुहुस् = पुनरर्थे ।

प्रवाहुकम् = समानकाले ।

प्रवाहिका = समानकाले ।

आर्यहलम् = बलात्कारे ।

अभीक्ष्णम् = पौनःपुन्ये ।

साकम् = सहार्थे ।

सार्धम् = सहार्थे ।

नमस् = नतौ ।

हिरुक् = वर्जने ।

धिक् = निन्दाभर्त्सनयोः ।

अम् = शैघ्र्येऽल्पे च ।

आम् = अङ्गीकारे ।

प्रताम् = ग्लानौ ।

प्रशान् = समानार्थे ।

प्रतान् = विस्तारे ।

मा = निषेधाशङ्कयोः ।

माङ् = निषेधाशङ्कयोः ।

च = समुच्चयान्वाचयेतरेतरयोगसमाहारेषु ।

वा = स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये ।

ह = प्रसिद्धौ ।

अह = पूजायाम् ।

एव = अवधारणेऽनवक्लृप्तौ च ।

एवम् = उक्तपरामर्शे ।

नूनम् = निश्चये, तर्के च ।

शश्वत् = पौनःपुन्ये सहार्थे च ।

युगपत् = एककाले ।

भूयस् = पुनरर्थे आधिक्ये च ।

कूपत् = प्रश्ने प्रशंसायां च ।

कुवित् = भूर्यर्थे प्रशंसायां च ।

नेत् = शङ्कायां प्रतिषेधविचारसमुच्चयेषु ।

चेत् = यद्यर्थे ।

चण = यदि ।

कच्चित् = इष्टप्रश्ने ।

यत्र = अनवक्लृप्त्यमर्षगर्हाश्चर्येषु ।

नह = प्रत्यारम्भे ।

हन्त = हर्षे, विषादेऽनुकम्पायां वाक्यारम्भे च ।

माकिः = वर्जने ।

माकिम् = वर्जने ।

नकिः = वर्जने ।

नकिम् = वर्जने ।

माङ् = निषेधे ।

नञ् = निषेधे ।

यावत् = साकल्यावधिमानावधारणेषु ।

तावत् = साकल्यावधिमानावधारणेषु ।

त्वै = विशेषवितर्कयोः ।

द्वै = वितर्के ।

न्वै = वितर्के ।

रै = दाने, अनादरे च ।

श्रौषट् = हविर्दाने ।

वौषट् = हविर्दाने ।

स्वाहा = देवताभ्यो दाने ।

स्वधा = पितृभ्यो दाने ।

वषट् = देवताभ्यो दाने ।

तुम् = तुङ्कारे ।

तथाहि = निदर्शने ।

खलु = निषेधवाक्यालङ्कारनिश्चयेषु ।

किल = किलेति वार्तायामलीके च ।

अथो = मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु ।

अथ = मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु ।

सुष्ठु = सुन्दरे ।

स्म = अतीते ।

आदह = उपक्रमहिंसाकुत्सनेषु ।

अवदत्तम् = प्रदत्ते ।

अ = सम्बोधनेऽधिक्षेपे निषेधे च ।

आ = वाक्यस्मरणयोः ।

इ = सम्बोधनजुगुप्साविस्मयेषु ।

ई = सम्बोधने ।

उ = सम्बोधने ।

ऊ = सम्बोधने ।

ए = सम्बोधने ।

ऐ = सम्बोधने ।

ओ = सम्बोधने ।

औ = सम्बोधने ।

पशु = सम्यगर्थे ।

शुकम् = शैघ्र्ये ।

यथाकथाच = अनादरे ।

पाट् = सम्बोधने ।

प्याट् = सम्बोधने ।

अङ्ग = सम्बोधने ।

है = सम्बोधने ।

हे = सम्बोधने ।

भोः = सम्बोधने ।

अये = सम्बोधने ।

विषु = नानार्थे ।

एकपदे = अकस्मात् इत्यर्थे ।

युत् = कुत्सायाम् ।

आतः = इतोऽपि इत्यर्थे ।

**प्रयोगसिद्धिप्रकारः**

**स्वः**

स्वरादिगणपठितस्य स्वर्शब्दस्य प्रातिपदिकसंज्ञायां ततः प्रथमाविभक्तौ एकवचने सुप्रत्ययेऽनुबन्धलोपे 'स्वर्+स्' इति स्थिते 'स्वरादिनिपातमव्ययम्' इति सूत्रेण अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति सूत्रेण सुपो लुकि 'स्वर्' इति जाते, रेफस्य विसर्गे 'स्वः' इति रूपं सिद्धम् ।

## वाक्येषु प्रयोगानुशीलनम्

१. पिता प्रातः शीघ्रम् उत्तिष्ठति ।

२. दिवा शयनं नैव कर्तव्यम् ।

३. दुर्जनः अधिकं मिथ्या भाषते ।

४. जनः परिश्रमं न कुरुते चेत् सफलो न भवति ।

५. छात्राः पठित्वा सुष्ठु कार्याणि करिष्यन्ति ।

## अभ्यासः

**१. अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) स्वरादिगणपठितानां शब्दानाम् अव्ययसंज्ञा केन सूत्रेण भवति ?

(ख) कीदृशानां कृदन्तशब्दानाम् अव्ययसंज्ञा भवति ?

(ग) अव्ययीभावस्य अव्ययसंज्ञा केन सूत्रेण विधीयते ?

(घ) अव्ययसंज्ञकेभ्यो विहितस्य सुपः केन लुक् भवति ?

(ङ) क्त्वा-तोसुन्-कसुन्प्रत्ययान्तानां कानि उदाहरणानि ?

**२. सदृशं त्रिषु लिङ्गेषु... इति कारिकां प्रपूर्य सरलार्थं लिखत ।**

**३. अधस्तनानाम् अव्ययशब्दानाम् अर्थान् लिखत**

(क) सायम् (ख) प्रबाहुकम् (ग) यावत्

(घ) अहंयुः (ङ) विषु (च) नञ्

**४. अधस्तनानि अव्ययपदानि प्रयुज्य वाक्यानि रचयत**

वृथा, अथ, मुहुः, स्वयम्, अन्तरेण, श्वः, विना

**५. 'तद्धितश्चासर्वविभक्तिः' इति सूत्रे के तद्धितप्रत्ययाः परिगण्यन्ते ? लिखत ।**